larize the traditional Hindu culture and inculcate upon the minds of the people the spiritual and religious truths reached by the early Hindu philosophers and *sādhakas,* and incorporated in the works in a popular form. Eager circles of listeners squatting round an interpreter reading out and explaining the *ślokas* of the *Bhāgavata* were a common sight in the past. The practice is not so much in vogue now-a-days owing mainly perhaps to the different spirit of the times, though its potency as a distributer of culture cannot be questioned. If the *Bhāgavata* embodies in itself the essence of the philosophical and religious truths that have been reached by the Hindus by virtue of their centuries of search and *sādhana* as regulated and stimulated by the peculiar *varṇāśrama* organization of the Hindu society, and if the Hindus, as represented by their highest masters in the fields of spiritual and religious culture, have, by virtue of arduous efforts for centuries, made more conquests in the field of spiritual knowledge and *sādhana* than any other people, the value of the *Bhāgavata* as an easy version of the said truths, and as the manual of *bhakti-sādhana* cannot be gainsaid. There are extant on the earth various religions and religious cults, attempting for their followers to tear up to a certain extent the veil that puts out of sight the Worker of the universe and His ways. To understand all His ways, infinite as they are, is not the aim of *bhakti* or perhaps of any other Hindu cult. In his *ānanda* aspect i.e. in his aspects of love, bliss, and beauty, He allows himself to be

realized by man, which does not mean an intellectual mastery by the latter of all He does and the manner of doing it. To be clearer, a son need not master all the learning of his erudite father, nor a friend to acquire the scholarship of his learned friend, for the completion of the tie that subsists between them; because it is complete without it. To enable man to be conscious of such a tie, to make it effectively binding, to convert it into an actuality instead of allowing it to be but imaginary is the aim of *bhakti*, and on it depend the value and importance of the *Bhāgavata* and the *Muktāphala*.

96, Amherst Street,
CALCUTTA, 1921.

NARENDRA NATH LAW

सटीकं

मुक्ताफलम्

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥१॥

यज्ज्योतिरुन्मिषति चेतसि धर्ममेघमातस्थुषामतिवशे परिकर्ममुख्यैः।
तच्छुद्धसत्त्वमुकुरप्रतिबिम्बभावात् कृष्णाभिधामुपगतं भुवि भावयेम ॥१॥
समूलघातं प्रणिहत्य योऽन्धं मृणालिनीं चेतयते मनीषाम्।
यत्पादसङ्गाज्जगती कृतार्था गुरुं विवस्वन्तमिहानुवे तम् ॥२॥
श्रीवोपदेवस्य निधेर्गुणानां जयन्ति ते ते भुवि वाग्विलासाः।
विकुण्ठ्य येषु स्वयमीश्वरोऽपि सर्वज्ञशब्दं स्वमवैति रूढम् ॥३॥
अस्मिन् समस्मिन्नपि वाङ्मयाब्धावपारपारीणमनीषयोच्चैः।
विभ्रण्वतश्चिज्जडवस्तुभेदं गुणा गणेया भुवि नास्य कैः कैः ॥४॥
अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो मुदं ददन्तेऽत्र न कस्य सूक्तयः।
मुक्तामृषाद्वेषिमनांस्यनारतं वियोगिहृन्दीव कलाः कलानिधेः ॥५॥
तेन मुक्ताफलं तेने यल्लोकमनुगृह्णता।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकाम् ॥६॥
सृष्टां त्रिलोकगुरुणार्धमिवेन्दुलेखां सर्वज्ञमण्डनकरीमकलङ्कशङ्काम्।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा कुर्यामिमां तदिह यान्तु बुधाः प्रसादम् ॥७॥

इह मुमुक्षूपकाराय रुचिरं प्रकरणं चिकीर्षुराचार्यः तस्य परिसमाप्तिप्रचयपरिपन्थिविघ्नविघाताय शिष्टाचारपरिपालनाय च समुचितेष्टदेवतां वन्दमानस्तत्प्रतिपाद्यमर्थं श्रोतृप्रवृत्त्यङ्गतया संक्षिप्याह 'विष्णुमित्यादि। पञ्च आत्मान उपाधिभिन्नानि स्वरूपाणि यस्य स तथा। पञ्चस्वापि विष्णुशब्दो व्याप्तिविवक्षया मङ्गलार्थत्वाच्च प्रागुक्तः। तं वन्दे नमस्कुर्वे। भक्त्येति। अष्टादश-

भेदया भक्त्या । भक्तैराश्रितमित्युत्तरेणान्वयः । अष्टादशत्वेऽपि तत्रैविध्यानतिक्रम इति भावः । साङ्गेति । अङ्गानामसङ्गत्वादीनां वर्गाः समूहाः अङ्गवर्गाः । तेषामूनविंशतिः तया सह वर्तत इति साङ्गवर्गोनविंशतिः । तया । भक्तिविशेषणञ्चैतत् । ननु समैर्वर्ग[1] इति समसमूहे सङ्केतितो वर्गशब्दः कथमिह तद्वैपरीत्ये प्रयुज्यत इति । सत्यम् । किन्तु जातिसाम्यं तत्र विवक्षितं न तु संख्यासाम्यं त्रिवर्ग[2] इत्यादि स्वयमुक्तेः । यद्यप्यूनविंशतिरित्यविशेषेणोक्तं तथापि प्रत्यासत्तेर्लोकरूढेश्चैकोनविंशतित्वं ज्ञेयम् । भक्तैर्नवभिरिति । वक्ष्यमाणगोप्यादिभूयस्त्वेऽपि हास्यादिनवरसावच्छिन्नत्वेन नवत्वं नवोपाध्यवच्छिन्नत्वात् । नवैव द्रव्याणीतिवन्नवभिरित्युक्तं नवविधैरित्यर्थः । तदेवमुपास्यं ससाधनोपास्तिरुपासकश्चेति त्रयं प्रकरणार्थ इत्युक्तम् । अयमेव पादचतुष्टयार्थः क्रमात् प्रकरणचतुष्केणाभिधास्यते । एतावानेव भागवतेऽनुष्ठेयोऽर्थः । फलन्तत्रैवोक्तमिति न पृथग् दर्शितम् । महाप्रयोजनादयस्तु धर्मः प्रोज्झित[3] इत्यत्र टीकायामुक्ता इहानुसन्धेयाः । तत्र कैवल्यलाभः प्रयोजनम् । भक्तियोगोऽभिधेयः । निर्मत्सरत्वविशिष्टसत्त्वमधिकारिविशेषणम् । न वर्णाश्रमादि । मत्सरः परोत्कर्षासहनम् । सत्त्वमास्तिकत्वमिति । मूले विप्रकीर्णानामुपास्यादीनां प्रसङ्गान्तरासङ्करेण विविक्ततयैकत्र प्रतिपत्तिरिहावान्तरप्रयोजनम् । अत एवेदं प्रकरणमित्याख्यायते । यथाहुः

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥ इति ॥१॥

विष्णुप्रीत्यै चतुर्वर्गचिन्तामण्यामजीगणत् ।
भेदान् व्रतानां दानानां तीर्थानां मोक्षवर्त्मनाम् ॥२॥
मूर्तिप्रसादपूजानां हेमाद्रिर्गणकाग्रणीः ।

इह च स्वकर्तृकत्वेऽपि यदुराजमहामन्त्रिणा हेमाद्रिणाऽभ्यर्थितस्तत्-

---

1 अमरकोषः २।३।४१
2 अमरकोषः २।७।५७ ॥ २।८।१९
3 भागवतम् १।१।२

कर्तृकत्वं ख्यापितवान् । तदेवाह विष्णिवत्यादि । चतुर्णां धर्मादीनां वर्गश्चतुर्वर्गः । तत्रेष्टसमर्पको ग्रन्थश्चिन्तामणिः । मणिर्द्वयोरित्यभिधानात्[1] स्त्रीत्वम् । तस्यां हेमाद्रिर्व्रतादिभेदानजीगणत् । गणेर्णिजन्ताद्धेतुमण्णिच् । विद्वद्भिर्गणयामासेत्यर्थः । अन्यत्र स्थितानां व्रतादिवाक्यानां युक्तयाकृष्यैकत्र लेखनम् । न तु स्वयं निष्पादनमिति गणयतेरर्थः । व्रतादिभेदांश्च क्रमाद्व्रत-दानतीर्थमोक्षपरिशेषपूर्वेषु पञ्चसु खण्डेषु । मोक्षवर्त्मानि मोक्षोपायाः । मूर्तयः प्रतिमाः । प्रासादा देवकुलानि । गणकाग्रणीः गणकेषु देशकोषयोरायव्ययौ लिखत्सु अग्रणीर्मुख्यः ॥

विष्णुभक्तयङ्गभक्तानां गणयत्युक्तसारधीः ॥३॥
मुक्ताफलेन ग्रन्थेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यम्बुना मुग्धमार्कण्डेयशिशुश्रिया ॥४॥

विष्णवादीनाञ्चतुर्णां द्वन्द्वस्तेषां भेदानित्येव । ननु तादृशि लक्षत्रयसम्मिते ग्रन्थे कृतेऽपि किमपरमवशिष्टं यदर्थमस्यारम्भ इति । तत्राह । उक्तसारधीरिति । उक्तेभ्यो व्रतादिभ्यः सारे श्रेष्ठे विष्णवादिविषये धीर्यस्य स तथा ।

आप्लुतास्तीरमन्दारकुसुमोत्करवीचिषु ।
आकाशगङ्गास्रोतःसु दिङ्नागमदगन्धिषु ॥[2]

[3]नेयङुवङ्स्थानावित्यादिदर्शनाद्व्यधिकरणोऽपि बहुव्रीहिः । अयमर्थः । प्रथमं भगवत्प्रीत्यर्थमुच्चावचानि क्लेशभूयिष्ठानि सोपायानि अनैकान्तिकानि बहिरङ्गाणि व्रतदानादीनि तत्र गणितानि । ततस्तेष्वतुष्टस्तद्विलक्षणं मोक्षैकफलमुपायं प्रकटयितुमिदमचीकरत् ।

ननु व्रतादिभेदाश्चिन्तामणिना गणिता विष्णवादिभेदः पुनः केनेति तत्राह । मुक्तेति । ग्रन्थः सन्दर्भः सोऽस्मिन्नस्तीति ग्रन्थं प्रकरणम् । अर्शआदित्वादच् । यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत्सर्वमिहेति

---

1 अमरकोषः २।६।६३ 2 कुमारसम्भवम् ६.५
3 पाणिनिः ।४।४

हि वृत्तिकारः[1]। यद्वा ग्रन्थशब्दो नपुंसकेऽप्यस्ति। तथाहि पाणिनिना स्वकीये लिङ्गानुशासने[2] थोपध इत्यधिकृत्य काष्ठपृष्ठरिक्थोक्थानि नपुंसके। तीर्थ-प्रोथयूथग्रन्थानि नपुंसके चेत्युक्तम्। मुक्ता नाम वल्ली तस्याः फलं तेन।

गतः स कालो यत्रासीन्मुक्तानां जन्म वल्लीषु।
वर्तते साम्प्रतं तासां हेतवः शुक्तिसम्पुटाः ॥

इत्यादिदर्शनाद्वल्लीजमप्यस्ति मौक्तिकम्। यद्वा मुक्तास्फोटो मुक्ता तदीयं फलं [3]चतुर्थादनजातौ चेत्युत्तरपदलोपो भीमादिवत्। ग्रन्थपक्षे तु मुक्तानाम् अफलं प्राप्तोपेयत्वात्। ग्रन्थः संजल्पः काक्वा व्यञ्जनीयः। अर्थान्मुक्त्यर्थिनां फलदम्। यद्वा मुचां भावो मुक्ता सा फलं यत्र ग्रन्थे तत्तथा। तद्यथा मुमुक्षूणां फलदमित्यर्थः। ग्रन्थरत्नयोः साधर्म्यमाह सदिति। सती प्रशस्ता भागवतमेव शुक्तिर्जन्मस्थानं यस्य तत्तथा तेन। भक्तिर्भजनं कर्तुरनुरागः स एव स्वात्यम्बु यस्य तत्तथा तेन। यथा देशविशेषे स्वातिपयः शुक्तिसम्पुटेषु मूर्छितं मौक्तिकं भवति। तथानुराग एवास्य ग्रन्थाकारेण परिणत इत्यर्थः। कः पुनरस्यालङ्कार्य इति तमाह मुग्धेति। मुग्धो भ्रान्तः मार्कण्डेयो यस्मिन् शिशौ शिशुरूपे विष्णौ स तथा। तस्य धीः शोभा यस्मात्तत्तथा तेन। भाषितपुंस्कत्वाद्विभाषापुंवद्भावः[4]। मार्कण्डेयो हि हिमवति पुष्पभद्रातीरे भगवन्मायां दिदृक्षुरतिदीर्घं तपस्तप्यमानः कदाचित् प्रसन्नेन भगवता प्रकटितायां मायायां निखिललोकसंप्लवोदके मुहुर्मज्जनोन्मज्जनानि भजन्नकस्माद्वटपर्णसंपुटे शयानमतिसुन्दरं भगवद्बालमालोक्य प्रमुमोह। यो हि मुनिः पुञ्जिकस्थल्यादिविभ्रमेषु न बभ्राम सोऽप्यत्र मुग्ध इति शिशोः सुन्दरत्वमुक्तम्। तस्याप्येतदलङ्कार इत्यतिशयः। एकश्च मुक्ताफलं प्रायेण बालमलङ्करोतीति भङ्गिविशेषोक्तिः। यथा मौक्तिकं करकलितं हृदयार्पितं वा सर्वस्यात्मप्रसाधनाय तथेदमपीति रूपकार्थः ॥४॥

---

1 काशिकावृत्तिः (पाणिनिः ५।२।१२७)

2 लिङ्गानुशासनम् ७०।७१।७२

3 पा० ५।३।८२-वार्तिकम्

4 'इण्डिया-अफिस्'-ग्रन्थागारस्थ-हस्तलिखितग्रन्थानां सूच्यामुल्लिखिते ३५४२ संख्यक-ग्रन्थे भाषितपुंस्कत्वाद्विभाषाभाव इति पाठो दृश्यते।

मुक्ताफलं सुखचितस्फुटभक्तिभेद-
प्रत्यक्षराजितलसत्पदपद्मरागम् ।
हेमाद्रिसम्भवसुवर्णनिवेशरम्यं
कण्ठे कुरुध्वमवरुन्ध्वमपूर्वलक्ष्मीम् ॥५॥

नन्वेवमप्यन्येषु ग्रन्थेषु रत्नेषु च सत्सु किमनेनेति तत्राह ' मुक्तेति । सुष्ठु खचिताः सम्बद्धाः स्फुटभक्तिभेदाः प्रत्यक्षराजिता लसत्पदाः पद्मरागाः शोणरत्नानि यस्मिन् तत्तथा । स्फुटः स्पष्टो भक्तिभेदो रचनाविशेषो येषां पद्मरागाणां ते तथा । प्रत्यक्षा राजिता सौन्दर्यं येषां ते तथा । राजितेति क्तान्तं वा ' अत्यन्तकान्तिमन्त इत्यर्थः । तथा लसत् शोभमानं पदं स्थान-माश्रयो येभ्यस्ते तथा । हेमाद्रिर्मेरुस्तत्सम्भवं यत् सुवर्णं कनकं तस्य निवेशो निक्षेपः ' तेन रम्यमपूर्वम् । हेमाद्रिसम्भवत्वेन कनकस्य सुजातत्वमुक्तम् । तदेतदत्युज्ज्वलं सुखचितपद्मरागजाम्बूनदमौक्तिकं भगवता प्रसादीकृतमिव कण्ठे कुरुध्वम् । कर्तुः क्रियासामान्यवाचित्वादामुञ्चध्वम् । हे कुशला इति शेषः । आत्मनेपदाच्च क्रियाफलस्य कर्तृगामित्वम् । तदाह ' अवेति । अवरुन्ध्वम् आवृणुध्वम् । लक्ष्मीं शोभाम् । अपूर्वां रत्नान्तरसम्बन्धा-दननुभूताम् ।

अन्यत्र तु सुखेन अप्रयासेन चितैः सङ्गृहीतैः स्फुटैः परस्परविविक्तैः भक्तेर्भेदैः विहिताविहितादिभिः । प्रत्यक्षरम् अक्षरे अक्षरे । अजितस्य विष्णोः लसतोः शोभमानयोः पदपद्मयोश्चरणाम्बुजयो रागो रतिर्यस्मिन् ग्रन्थे तत्तथा । विस्पष्टं प्रदर्शितैर्भक्त्यादिभेदैरिह प्रत्यक्षरमीश्वराकारा मतिर्भवतीत्यर्थः । हेमाद्रिः पुरुषविशेषः ' तत्सम्भवानि तेनोच्चारितानि सुष्ठु सुरेखाणि यानि वर्णानि अक्षराणि तेषां निवेशनेन तत्र तत्रोचितस्थानेषु न्यासेन रम्यं सुश्लिष्टम् । वर्णग्रहणेन स्ववाक्यानां स्तोकत्वमुक्तम् । तत् कण्ठे कुरुध्वम् । कण्ठस्थं यथा स्यात्तथाऽभ्यस्यध्वमित्यर्थः । लक्ष्मीमात्मप्रसादरूपां शोभामपूर्वां ग्रन्था-न्तरैरलब्धाम् ॥५॥

तत्रादौ विष्णुप्रकरणम् ।

तत्र विष्णोर्लक्षणं भेदाश्च ।

अहमेवासमेवाग्रे नान्यद्यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥६॥

एवं श्लोकचतुष्केण पूर्वं रङ्गं विधाय प्रस्तुतमारभ्यते । तत्रेति । तत्र ग्रन्थे । आदौ उद्दिष्टक्रमानुरोधात् ।

विष्णुप्रकरणे च विष्णुः प्रतिपाद्यः । स च सामान्यविशेषावष्टब्धत्वाद् द्वेधा । तत्र सामान्यपूर्विका विशेषप्रतिपत्तिरिति सामान्यलक्षणं वक्तुमाह । तत्रेति । भेदा विशेषाः । अहमित्यादि । अहमेवेति कर्त्रन्तरस्य व्यावृत्तिः । आसमेवेति क्रियान्तरस्य । अग्रे मायासम्बन्धात् प्राक् । मायासम्बन्धेऽपि यत् सत् कार्यम् । असत् कारणम् । यच्च परं ताभ्यां परं प्रधानम् । तन्न मदन्यत् । मायासम्बन्धादस्त्येव त्रिधा विभक्त इत्यर्थः । पश्चान्मायावियोगादनन्तरमप्यहमेव । प्रपञ्चस्यादिमध्यावसानेष्वहमित्यर्थः । यच्चैतत् प्रपञ्चरूपं तदप्यहम् । अन्यत्र सिद्धं मयि आरोपितम् । यथान्यत्र सिद्धः सर्पो रज्जौ । एवं विवेचनाद्भ्रमे निवृत्ते योऽवशिष्येत सोऽहमस्मि । इदन्तया स्वरूपस्य निर्देष्टुमशक्यत्वादेवमुच्यते । एतेन यथा कटकादिष्ववस्थात्रयेऽपि सुवर्णत्वमेव सत्यं तथा जगदादिमध्यान्तेष्वनुस्यूतं सत्तामात्रं भगवत्स्वरूपमिति लक्षणार्थ इत्युक्तम् । न तावदस्यासम्भवः । सदेव सोम्येदमित्यादि[1] श्रुतिसिद्धत्वात् । न च कालाकाशादिष्वतिव्याप्तिः । तदुत्पत्तेः श्रुतत्वात् । विमतमनित्यं बाध्यत्वात् शुक्तिरूप्यवदित्यनुमानाच्च । नापि साकारेषु चतुर्ष्वव्याप्तिः । तेषामाकारतिरोहितत्वात् । तस्मान्निर्दोषं लक्षणम् ।

अत्र च प्रथमया वक्तुर्निर्देशः । द्वितीयया श्रोतुः । विष्णुर्ब्रह्माणम् । इह च श्लोकानां स्वस्वस्कन्धाध्याययोर्ज्ञानार्थं क्रमादङ्कन्यासः (भाग० २।९।३२) ॥६॥

---

1 छान्दोग्योपनिषत् ६।२।१

स द्वेधा निराकारः साकारश्च। अनवच्छिन्नचैतन्यं निराकारः। सत्त्वावच्छिन्नं चैतन्यं साकारः। स च चतुर्धा। रजस्तमोभ्यां युक्ते सत्त्वे पुरुषः। रजसा ब्रह्मा। तमसा रुद्रः। शुद्धे विष्णुरेव॥

एवं सामान्यलक्षणमुक्त्वा विशेषान् लक्षयितुमाह, स द्वेधेति। द्वेधात्वमेवाह निरेति। अनवच्छिन्ने वस्तुन्यवच्छेदक उपाधिराकारः, तेन रहितो निराकारः। तत्सहितोऽन्यः॥ तत्राद्यं लक्षयत्यनवच्छिन्नेति॥ सत्त्वेति द्वितीयं लक्षयति॥ अस्यैव भेदानाह, स चेति। स साकारः॥ तत्राद्यं भेदमाह, रजस्तमोभ्यामिति। तुल्याभ्यां रजस्तोमाभ्यां युक्ते सत्त्वे प्रतिफलितं चैतन्यं पुरुषशब्दार्थ इति पूरणीयम्। एवमुत्तरत्र। रजस्तमोभ्यामिति तृतीयया तयोरप्राधान्यम्, सहयुक्तेऽप्रधाने[1] इति स्मरणात्। तेन पुरुषे सत्त्वं बहुलं रजस्तमश्च तदपेक्षया न्यूनमित्यर्थः। न तु त्रीणि समान्येव, त्रिसाम्यस्य प्रकृतिलक्षणत्वात्। स्तोकाधिकभावश्चैषां कार्यगम्यो न तु माषादिमूर्तद्रव्यवत् प्रत्यक्षः। युक्तग्रहणं द्वयोर्वर्तते। सत्त्वग्रहणं त्रिषु॥ द्वितीयं भेदमाह, रजसेति। रजसा युक्ते सत्त्वे ब्रह्मा। अत्र च मात्रया विद्यमानमपि तमो रजसः प्राधान्यं वक्तुं नोक्तम्। न तु तन्नास्त्येव, तत्कार्यस्योपलम्भात्। तृतीया तु प्राग्वत्। तेन ब्रह्मणि तमः स्तोकं तदपेक्षया रजः प्रभूतमित्यर्थः। रजसः प्रागुक्तिः सत्त्वापेक्षया हेयत्वात्, तुर्यप्रकरणानुरोधाच्च॥ तृतीयं भेदमाह, तमसेति। अत्र रजोमात्रानुरोधादिकं प्राग्वत्॥ चतुर्थमाह, शुद्धे विष्णोरिति। शुद्धे रजस्तमोभ्यामस्पृष्टे सत्त्वे विष्णुरेव। विष्णुसंज्ञैव क्रियते, न तु तन्त्रान्तरवत् संज्ञान्तरमित्येवशब्दार्थः। तथाहि—तमेनं विशुद्धोर्जितसत्त्वाकारं सदाशिव इत्याचक्षते शैवाः, पशुपतिरिति पाशुपताः, पुरुषोत्तम इति पाञ्चरात्राः, आदिविद्वान् सिद्ध इति सांख्याः, ईश्वर इति पातञ्जलाः। इह तु तस्य विष्णुसंज्ञैव।

---

1 पाणिनिः २।३।१९

यद्वा 'विष्णुं पञ्चात्मक'मित्यत्र पञ्चानामपि विष्णुसंज्ञामुक्त्वा चतुर्णां संज्ञान्तर-मप्युक्तम्। शुद्धसत्त्वोपाधिस्तु विष्णुसंज्ञा एवेत्येवशब्दार्थः। ते च ब्रह्मविष्णुरुद्राः प्रत्येकमाधिदैविकादिभेदात्त्रेधा ॥

अगोचरस्य गोचरत्वे हेतुः प्रकृतिगुणः सत्त्वम्। गोचरस्य बहुरूपत्वे रजः। बहुरूपस्य तिरोहितत्वे तमः। तथा परस्पर-मुदासीनत्वे सत्त्वम्। उपकारित्वे रजः। अपकारित्वे तमः॥

एवमुपाधिसंभेदात् पञ्चरूपतामुक्त्वा इदानीमननुसंहितोपाधेरुपहितप्रत्यया-योगादुपाधीन् लक्षयति ' अगोचरेति। अगोचरस्याविषयभूतस्य वस्तुनो गोचरत्वे विषयीभावे हेतुर्यः प्रकृतिगुणः तत्सत्त्वमित्यर्थः। हेतुः प्रकृतिगुण इत्युत्तरत्र पञ्चस्वनुवर्तते। गोचरस्य सतो यत्सम्बन्धान्नानात्वं तद्रजः। तस्यैव तिरोहितत्वे कारणात्मनाऽवस्थाने हेतुस्तम इत्यर्थः। विनाशे इत्यनुक्त्वा सत्कार्यपक्षाश्रयणात् तिरोहितत्व इत्युक्तम्। एवमाधिदैविकोपाधिस्वरूपमाह तथेति। अयमर्थः। परस्परमुदासीनमित्रद्विषत्सु उदासीनत्वे हेतुः सत्त्वम्। इतरे स्पष्टे। आधिदैवाध्यात्मिकोपाधिलक्षणादधिभूतोपाधिस्वरूपमपि लक्षितम्। येन ह्येकस्मिन् वस्तुनि द्विरूपो विच्छेदोऽसावाधिभौतिकः। तदुक्तं

योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः।
यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः॥[1]

ततश्च परिशेषे सिद्धमिति नेहोक्तमिति भावः॥

गोचरत्वादीनि स्थितिसृष्टिसंहाराः॥

उक्तान् गोचरत्वादीनुपाधीन् उन्मीलयितुमाह ' गोचरेति। गोचरत्वबहुरूपत्वतिरोहितत्वानि क्रमात् स्थित्यादिशब्दैरुच्यन्त इत्यर्थः। न चैवं सृष्ट्यनन्तरं स्थितिरिति शङ्क्यम् ' स्थितिपूर्व-

---

1 भागवतम् २।१०।८

त्वात् सृष्टेः । स्थिता हि मृदादयो घटाद्यात्मना सृज्यन्ते नास्थिता इति । अत एवोक्तम् ।

स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ।
सर्गाय रक्तं रजसोपबृंहितं कृष्णञ्च वर्णं तमसा जनात्यये ॥[1]

इत्येवमाध्यात्मिकेष्वपीत्याह ।

उदासीनत्वादीनि च ॥

उदासीनेति । अयमर्थः । यदिदं चैत्रादेरुपकारापकारवैधुर्य्येणावस्थानं सा स्थितिः । उपकारकत्वेन सृष्टिरपकारकत्वेन तु संहारः । ततश्च जगत्स्थित्यादि-हेतव आधिदैविका अन्ये त्वाध्यात्मिकाः सुरनरादयः । अवताराश्च सर्वे विना कृष्णम् । स तु पुरुषः त्रिविक्रमावतारत्वात् । यथोक्तम् ।

तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ।
उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ॥[2]

इति । अत एव तत्र तत्र विश्वरूपप्रकटनं पूर्वावतारदेशवात्सल्यञ्च । दृश्यते चाद्यापि कुशस्थलीमूर्तौ त्रैविक्रमं चिह्नं कृष्णव्यपदेशश्च । अत एव प्रह्लाद-संहितायां द्वारकामाहात्म्ये तृतीयेऽध्याये वैकुण्ठमलङ्करिष्यता भगवता सकलं निजं तेजस्तस्यां मूर्तौ विन्यस्तमिति दर्शितम् । तथाहि

यत्र त्रैविक्रमी मूर्तिर्विहते यत्र गोमती ।
नरा मुक्तिं प्रयास्यन्ति चक्रतीर्थेन सङ्गताः ॥
कलेवरं परित्यक्तं प्रभासे हरिणा तदा ।
कलाभिः सहितं तेजस्तस्यां मूर्तौ निवेशितम् ॥

---

1 भागवतम् १०।३।२०　　2 भागवतम् १०।३।४२

तस्मात् कलियुगे विप्रा नान्यत्र प्राप्यते हरिः ।
यदि कार्यं हि कृष्णेन तत्र गच्छत मा चिरम् ॥

इति । तथाच

आदौ त्रिविक्रम इति ख्यातिरासीन्महीतले ।
कृष्णस्य तु कलान्यासात् कृष्ण इत्यभिधीयते ॥

इति । यत्तु सत्त्वं विशुद्धमित्यादिना शुद्धसत्त्वता संकीर्तनं तत् सत्त्वभूयस्त्वविषयम् । न तु यथाश्रुतमेव गुणान्तरकार्यस्याप्युपलम्भात् । तत्र तदसत्यमन्यत्र तु वास्तवमिति तु भक्तिमात्रम् । तस्मात् पुरुष एवायमिति सन्तोष्टव्यं निष्कष्टव्यञ्चेदमुपरिष्टात् । यथा चैता ब्रह्मादिमूर्तयो गुणमूलास्तथा हास्यादयो रसाश्च तन्मूला एवेत्युपरिष्टात् प्रवेदयिष्यामः । किं बहुना तत्रितयतारतम्यवैचित्र्याक्रान्तमिदं विश्वम् । तदुक्तम्

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥[1]

इति ॥

तेषु विष्णुब्रह्मरुद्रा निमित्तम् पुरुष उपादानम् । गोचरत्वे तु चैतन्यम् । एवं पञ्च भेदाः । तत्र निराकारः ॥

एवमुपाधिस्वरूपं निर्धार्योपहितेषु संख्याविशेषस्योपयोगमाह तेष्विति । तेषु स्थितिसृष्टिसंहारेषु विष्ण्वादयः क्रमान्निमित्तम् ।

कुलाल इव घटस्य पुरुष उपादानं समवायिकारणं घटस्येव मृत् । दृष्टा च कारणद्वयपूर्विका कार्यप्रकृतिः । असमवायिकारणन्तु निमित्तान्तरगतमेवेति पृथङ्नोक्तम् । अत एव अन्वयादितरतश्चेति[2] प्रथमश्लोके द्वयमेवोपात्तम् । गोचरत्वे प्रतीतिविषयत्वे तु निर्विशेषचैतन्यं हेतुः । तस्य भासा सर्वमिदं विभाति[3] इति श्रुतेः । तच्च स्थित्यादिनिमित्तार्थं त्रय-

1 गीता १८।४० श्लो: ।
2 भागवतम् १।१।१ श्लो: ।
3 मुण्डकोपनिषद् २।१० श्लो: ।

उपादानार्थश्चैको गोचरत्वार्थमन्यश्चेति। विष्णुं पञ्चात्मकमित्यत्र लयश्चैवोक्ता न न्यूनाधिका इत्यभिप्रेत्याह। एवमिति। न चैवमेकः सामान्यात्मा विशेषरूपाश्च पञ्चेति षट्कमाशङ्क्यं विशेषपरिहारे सामान्यस्यानवस्थानात्। एवं तावत् पञ्च वस्तूनि स्वयं लक्षयित्वा तदेव ग्रन्थारूढेन लक्षणेन द्रढयितुमाह तत्रेति। निराकार इति। निराकारस्य लक्षणं कथ्यत इत्यर्थः॥

न यत्र कालोऽनिमिषां परः प्रभुः
कुतोऽनुदेवा जगतां य ईशिरे।
न यत्र सत्त्वं न रजस्तमश्च
न वै विकारो न महान् प्रधानम् ॥७॥
परं पदं वैष्णवमामनन्ति तद्-
यन्नेति नेतीत्यतदुत्सिसृक्षवः।
विसृज्य दौरात्म्यमनन्यसौहृदा
हृदोपगूह्यार्हपदं पदे पदे ॥८॥

तत्रापि न यत्रेति तटस्थस्य। परं पदमिति स्वरूपस्य। तत् परं पदं वैष्णवमामनन्ति। विष्णुनाधिष्ठितेन राजाधिष्ठितवत्। ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात् परमित्युक्तम्। विष्णुनैवाधिष्ठितमित्यर्थः। यत्र पदे कालो नास्ति। योऽनिमिषां ब्रह्मादीनां परः प्रभुः संहर्ता। महाप्रलयेऽपि नाशो नास्त्येवेत्यर्थः। अत एव कालाभावे किं पुनर्न्यायेन देवा अपि तत्र न सन्तीत्याह कुतोऽन्विति। तथा देवाभावे जीवा अपि न सन्तीत्याह जगतामिति। ये देवा जगतामुच्चावचां गतिं गच्छतां जीवानामीशाः। तेषां वार्ता तत्कृतविघ्नगन्धोऽपि नास्तीत्याह। ईशिरे इत्यनित्यत्वद्योतनार्थं लिट्प्रयोगः।

यत्र च पदे सत्त्वादिर्नास्ति। सत्त्वमिन्द्रियदेवतारूपम्। रज इन्द्रियम्। तम इन्द्रियार्थरूपम्। निराकारोऽहङ्कारः। तेषां त्रयाणां कारणं महान् बुद्धितत्त्वम्

तदहङ्कारस्य । प्रधानमव्यक्तम् तन्महतः । सत्त्वाद्यभावादेतत् प्राप्तवतां पुनर्जन्मादिशङ्काबीजलेशोऽपि नास्तीत्यर्थः ।

एवं दुःखं नास्तीत्युक्त्वा सुखमस्तीत्याह यन्नेतीति । यद् विष्णुपदं हृदा मनसा उपगूह्याश्लिष्य अनन्यसौहृदा भवन्ति अन्यत्र विषये प्रीतिं परित्यजन्ति तादृक्सुखाभावात् । तद्धि पदे पदे क्षणे क्षणे अर्हपदं अर्हणस्यादरस्य स्थानम् उत्तरोत्तरचमत्करणीयत्वात् । दौरात्म्यं विसृज्यानादिदुर्वासनावासितत्वं त्यक्त्वा विषयान्तरस्मृतिरपि नास्तीत्यर्थः । [1]नेतिनेतीत्युपनिषदुपदेशविश्वासबलात् । अतत् विष्णुपदादन्यत् । उत्सिसृक्षवः स्वेच्छयैवोत्स्रष्टवन्तः । नित्यनिरतिशय-सुखानुभवरूपेऽनुभविता अनुभवनमनुभवनीय इति कर्तृकरणकर्मण्यतच्छब्दे-नोच्यन्ते । तानि ह्यनुभवार्थमुपादीयन्ते । सत्यनुभवे तु त्यज्यन्ते असत्यत्वा-दन्तरायत्वाच्च । (भाग० २।२।१७—१८) ॥७-८ ॥

इत्थं मुनिस्तूपरमेद्व्यवस्थितो
विज्ञानदृग्वीर्यसुरन्धिताशयः ॥९॥

एवमस्य द्विविधं लक्षणमुक्त्वाऽत्राधिकारिणमाह । इत्थमिति । इत्थं व्यव-स्थितः अनेन प्रकारेण व्यवस्थामापन्नो मुनिरुपरमेद् न किञ्चित् कुर्यात् । यतो विज्ञानस्य विशुद्धज्ञानरूपस्य विष्णोर्दृग्दर्शनं साक्षात्कारः । तस्य वीर्यं बलं तेन सुरन्धितो यथा पुनर्नोदेति तथा हिंसित आशयो जीवत्वोपाधिर्येन स तथा । अयमर्थः । वक्ष्यमाणभूमिकोपासनाक्रमबलात् सत्त्वपुरुषान्यताख्याति-मापन्नास्तामपि सायुज्यार्थी निरोद्धुकाम इत्येतामवस्थामापन्नो मुनिरत्राधि-क्रियते नान्यः । अवश्यञ्चाधिकारिनिर्धारणार्थमित्थमित्यादि ज्ञेयम् । अन्यथा-स्योद्धरणं निष्प्रयोजनं स्यात् । शुकः राजानं प्रति । (भाग० २।२।१९) ॥९॥

1 बृहदारण्यकोपनिषद् २।३।६

पुरुषः ।

भूतैर्यदा पञ्चभिरात्मसृष्टैः
पुरं विराजं विरचय्य तस्मिन् ।
स्वांशेन विष्टः पुरुषाभिधान-
मवाप नारायण आदिदेवः ॥१०॥

पुरुषलक्षणमाह भूतैरित्यादि । आत्मसृष्टैरात्मना प्रकृतिमधिष्ठाय सृष्टैः पुरं देहं विराजं ब्रह्माण्डं विरचय्य निष्पाद्य तस्मिन् स्वांशेन जीवकलया यदा प्रविष्टः तदा पुरुषसंज्ञामवाप । पुरि शयनाद्वसनाद् वा पुरुषः । अनंशेऽप्यंशोक्तिकल्पनया । नारायणो जलशायी । आदिदेवो निराकारः । (भाग० ११।४।३) ॥१०॥

यत्काय एष भुवनत्रयसन्निवेशो
यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि ।
ज्ञानं स्वतः श्वसनतो बलमोज ईहा
सत्त्वादिभिः स्थितिलयोद्भव आदिकर्ता ॥११॥

एवं तटस्थं लक्षयित्वा स्वरूपं लक्षयति यत्काय इति । एष दृश्यमानो भुवनत्रयस्य सन्निवेशो यथायथं स्थितिः । यस्येन्द्रियैः दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापतिभिः । तनुभृतां शरीरिणाम् । उभयानि ज्ञानकर्मभेदात् इन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थाः । स्वतः स्वस्मात् तत्स्वरूपादिति यावत् । ज्ञानम् यस्य श्वसनतः प्राणाद्बलं ज्ञानेन्द्रियाणां पाटवम् । ओजो मनश्च । ईहा कर्मेन्द्रियाणाम् । स सत्त्वादिभिर्विशिष्टः । स्थित्यादौ आदिकर्ता प्रथमकारणमुपादानत्वात् । विष्ण्वादयस्तु पश्चात् कर्तारो निमित्तत्वात् । (भाग० ११।४।४) ॥११॥

ब्रह्मविष्णुरुद्राः ।

आदावभूच्छतधृती रजसाऽस्य सर्गे
विष्णुस्थितौ क्रतुपतिर्निजधर्मसेतुः ।

रुद्रोऽप्यये च तमसा पुरुषः स आद्य

इत्युद्भवस्थितिलयाः सततं प्रजासु ॥१२॥

एवं निराकारपुरुषौ लक्षयित्वा ब्रह्मादिलयं लक्षयति ब्रह्मेति। स प्रागुक्तः पुरुषः। आदौ शतधृतिर्ब्रह्माऽभूत्। रजसा उपाधिना। सर्गे निमित्ते। स एव स्थितौ विष्णुः सत्त्वेनेत्यर्थसिद्धम्। स्थितिकर्तृत्वञ्च सन्निधिमात्रेण धर्मप्रवृत्तिहेतुत्वात्। तदाह क्रतिविति। क्रतुः श्रौतो धर्मः। निजः पाञ्चरात्रादिस्थः। सेतुर्विधारकः। स एव तमसा रुद्रः। अप्ययः प्रलय इति एवंविधाः सृष्ट्यादयः स्युः। सततं प्रतिदिनं प्रतिकल्पञ्च ब्रह्मरुद्रयोरनुक्रमपि सत्त्वं लभ्यते। केवलयोस्तु रजस्तमसोरस्वच्छत्वेन प्रतिविम्बायोग्यत्वात्। अतएव सत्त्वेन विष्णुरिति नोक्तम्। द्रुमिलः निमिम्। (भाग० ११।४।५) ॥१२॥

पुरुषरूपम्।

तद्वामनं रूपमवर्धताद्भुतं

हरेरनन्तस्य गुणत्रयात्मकम्।

भूः खं दिशो द्यौर्विवरा पयोधय-

स्तिर्यङ्नृदेवा ऋषयो यदासत ॥१३॥

एवं लक्षितानि पञ्च वस्तूनि। तत्र चतुर्णां ध्यानसिद्धये रूपाणि यथायथं वाच्यानि। तत्रादौ निर्विषयस्य मुमुक्षोः समीहितसिद्धौ सम्यञ्चमुपायमीक्षमाणस्य विश्वरूपधारणाख्यप्रथमभूमिकोपासनां वक्तुं पुरुषरूपमाह पुरुषेति। तद्लब्धप्रतिग्रहम्। वामनं खर्वम्। अद्भुतं यथा स्यात्तथा। ननु खर्वञ्चेत् परिच्छिन्नं स्यान्नेत्याह अनन्तस्येति। अनन्तत्वे वृद्धिः कथम् तत्राह गुणेति। गुणोपाधिकमित्यर्थः। यद् यस्मिन् भ्वादयो दश आसत अदृश्यन्त। द्यौः स्वर्गः। विवराः पातालानि। (भाग० ८।२०।२१) ॥ १३ ॥

काये बलिस्तस्य महाविभूतेः
सहर्त्विगाचार्यसदस्य एतत् ।
ददर्श विश्वं त्रिगुणं गुणात्मको
भूतेन्द्रियार्थाशयजीवयुक्तम् ॥१४॥

अत्राधिकारिणमाह काय इति । विभूतिरैश्वर्यम् । ऋत्विजो यज्ञकृतः । आचार्या मन्त्रव्याख्याकृतः । सदस्या उपदेष्टारः । तैः सहितः । एतत् सर्वं प्रत्यक्षम् । भूतानि महान्ति पञ्च । इन्द्रियाणि दश । अर्थाः पञ्चतन्मात्राणि । आशयाः मनोबुद्धिरहङ्कारश्चित्तञ्चेति चत्वार्यन्तः-करणानि । जीवः पुरुषः । एभिर्युक्तं पञ्चविंशतितत्त्वात्मकमपश्यदित्यर्थः । ददर्शेति सिद्धवदुक्तेर्भगवत्प्रसादाद्दिव्यं चक्षुरस्यानुमेयम् । ननु सर्वस्वेन भजतो बलेः किं न तात्त्विकरूपोपलब्धिः । तत्राह । गुणात्मकः अद्याप्यक्षीय-माणगुणत्रयः । एतेनान्योऽपि त्रैगुण्यग्रथितचित्तोऽत्राधिकारीत्युक्तम् । (भाग० ८।२०।२२) ॥२४॥

रसामचष्टाङ्घ्रितलेऽथ पादयो-
र्महीं महीध्रान् पुरुषस्य जङ्घयोः ।
पतत्रिणो जानुनि विश्वमूर्ते-
रुर्वोर्गणं मारुतमिन्द्रसेनः ॥१५॥

एवं सामान्येन रूपमुक्त्वा यदत्र चिन्त्यन्तदाह रसामिति । रसां पातालम् । अचष्ट अपश्यत । अङ्घ्र्योस्तलेऽधः । अथशब्दः सर्वत्र वाक्य-भेदार्थं योज्यः । पादयोरुपरीत्यर्थः । महीध्रान् पर्वतान् । पतत्रिणः पक्षिणः । जानुनि जानुदेशे । मारुतं गणम् आवहादीनां मरुतां स्तोमम् । इन्द्रसेनो बलिः । (भाग० ८।२०।२३) ॥१५॥

सन्ध्यां विभोर्वाससि गुह्य ऐक्षत्
प्रजापतीन् जाघन आत्ममुख्यान् ।
नाभ्यां नभः कुक्षिषु सप्तसिन्धू-
नुरुक्रमस्योरसि ऋक्षमालाम् ॥१६॥

विभुर्व्यापी । जघनमेव जाघनम् । आत्ममुख्यान् दैत्यानित्यर्थः । कुक्षिषु कुक्षिप्रदेशेषु कुक्षेरेकत्वेन बहुवचनायोगात् । उरुर्महान् क्रमणं यस्य स तथा । ऋक्षमालां नक्षत्रपङ्क्तिम् । (भाग० ८।२०।२४) ॥१६॥

हृद्यङ्ग धर्मं स्तनयोर्मुरारे-
र्ऋतञ्च सत्यञ्च मनस्यथेन्दुम् ।
श्रियञ्च वक्षस्यरविन्दहस्तां
कण्ठे च सामानि समस्तरेफान् ॥१७॥

अङ्गम् अहोरूपाद्भुतश्रवणस्तिमितचित्तं राजानमुद्बोधयति शुकः । अङ्गेति । धर्मं स्मृत्यादिसिद्धम् । श्रौतस्य तु यज्ञग्रहणेन ग्रहणात् । ऋतं यथार्थं वाक्यम् । सत्यं भूतहितप्रोक्तं ऋतमुक्तं यथार्थवागित्युक्तेः । यद्वा ऋतं सूनृतम् । सत्यं समदृष्टिः । सत्यञ्च समदर्शनम् ' ऋतञ्च सूनृता वाणीत्युक्तेः[1] । अरविन्दहस्तामित्यनेन सर्वतत्त्वानां मूर्तत्वं ज्ञेयम् । रेफाः स्तोभाक्षराणि । (भाग० ८।२०।२५) ॥१७॥

इन्द्रप्रधानानमरान् भुजेषु
तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि ।
केशेषु मेघान् श्वसनं नासिकाया-
मक्ष्णोश्च सूर्यं वदने च वह्निम् ॥१८॥

भुजेषु अष्टासु इन्द्रादीनष्टौ । (भाग० ८.२०।२६) ॥१८॥

---

1 भाग०११।१९।३७३८

वाण्याञ्च छन्दांसि रसे जलेशं
भ्रु वोर्निषेधञ्च विधिञ्च पक्ष्मसु ।
अहश्च रात्रिञ्च परस्य पुंसो
मन्यु ललाटेऽधर एव लोभम् ॥१६॥

छन्दांसि वेदान् । वेदत्वाविशेषेऽपि सामवेदस्य कण्ठ्यत्वमन्तरङ्गत्वार्थम् । तच्च वेदानां सामवेदोऽस्मीत्युक्तत्वात्[1] । चकाराद्गायत्र्यादीनि सप्तधातुषु । रसे रसनेन्द्रिये । जलेशं वरुणम् । भ्रुवोर्विधिनिषेधावाज्ञारूपौ । पक्ष्मसूर्ध्वाधःस्थितेष्वक्षिलोमसु । अहोरात्रिञ्च । मन्युं रुद्रम् । एवशब्दस्तत्त्वानां स्थाननियमार्थः प्रत्येकं योज्यः (भाग० ८।२०।२७) ॥१६॥

स्पर्शे च कामं नृप रेतसाम्भः
पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ।
छायासु मृत्यु हसिते च मायां
तनूरुहेष्वोषधिजातयश्च ॥२०॥

हे नृप । रेतसा रेतसि । आर्षो व्यत्ययः । [2]सुपामित्याकारो वा । क्रमणेषु पादविक्षेपेषु । छायासु करादीनाम् । हसिते हसने । तनूरुहेसु रोमसु । ओषधिजातयः ओषधीः जातीः (भाग० ८।२०।२८) ॥२०॥

नदीश्च नाडीषु शिलानखेषु
बुद्धावजं देवगणानृषींश्च ।
प्राणेषु गात्रे स्थिरजङ्गमानि
क्षणार्धमात्रेण विवृद्धमूर्तेः[3] ॥२१॥

बुद्धौ अजं ब्रह्माणम् । देवादीन् प्राणेषु अनुक्तेष्विन्द्रियेषु । गणाः प्रमथाः । किं बहुना गात्रे देहे स्थिरजङ्गमानि (भाग० ८।२०।२९) ॥२१॥

---

1 गीता १०।२२ 2 पाणिनिः ७।१।३९
3 पादस्यैतस्य स्वामिसम्मतपाठस्तु सर्वाणि भूतानि ददर्श वीरः ।

सर्वात्मनीदं भुवनं निरीक्ष्य
सर्वे सुराः कश्मलमापुरङ्ग ।
सुदर्शनं चक्रमसह्यतेजो
धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ॥२२॥

कश्मलं मोहम् । एवं ध्यानार्थं मूर्तिमुक्त्वा आयुधान्याह सुदर्शनमिति । [1]सुदर्शनं मनस्तत्त्वमिति सहस्रनामभाष्ये । धनुरिन्द्रियाहङ्काररूपं चकारा-च्चित्तस्वरूपं पद्मञ्च । तच्च त्रैलोक्याख्यमिति विष्णुधर्मोत्तरे । स्तनयित्नुर्मेघः (भाग० ८।२०।३०) ॥२२॥

पर्जन्यघोषो जलजः पाञ्चजन्यः
कौमोदकी विष्णुगदा तरस्विनी ।
विद्याधरोऽसिः शतचन्द्रयुक्त-
स्तूणोत्तमावक्षयसायकौ च ॥२३॥

पर्जन्यो गर्जन्मेघः । जलजः शङ्खः । स तु भूताद्यहङ्कारः । कौमोदकी तु बुद्धिः । तरस्विनी वेगाढ्या बलिष्ठा च । असिर्नन्दकः । विद्याधरः सर्वविद्यामयत्वात् । शतचन्द्रं फलकम् । शतचन्द्राः चन्द्राकाराणि विम्बानि यस्मिन् तत्तथा । एतच्च तमोमयम् । तूणोत्तमौ तु कर्ममयौ । सायकाः शराः । ते त्विन्द्रियरूपाः । ततश्चक्रशङ्खौ गदापद्मौ खड्गफलके धनुस्तूणौ चेत्यूर्ध्वदक्षिणादिक्रमेण द्वयोर्द्वयोर्बाह्वोश्चिन्त्यं यथेच्छं वा । एवमष्टौ भुजाः (भाग० ८।२०।३१) ॥२३॥

सुनन्दमुख्या उपतस्थुरीशं
पार्षदमुख्याः सहलोकपालाः ॥२४॥

अथ परिवारदैवतान्याह सुनन्देति । मुख्यशब्दात् सुनन्द-जय-विजय-प्रबलो-द्बल-कुमुद-कुमुदाख्य-विश्वक्सेन-श्रुतदेव--जयन्त-सात्वत--पुष्पदन्त--प्रचण्ड-

---

1 विष्णुसहस्रनामभाष्ये एकसप्ततितमश्लोकोद्धृतवचनम् ।

बल-महाबलार्हणानां सप्तदशानां ग्रहणम्। एते च भगवत्स्वरूपा एव विना श्रीगरुडकौस्तुभान्। ते उपतस्थुः निकटीभूय सेवाश्चक्रुः। सहलोकपाला इति समासेन लोकपालानामप्राधान्यं दर्शयति। तेन ते बहिः परिधौ पूज्याः। पार्षदास्त्वन्तःपरिधाविति (भाग० ८।२०।३२) ॥२४॥

स्फुरत्किरीटाङ्गदमीनकुण्डलः
श्रीवत्सरत्नोत्तममेखलाम्बरैः।
मधुव्रतस्रग्वनमालयावृतो
रराज राजन् भगवानुरुक्रमः ॥२५॥

एवं मूर्तिवैपुल्येन विक्षिप्तं ध्यातृचित्तमेकाग्रयति स्फुरदिति। किरीटादीनां सप्तानां द्वन्द्वः। किरीटं मुकुटम्। तच्च पारमेष्ठ्यम् पदम्। मीनो मकरः। तदाकारे रेखाङ्किते कुण्डले च सांख्ययोगौ। श्रीवत्सो भृगुपदन्यासः। रत्नोत्तमः कौस्तुभः। स तु आत्म-ज्योतिः। तत्प्रभा तु श्रीवत्सः। अम्बरं वस्त्रम्। तच्च छन्दोमयम्। मधुव्रतैर्युक्ता स्रक् वैजयन्ती यस्य स तथा। शाकपार्थिवादित्वादुत्तरपदलोपः[1]। स्रक् च भूततन्मात्ररूपा। वनमाला त्वापादलम्बिनी। सा योगमाया कीर्तिमयी वा। मधुव्रताः सनकादयः। एतच्च सर्वं द्वादशे। भगवान् भजनीयसौन्दर्यादिगुणवान्। (भाग० ८।२०।३२-३३) ॥२५॥

क्षितिं पदैकेन बलेर्विचक्रमे
नभः शरीरेण दिशश्च बाहुभिः।
पदं द्वितीयं क्रमतस्त्रिविष्टपं
न वै तृतीयाय तदीयमण्वपि ॥२६॥

एवं विश्वात्मके भगवद्रूपे मनः प्रणिधाय तद्व्यापारे जगदनुग्रहलक्षणे

---

1 पाणिनिः २।१।६० (वार्त्तिकम्)।

प्रणिदध्यादित्याह क्षितिमिति। क्षितिं भूलोकं पदा पादेन। बलेः सम्बन्धिनं नभो भूर्लोकं क्रमतः क्रमेण द्वितीयं पदं त्रिविष्टपं स्वर्गलोकं विचक्रमे। अत्र उरुक्रमस्येत्युत्तरवाक्यादेव तत्प्रतिपत्त्यर्थमाकृष्यते। तृतीयाय पदाय। तदीयं बलिसत्ताकम् (भाग० ८।२०।३३-३४) ॥२६॥

उरुक्रमस्याङ्घ्रिरुपर्युपर्यथो
महर्जनाभ्यां तपसः परङ्गतः ॥२७॥

उरुक्रमस्येति। अथो स्वर्लोकप्राप्त्यनन्तरं अङ्घ्रिरुपर्युपरि गच्छन् महर्जनाभ्यां तपसश्च परं सत्यलोकं गत इत्यर्थः। (भाग० ८।२०।३४) ॥२७॥

सत्यं समीक्ष्याब्जभवो नखेन्दुभि-
र्हतस्वधामद्युभिरावृतोऽभ्यगात्।
मरीचिमिश्रा ऋषयो बृहद्व्रताः
सनन्दनाद्या नरदेव योगिनः।
वेदोपवेदा नियमा यमान्विता-
स्तर्केतिहासाङ्गपुराणसंहिताः ॥२८॥

सत्यमिति। अब्जभवो ब्रह्मा। सः सत्यलोकस्वामी। इत्यन्तः सप्तलोकक्रमितारं त्रिविक्रमाङ्घ्रिम्। त्यक्तचौर्येकार्थे हतस्वधामद्युभिः तिरस्कृतस्वर्लोकदीप्तिभिः नखेन्दुभिः समीक्ष्य हरिचरणोऽयमित्यवधार्यात एवावृतः मरीचिमिश्रो मिलितो येषु ते तथा। तत्सहिता इत्यर्थः। ऋषयः सत्यवाक्याः। बृहद्व्रता ब्रह्मचारिणः। हे नरदेव। योगिनो निरुद्धचित्तवृत्तयः। वेदा ऋगादयः। उपवेदा आयुर्वेद-गन्धर्वधनुर्वेदाः। नियमाः शौचादयः पञ्च[1]। यमा अहिंसादयश्चत्वारः[2]। तर्काः षट्। इतिहासाः पुरावृत्तानि। अङ्गानि

---

1 शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। पातञ्जलम् ॥ २।३२। ॥

2 अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। पातञ्जलम् ॥ २।३० ॥

व्याकरणादीनि षट्। पुराणानि सर्गादिलक्षणानि। संहिताख्रिवर्गशास्त्राणि। वेदाद्यधिष्ठात्र्यो देवताश्चागता इत्यर्थः (भाग० ८।२१।१-२) ॥२८॥

ये चापरे योगसमीरदीपित-
ज्ञानाग्निना रन्धितकर्मकल्मषाः।
ववन्दिरे यत्स्मरणानुभावतः
स्वायम्भुवं धामगता अकर्मकम् ॥२६॥

योगसमीरेण समाधिवायुना सन्दीपितः सन्धुक्षितो ज्ञानाग्निः। तेन रन्धिते पक्के कर्मकल्मषे पुण्यपापे यैस्ते तथा। रन्धितेति सापेक्षत्वेऽपि समासः। आर्षोऽलुग् वा। ज्ञानाग्निदग्धपुण्यपापा जीवन्मुक्ता इत्यर्थः। ते सर्वे तमग्निं ववन्दिरे। यस्य स्मरणमाहात्म्याद्ब्राह्मपदं प्राप्ताः तद्धि अकर्मकम्। न तत्र सुखानुभवादन्यत् क्रियते। न यत्र शोको न जरा न मृत्युरित्याद्युक्तत्वात् (भाग० ८।२१।२-३) ॥२६॥

अथाङ्घ्रये प्रोन्नमिताय विष्णो-
रुपाहरत् पद्मभवोऽर्हणोदकम्।
समर्च्य भक्त्याऽभ्यगृणच्छुचिश्रवा
यन्नाभिपङ्केरुहसम्भवः स्वयम् ॥३०॥

अथ मरीच्यादिवन्दनानन्तरम्। प्रोन्नमिताय प्रोर्ध्वकृताय। अर्हणोदकमर्घ्यम्। भक्त्या तात्पर्येण अभ्यगृणात् श्रुतवान्। शुचिश्रवाः अमलकीर्त्तिः। यन्नाभीति पितृत्वादपि अस्योचिता अर्चा इत्यर्थः (भाग० ८।२१।३) ॥३०॥

धातुः कमण्डलुजलं तदुरुक्रमस्य
पादावनेजनपवित्रतया नरेन्द्र।

स्वर्धुन्यभून्नभसि सा पतति निमार्ष्टि
लोकत्रयं भगवतो विशदेव कीर्तिः ॥३१॥

धातुर्ब्रह्मणः कमण्डलुजलं स्वर्धूनी गङ्गाऽभूत्। सा च विष्णुपाद-प्रक्षालनकृतपवित्रतया त्रीन् लोकान् निमार्ष्टि विशोधयति। कीर्तिरिति शुभ्रत्व-पावनत्वादौ दृष्टान्तः (भाग० ८।२१।४) ॥३१॥

ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः।
सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥३२॥
तोयैस्समर्हणैः स्रग्भिर्दिव्यगन्धानुलेपनैः।
धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलोत्करैः ॥३३॥
स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः।
नृत्यवादित्रगीतैश्च शङ्खदुन्दुभिनिःस्वनैः ॥३४॥

एवं ध्यात्वा षोडशोपचारां पूजां भावयेदित्याह ब्रह्मादय इति। तोया-दिभिर्बलिं पूजामाजह्रुश्चक्रुः। संक्षिप्ता आत्मनः स्वस्य अर्थाद्ब्रह्मादीनां विभूतिरैश्वर्यं येन स तथा। यद्वा संक्षिप्ता आत्मनो विभूतिर्वैभवं रूपवैपुल्यं येन तस्मै संक्षिप्तरूपायेत्यर्थः। अर्हणैरुपायनैः। उत्कराः समूहाः (भाग० ८।२१।५-७) ॥३२—३४॥

जाम्बवानृक्षाधिपतिर्भेरीशब्दैर्मनोजवः।
विजयं दिक्षु सर्वासु महोत्सवमघोषयत ॥३५॥

अथ प्रदक्षिणमाह जाम्बवानिति। विजयं जितं विष्णुनेत्यघोषयत्। महानुत्सवो दिक्षु यस्माद् विजयात्। जाम्बवान् हि त्रिविक्रमं प्रदक्षिणी-कृतवान्।

सुघोषेण मया चैव तदा विष्णुः सनातनः।
प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविष्टपम् ॥

इति हि कैष्किन्धे[1] तद्वाक्यम्। शुकः राजानम् (भाग० ८।२१।८) ॥३५॥

1 रामायणे कैष्किन्धे ६५।१५ श्लोकः।

ब्रह्मविष्णुरुद्ररूपाणि ।
वृषहंससुपर्णस्थान् स्वैःस्वैश्चिह्नैश्च चिह्नितान् ।
कृपावलोकेन हसद्वदनेनोपलम्भितान् ॥३६॥

एवं त्रैगुण्यधारणां प्रथमभूमिकामुक्त्वा तत्र स्थिरचेतसो द्वैगुण्यधारणां द्वितीयभूमिकामाह ब्रह्मेत्यादि । विष्णुग्रहणन्तु श्लोकानुरोधात् श्लोकेऽत्र यद्यपि त्रयाणां प्रतीतिस्तथापि द्वयोरेवात्राभिनिवेष्टव्यम् । इह हि द्वैगुण्य-धारणाया विवक्षितत्वाद् विष्णुरूपस्य वक्ष्यमाणत्वाच्च । न च द्वयोर्युगपद्ध्याना-नुपपत्तिः । हरिहरार्धनारीश्वरादिवदुपपत्तेः । वृषहंससुपर्णस्थान् रुद्रादीनस्तावी-दित्यन्वयः । तत्र वृषभारुढः खट्वाङ्गश्मशानकाष्ठटाङ्कडमरुपरशुकपाला-लङ्कृतचतुर्भुजा चर्मवसना भस्माङ्गरागा फणिकपालविभूषणा रुद्रमूर्तिश्चिन्त्या । ब्रह्ममूर्तिस्तु हंसारुढ़ा चतुर्मुखी चतुर्भुजा तप्तकाञ्चनवर्णा शुक्लवस्त्रा लम्बकूर्चा तुन्दिला सौम्या पिङ्गाक्षी सोत्तरीयोपवीता योगपट्टासना जटामुकुटालङ्कृताऽक्ष-सूत्रपुस्तककमण्डलुस्रुवान् दधानेति । कृपयावलोकः तेन हसद्वदनेन च उप-लम्भितान् प्रसन्नत्वेन ज्ञापितान् (भाग० ४।१।२४) ॥३६॥

तच्छोचिषा प्रतिहते निमील्य मुनिरक्षिणी ।
चेतस्तत्प्रवणं युञ्जन्नस्तावीत् संहताञ्जलिः ॥
श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः ॥३७॥

तेषां शोचिषा प्रभया । प्रतिहते प्रतिघातं नीते । मुनिरत्रिः । (भाग० ४।१।२५) ॥३७॥

विश्वोद्भवस्थितिलयेषु विभज्यमानै-
र्मायागुणैरनुयुगं विगृहीतदेहाः ।
ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं व-
स्तेभ्यः क एव भगवन् (भवतां) म इहोपहूतः ॥३८॥
एको मयेह भगवान् विबुधप्रधानै-
श्चित्तीकृतः प्रजननाय कथं नु यूयम् ।

अत्रागतास्तनुभृतां मनसोऽपि दूराद्-
ब्रूत प्रसीदत महानिह विस्मयो मे ॥३९॥

अनुयुगं कल्पे कल्पे। विशब्दो वैसादृश्ये ते प्रसिद्धाः। तेभ्यः सकाशादेक एवोपहूतः। स च क इति युष्माभिरेव कथनीय इत्याह 'प्रधानं प्रकृष्टा धारणा। अचित्तं चित्तं कृतश्चित्तीकृतः। चित्तेनैक्यं नीत इत्यर्थः। प्रजननाय पुत्रोत्पत्त्यै। एकस्मिन् ध्यातेषु त्रयः कथमत्रागताः इति ब्रूत। दूरा अगोचराः। प्रसीदत प्रसादं कुरुत। इह त्रयाणामागमने। एतेनात्रितुल्योऽत्राकारीति ज्ञेयम्। अत्रिर्हि रजस्तमःप्रकृतिः प्रजाकामत्वात्।

यथोक्तं[1]

रजस्तमः प्रकृतयः समशीलान् यजन्ति हि।
पितृभूतप्रजेशादीन् श्रियैश्वर्य्य-प्रजेप्सवः॥

इति (भाग० ४।१।२६-२७) ॥३८—३९॥

देवा ऊचुः।
यथाकृतस्ते सङ्कल्पो भाव्यन्तेनैव नान्यथा।
सत्सङ्कल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयम् ॥४०॥

श्रीवोपदेवकृते मुक्ताफले विष्णोर्लक्षण-भेदाः।

इति प्रथमोऽध्यायः॥

एवं मूर्तित्रयं ध्यायमानोऽप्यभेदं भावयेदित्याह यथेति। ते तया। एवशब्दो भिन्नक्रमः। अन्यथा न भाव्यमेवेति। यतस्त्वं सत्यसङ्कल्पः अतस्तव सङ्कल्पभङ्गो मा भूदिति त्रयो वयमागता इत्यर्थः। एकस्यैव त्रिष्वधिष्ठातृत्वात्। मैत्रेयो विदुरम् (भाग० ४।१।२८) ॥४०॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णोर्लक्षणभेदाः।

समाप्तोऽयं प्रथमोऽध्यायः॥

---

1 भागवतम् ॥ १।२।२७ ॥

द्वितीयोऽध्यायः

—:०:—

विष्णुरूपम्

तत्राद्भुतं वै भवनं द्युमत्तमं
भ्राजन्मणिस्तम्भसहस्रशोभितम् ।
तस्मिन्महाभोगमनन्तमद्भुतं
सहस्रमूर्धन्यफणामणिद्युभिः ॥१॥
विभ्राजमानं द्विगुणेक्षणोल्वणं
सिताचलाभं शितिकण्ठजिह्वम् ।
ददर्श तद्भोगसुखासनं विभुं
महानुभावं पुरुषोत्तमोत्तमम् ॥२॥

एवं धारणाद्वयाभ्यासबलाज्जितरजस्तमस्कस्य मुमुक्षोः सत्त्वजयार्थं शुद्धसत्त्वधारणां तृतीयभूमिकामाह । विष्णुरूपमिति । तत्र गर्भोदके भवनादिकमच्युतो ददर्शेत्युत्तरेणान्वयः । द्युमत्तमं शोभाढ्यम् । भ्राजन्तो मणयो येषु स्तम्भसहस्रेषु तैः शोभितम् । तस्मिन् भवनेऽनन्तं शेषं प्रधानात्मकं ददर्श । सहस्रं मूर्धन्याः श्रेष्ठा ये फणार्पितमणयः तेषां द्युभिः । द्वैगुण्यं सहस्रापेक्षम् । सिताचलाभं श्वेतपर्वतसदृशम् । शितयो नीलाः कण्ठा जिह्वाश्च यस्य स तथा । तस्य शेषस्य भोगः शरीरम् । विभुं प्रकृतेरधिष्ठातारं पुरुषम् । अत एव विशेषणद्वयम् । अनुभावः प्रभावः । पुरुषोत्तमेषु ब्रह्मादिषु उत्तमम् । मुक्तेषु वा नित्यमुक्तत्वात् । तथा च सूत्रद्वयम् । तत्र निरतिशयं सर्वज्ञबीजम् । स एष पूर्वेषामपि गुरुः कालेनानवच्छेदादिति[1] । अस्य च लीलया शरीरग्रहणम् । (भाग० १०।८९।५२-५४) ॥१-२॥

---

1 पातञ्जलं १।२५-२६ सू: ।

सान्द्राम्बुदाभं सुपिशङ्गवाससं
प्रसन्नवक्त्रं रुचिरायतेक्षणम् ।
महामणिव्रातकिरीटकुण्डल-
[1]त्विषा परिष्वक्तसहस्रकुन्तलम्[1] ॥३॥
प्रलम्बचार्वष्टभुजं सकौस्तुभं
श्रीवत्सलक्ष्मं वनमालयावृतम् ।
सुनन्दनन्दप्रमुखैः स्वपार्षदै-
श्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥४॥
पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभि-
र्निषेव्यमाणं परमेष्ठिनाम्पतिम् ।
ववन्द आत्मानमनन्तमच्युतो
जिष्णुश्च तद्दर्शनजातसाध्वसः ॥५॥

सुपिशङ्गं पीतोज्ज्वलम् । आयतं दीर्घम् । महामणीनां व्रातः स्तोमो यत्र किरीटे कुण्डलयोश्च तेषां प्रभया परिष्वक्ताः व्याप्ताः सहस्रं बहवः कुन्तलाः केशा यस्य स तथा तम् ।

आयुधादेर्विशेषः प्रागवत् ।

कीर्तिश्चाजा माया । द्वन्द्वैक्येऽपि न नपुंसकत्वम् । ऊकालोऽज्झ्रस्व-दीर्घप्लुत[2] इतिवत् । अखिलर्द्धिभिरणिमादिसर्वसिद्धिभिः । परमेष्ठिनां परमैश्वर्यवतां पतिं स्वामिनम् । अत्राधिकारिणमाह ' ववन्द इति । आत्मानं तस्यैव कृतज्ञत्वेन वैलक्षण्याभावात् । प्रदीपादिव प्रवृत्तस्य दीपस्य । जिष्णु-रर्जुनः । स तु तद्दर्शनेन जातभयः । एतेन शुद्धसत्त्वोऽत्राधिकारीत्युक्तम् । शुकः । (भाग० १०।८९।५४-५७) ॥३-५॥

I...1 भाग० प्रभापरिच्छिन्नसहस्रकुन्तलम् । 2 पाणिनिः १।२।२७ सू० ।

नेद्दृगेवेच्छारूपत्वात् ।

नन्वीदृशमेव चेद्विष्णुरूपं तत्कथमन्यथा तत्र तत्रोपवर्ण्यत इति तत्राह ' नेदृगेवेति । अत्र हेतुमाह । इच्छैव रूपं यस्य स तथा तस्य भावः तस्मात् । भक्तेच्छैव चतुर्भुजाद्याकारेण परिणमतीत्यर्थः ।

त्वं [1]भावयोगपरिभावितहृत्सरोज
आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ।
यद्यद्धिया त उरुगाय विभावयन्ति
तत्तद्वपुः प्रणयसे तदनुग्रहाय[2] ॥६॥

अत्रैव मूलं योजयति ' त्वम्भावेति । हे ऊरुगाय विष्णो ! त्वं भावयोगेन परिभाविते विशोधिते हृत्सरोजे आस्से अभिव्यक्तः सन्नवतिष्ठसे । तत्र हेतुः । श्रुतेन शास्त्रेणेक्षितो निर्णीतः पन्थाः स्वरूपस्थितिर्यस्य स तथा । वेदोऽत्र प्रमाणमित्यर्थः । अतस्ते भक्ता यद् यद्वपुः स्वधिया विभावयन्ति चिन्तयन्ति ' तत्तत् प्रणयसे प्रकटयसि । व्यापकत्वेन हृदयस्थोऽपि भक्तैर्येन केनाप्याकारेण विषयीकृतस्तदनुग्रहाय प्रकटीऽसीति भावः । ब्रह्मा विष्णुम् । (भाग० ३।९।११) ॥६॥

तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ।
यानि यानि च रोचन्ते स्वजनानामरूपिणः ॥७॥

किञ्च तान्येवेति । ते त्वयैव हेतुना अभिरूपाणि सुन्दराणि ' न तु भूषणाद्युपाधिना ' स्वभावसुभगानीत्यर्थः । येभ्यो भक्ताः स्पृहयन्ति तान्येव ते रूपाणि ' न तु स्वतःसिद्धानीत्येव शब्दार्थः । अत उक्तम् ' इच्छारूपत्वादिति । अरूपिणः वस्तुतः अरूपोऽपि भक्तेच्छया रूपवानित्यर्थः । कर्दमः कपिलम् । (भाग० ३।२४।३१) ॥७॥

शुद्धसत्त्वं विष्णुरूपमेवोपास्यतमम् ।

एवं भगवतः पञ्च प्रभेदान् लक्षणतो रूपतश्च विविच्य पञ्चानामपि साम्ये प्राप्ते उत्तराधरभावं विवेक्तुमाह ' शुद्धसत्त्वेति । तदेवाह ' शुद्धं रजस्तमोरहितं

1 भाग० भक्तियोग० 2 भाग० सदनुग्रहाय

यस्मिन् विष्णुरूपे तत्तथा। तदेवोपास्यतमम्। इदमेषामतिशयेनोपास्यम्। तमबर्थो ह्यतिशयः। स चान्यसव्यपेक्ष इत्यर्थात्। ब्रह्मरुद्ररूपमुपास्यतरमिति। अयमर्थः। स्थूलसूक्ष्मक्रमेण बुद्धयोऽर्थमवगाहन्त इति प्रथमं त्रिगुणात्मके भगवद्रूपे मनः प्रणिधाय तत्र स्थिरं सद् द्विगुणात्मके। ततः परं सत्त्वैकगुणे। ततश्च निर्गुणे सूक्ष्मे ब्रह्मणि प्रवेश्य नित्यनिरतिशयानन्दलाभेन ध्याता कृतकृत्यतामेतीति। ते चामी साकारध्यायिनो मृदुमध्याधिमात्रोपायत्वेन त्रयः। प्रत्येकं मृदुमध्याधिभेदत्वेन नव स्युरिति योगशास्त्रे[1]। तत्राद्ययोरवस्थाभेदाद् भेदषट्कः स्वयमुन्नेयः। अन्त्यस्य तु भेदत्रयं वक्ष्यति। एकत्र व्यवस्थाभेदान्नवविध इत्यर्थः॥

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते।
स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः॥८॥

उक्तमर्थं द्रढयन्नाह सत्त्वं रज इति। अस्य प्रपञ्चस्य स्थित्यादये स्थितिसृष्टिसंहारार्थं सत्त्वादियुक्तः संज्ञात्रयं धत्ते। तत्र सत्त्वतनोर्विष्णोः श्रेयांसि शुभफलानि स्युः। खलु शब्दो निश्चये। स चातिशयं तमबर्थं गमयतीत्युपास्यतमत्वम्। यद्यप्यंशतः सत्त्वसद्भावादन्येषामपि सत्त्वतनुत्वम्। तथाप्यब्भक्षो वायुभक्ष[2] इतिवत् सत्त्वमेव तनुर्यस्येति शुद्धसत्त्वत्वम्। रजस्तमसोः सदपि सत्त्वं न फलप्रदम्। किन्तु शुद्धमेवेति भावः। सूतः शौनकम्। (भाग० १।२।२३) ॥८॥

सत्त्वं विशुद्धं श्रयते भवान् स्थितौ
शरीरिणां श्रेय उपायनं वपुः।
वेदक्रियायोगतपःसमाधिभि-
स्तवार्हणं येन जनः समीहते॥९॥

तदेवाह सत्त्वमिति। सत्त्वं वपुरिति सामानाधिकरण्यम्। स्थितौ निमित्ते

1 योगदर्शनं १।२१—२२।
2 पातञ्जलमहाभाष्यम् १।१।१।

श्रेयसि कैवल्ये उपायनम् उपायभूतम्। तदाह वेदेति। येन सत्त्ववपुषाश्रितेन जनस्तवार्हणं पूजां समीहते सम्यक् करोति। शुद्धस्याविषयत्वात् सत्त्वोपहितं भजतीति भावः। क्रियायोग इत्येकम्। ततश्च वेदादिभिश्चतुर्भिः क्रमादाश्रमिणः पूजयन्तीति चतुर्णामुक्तिः। यद्वा वेदेन वैदिकाः, क्रियया पाञ्चरात्राः, योगेन प्रकृतिपुरुषविवेकोपायेन सांख्याः, तपसा तपस्विनः शैवाः पाशुपताश्च, समाधिना पातञ्जलाः। सत्त्वोपाधेरेव तत्तच्छब्दैस्तत्र तत्राभिधानमिति प्रागुक्तम्। पञ्चैव मार्गाः। अतो मार्गपञ्चकविषयत्वेन पञ्चानामुक्तिः। (भाग० १०।२।३४) ॥६॥

सत्त्वं न चेद्धातरिदं निजं भवे-
द्विज्ञानमज्ञानभिदापमार्जनम्।
गुणप्रकाशैरनुमीयते भवान्
प्रकाशते यस्य च येन वा गुणः ॥१०॥

सत्त्वं वपुरित्युक्तम्, तदमृष्यमाणं प्रति विपक्षे बाधकमाह, सत्त्वं न चेदिति। हे धातः इदं प्रागुक्तं विशुद्धं सत्त्वं निजं वपुष्ट्वेन स्वरूपं न स्यात्। चेत्तर्हि विज्ञानं विशिष्टं ज्ञानम्। मार्जनं लोपम्। आप प्राप्नुयात्। लोकोक्त्या लिट्प्रयोगः। निर्मूलत्वात्तस्यादित्यर्थः। किन्तद्वैशिष्ट्यम्। तदाह। अज्ञानभित् सर्ववस्तुतत्त्वावेदकं नतु भ्रमरूपमित्यर्थः। ज्ञानं हि सत्त्वादुत्पद्यते तच्चेत् सत्त्वं नास्ति तदा ज्ञानमपि न स्यात्। दृश्यते च ज्ञानम्। अतस्त्वं सत्त्ववपुरित्यनुमीयस इत्याह, गुणेति। गुणप्रकाशैः सत्त्वजन्यैर्विषयप्राकट्यैः। ननु सत्त्वस्य जडत्वात् कुतः प्रकाशकत्वम्। तत्राह प्रकाशत इति। गुणश्च यस्य सम्बन्धेन प्रकाशते प्रकाशयति अन्तर्भावितणिजर्थत्वात्। येन वा कर्तृभूतेनेति परमतमुक्तम्। वाशब्दो हि पक्षान्तरार्थः। सर्वथा चिदुज्ज्वलितं प्रकाशकमित्यर्थः। एवमपि सत्त्वमेव प्रकाशकं न तु रजस्तमसी, तयोरस्वच्छत्वेन चिति संक्रान्त्यनुपपत्तेः। यथा रवितेजो दर्पणादिष्वेव प्रादुर्भूय मुखादि प्रकाशयति न घटादिषु। (भाग० १०।२।३५) ॥१०॥

न नामरूपे गुणकर्मजन्मभि-
र्निरूपितव्ये तव तस्य साक्षिणः ।
मनोवचोभ्यामनुमेयवर्त्मनो[1]
देव क्रियायाम्प्रतियन्त्यथापि हि ॥११॥

अस्तु तर्हि सत्त्वयोगो नित्य एव न त्वैच्छिक इत्यत आह न नामेति । नाम रूढं यौगिकञ्च । रूपं श्यामादि । गुणः सौन्दर्यादिः । कर्म चरितं निग्रहानुग्रहरूपम् । जन्म शरीरग्रहणम् । सहार्थे तृतीया । न निरूपितव्ये निरूपयितुमशक्ये । आर्षो णिलोपः । नामादिपञ्चकं तव वक्तुं न शक्यते । कुतः ? साक्षिणः । त्वं हि तेषां साक्षी द्रष्टा । द्रष्टुश्च दृश्यत्वानुपपत्तिः । साक्षित्वमेव कुत इति चेत् तत्राह तस्येति । तस्य समाधौ चिन्मात्रतयानुभूयमानस्यानुभूतवाचित्वाच्चास्य तच्छब्दस्य यच्छब्दानपेक्षा । यथा—

उत्कम्पिनी भयपरिस्खलितांशुकान्ता ।
ते लोचने प्रतिदिशं विधुरे क्षिपन्ति ॥

इत्यादावनुभूतिमपह्नुवानं प्रत्याह ? मन इति । यतश्चाचेतने मनोवचसी प्रसरतः स कश्चिदस्तीत्यनुमानम् । हे देव ! अथापि एवमपि । क्रियायां षोडशोपचारपूजायाम् । प्रतियन्ति जानन्ति । वस्तुतस्त्वं सत्यपि त्वयि वागादिप्रवृत्त्यर्थं भक्ताः कल्पयन्तीत्यर्थः । (भाग० १०।२।३६) ॥११॥

शृण्वन् गृणन् संस्मरयंश्च चिन्तय-
न्नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु [2]यस्त्वच्चरणारविन्दयो-
राविष्टचित्तो न भवाय कल्पते ॥१२॥

ननु नामादेरवास्तवत्वेऽकिञ्चित्करत्वं स्यात्तत्राह शृण्वन्निति । संस्मरयन्नन्यैः । रूपाणि चेति चकाराद्गुणकर्म्मजन्मानि च । आविष्टत्वमवस्थान्तराविष्कारः । भवः संसारः । अवास्तवस्यापि सत्यार्थहेतुत्वं रज्जुसर्पादेरिव

---

1 भाग० ०वर्त्मना　　2 भाग० युष्मच्चरणा०

भयादिहेतुत्वमित्यर्थः । तस्मात् सिद्धमस्योपास्यतमत्वम् । ब्रह्माद्याः श्रीकृष्णं प्रति (भाग० १०।२।३७) ॥१२॥

विष्णुरूपं क्रमेण पादादिहसितान्तमुपास्यतमम् ।

तस्मिन् लब्धपदं चित्तं सर्वावयवसंस्थितम् ।

विलक्ष्यैकत्र संयुञ्ज्यादङ्गे भगवतो मुनिः ॥१३॥

सञ्चिन्तयेद्भगवतश्चरणारविन्दं

वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।

उत्तुङ्गरक्तविलसन्नखचक्रवाल-

ज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥१४॥

अधिमात्रोपायस्त्रिधेत्युक्तम् । तत्र मृद्वधिमात्रमाह ' विष्णुरूपेति । हसितस्यावधित्वं प्रकाशमात्रत्वेन निराकारसन्निकृष्टत्वात् । स्थूलमाह ' तस्मिन्निति । तस्मिन् विष्णुरूपे पदं स्थैर्यं विलक्ष्य एकैकमङ्गं विवेकेन लक्षीकृत्य सञ्चिन्तयेदिति । चक्रवालं मण्डलं । महतो ध्यातुर्हृदयम् । (भाग० ३।२८।२०-२१) ॥१३-१४॥

यच्छौचनिःसृतसरित्प्रवरोदकेन

तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ।

ध्यातुर्मनःशमलशैलनिसृष्टवज्रं

ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥१५॥

दक्षिणमङ्घ्रिं ध्यात्वा गङ्गायाः प्रभवं वामं ध्यायेदित्याह ' यच्छौचेति । सरित्प्रवरा गङ्गा । तीर्थं तारकम् । अधिकृतेन । स्वाभाविके शिवत्वे निमित्तोत्प्रेक्षा शिव इति । तस्याश्चेवादिमन्तरेणाप्युपलम्भात्तदप्रयोगः । शमलं पापम् । निसृष्टं प्रहितम् । (भाग० ३।२८।२२) ॥१५॥

जानुद्वयं जलजलोचनया जनन्या

लक्ष्म्याखिलस्य सुरवन्दितया विधातुः ।

ऊर्वोर्निधाय करपल्लवरोचिषा यत्

संवाहितं[1] हृदि विभोरभवस्य कुर्यात् ॥१६॥

---

1 भाग० संलालितं

जानुद्वयमिति। अखिलस्य विधातुर्ब्रह्मणः जनन्या एवम्भूतया परिसंवाहितमित्यतिशयार्थं विशेषणत्रयम्। ऊर्वोरित्यादरार्थम्। रोचिषेति स्पर्शनचातुर्येण। एतत् परमसौकुमार्यार्थम्। (भाग० ३।२८।२३)॥१६॥

ऊरू सुपर्णभुजयोरधि शोभमाना-
वोजोनिधी अतसिकाकुसुमावभासौ।
व्यालम्बिपीतवरवाससि वर्तमान-
काञ्चीकलापपरिरम्भि नितम्बबिम्बम्॥१७॥

ऊरू इति। अधि ऊर्ध्वभागे। ओजो बलं तेजश्च। व्यालम्बि विततत्वात् विन्यासविशेषाच्च यत् पीताम्बरञ्च वासस्तस्मिन्। वर्तमानस्तदुपरि बद्धो यः काञ्चीकलापस्तस्य परिरम्भः सर्वतः संश्लेषो यस्यास्ति तत्। स्त्रीकटीवत् सौन्दर्यं वक्तुं नितम्बशब्दः। (भाग० ३।२८।२४) ॥१७॥

नाभिह्रदं भुवनकोशगुहोदरस्थं
यत्रात्मयोनिधिषणाखिललोकपद्मम्।
व्यूढं हरिन्मणिवृषस्तनयोरमुष्य
ध्यायेद्द्वयं विशदहारमयूखगौरम्॥१८॥

गुहा नीरन्ध्र आश्रयः। यत्र ह्रदे। आत्मयोनेर्ब्रह्मणः। धिषणां स्थानम्। पद्ममासीत्। हरिन्मणिवृषौ मरकतश्रेष्ठाविव यौ स्तनौ तयोर्द्वयम्। व्यूढं विशालम्। (भाग० ३।२८।२५) ॥१८॥

वक्षोधिवासमृषभस्य महाविभूतेः
पुंसां मनोनयननिर्वृतिमादधानम्।
कण्ठञ्च कौस्तुभमणेरधिभूषणार्थं
कुर्यान्मनस्यखिललोकनमस्कृतस्य॥१९॥

वक्ष इति। ऋषभस्य विष्णोः। महाविभूतेः लक्ष्म्याः। अधिवासं स्थानम्। पुंसाम्। किं पुनः स्त्रीणाम्। कौस्तुभस्याधिक्येन भूषणमर्थः प्रयोजनं यस्य स तथा। कण्ठेन कौस्तुभः शोभते इत्यतिशयः। (भाग० ३।२८।२६) ॥१९॥

बाहूंश्च मन्दरगिरेः परिवर्तनेन
निर्णिक्तबाहुवलयानधिलोकपालान् ।
सञ्चिन्तयेद्दशशतारमसह्यतेजः
शङ्खञ्च तत्करसरोरुहराजहंसम् ॥२०॥

बाहूनिति । परिवर्तनं सव्यापसव्यभ्रमणम् । निर्णिक्तं शोधितम् । अधिलोकपालान् लोकपालाधिष्ठातॄन् । दशशतारं चक्रं । शङ्खस्य सर्वतः शौक्ल्येन मुखमूलयोर्लौहित्येन च राजहंसोपमा । (भाग० ३।२८।२७) ॥२०॥

कौमोदकीं भगवतो दयितां स्मरेत
दिग्धामरातिभटशोणितकर्दमेन ।
मालां मधुव्रतवरूथगिरोपघुष्टां
चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥२१॥

कौमोदकीमिति । दिग्धां लिप्ताम् । भटा योद्धारः । वरूथः समूहः । उपघुष्टां वाचालीकृताम् । चैत्यस्य क्षेत्रस्य । तत्त्वं कारणं परं ज्योतिः तद्रूपं मणिं कौस्तुभम् । (भाग० ३।२८।२८) ॥२१॥

भृत्यानुकम्पितधियेह गृहीतमूर्तेः
सञ्चिन्तयेद्भगवतो वदनारविन्दम् ।
यद्विस्फुरन्मकरकुण्डलवल्गितेन
विद्योतितामलकपोलमुदारनासम् ॥२२॥
यच्छ्रीनिकेतमलिभिः परिषेव्यमाणं
भूत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ।
मीनद्वयाश्रितमधिक्षिपदब्जनेत्रं
ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु ॥२३॥

भृत्येति । वल्गितं चलनम् । यद् वदनाब्जम् । श्रीनिकेतं पद्ममधिक्षिपेत् । विशेषणप्रधानो निर्देशः । श्रीनिकेतत्वादिधर्मत्रयविशिष्टं क्षिपतीत्यर्थः । तत्र स्वभूत्या श्रीनिकेतत्वस्याक्षेपः कुन्तलैरलियुक्तत्वस्य नेत्रद्वयेन मीनद्वययुक्तत्वस्य । मनोमयं मनसः परिणामम् । (भाग० ३।२८।२९-३०) ॥२२-२३॥

तस्यावलोकमधिकं कृपयातिघोर-
तापत्रयोपशमनाय निसृष्टमक्ष्णोः ।
स्निग्धस्मितानुगुणितं विपुलप्रसादं
ध्यायेच्चिरं विततभावनया गुहायाम् ॥२४॥

तस्येति । अनुगुणितं युक्तम् । विपुलो बहुः । गुहायां हृदि । (भाग० ३।२८।३१) ॥२४॥

हासं हरेरवनताखिललोकतीव्र-
शोकाश्रुसागरविशोषणमत्युदारम् ।
सम्मोहनाय रचितं निजमाययास्य
भ्रूमण्डलं मुनिकृते मकरध्वजस्य ॥२५॥

हासमिति । निजमायया अस्य जगतः सम्मोहनाय रचितं हासं ध्यायेत् । मुनीनामपि सम्मोहनं मा भूदिति तत्सम्मोहनाय प्रवृत्तस्य कामस्य सन्तर्जनेन सम्मोहनाय रचितं भ्रूमण्डलं ध्यायेत् । (भाग० ३।२८।३२) ॥२५॥

ध्यानायनं प्रहसितं बहुलाधरौष्ठ-
भासारुणायिततनुद्विजकुन्दपङ्क्ति ।
ध्यायेत् [1]स्वदेहकुहरेऽवसितस्य विष्णो-
र्भक्त्यार्द्रयार्पितमना न पृथग् दिदृक्षेत् ॥२६॥

अव्यक्तं हसितमुक्त्वा प्रव्यक्तं हसितमाह । ध्यानायनमिति । प्रहसितं प्रकाशध्यानातिमात्रत्वाद् निराकारेण स्पर्धते । अत एव ध्यानायनं व्यवधानाल्पत्वाद् बहुलया अधरौष्ठस्य भासा अरुणायिता लौहित्यं नीता तनूनां द्विजानामेव कुन्दकलिकानां पङ्क्तिर्यत्र तत् । देहकुहरं हृदयाकाशम् । अवसितस्य निर्ज्ञातस्य । आर्द्रया भक्त्या आनन्दरसेन । पृथक् तद्व्यतिरिक्तं न द्रष्टुमिच्छेत् । (भाग० ३।२८।३३) ॥२६॥

---

1 भाग० स्वहृत्कुहरे ।

एवं हरौ भगवति प्रतिलब्धभावो
भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ।
औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तबड़िशं शनकैर्वियुङ्क्ते ॥२७॥

ध्यानमुक्त्वा समाधिमाह 'एवमिति। एवं दृश्यविशिष्टद्रष्टृध्यानेन हरौ द्रष्टरि प्रतिलब्धभावः पुनर्लब्धरतिः। तद्दृश्यम्। शनकैर्वियुङ्क्ते त्यजति। यतस्तच्चित्तबड़िशं चपलस्य चित्तमत्स्यस्य बन्धनार्थमुपात्तम् ' यद्यपि तस्मिन् भक्त्या गृहीते प्रमोदाद् द्रवद्धृदय इत्युत्पुलकश्च भवति ' अतस्तदपि त्याज्यम्। क्रियाजन्यं हि तत् सुखम्। क्रिया च द्वितीये क्षणे नश्यति। स च क्षणः औत्कण्ठ्येन दुःखेन दुःसहः। इदमत्र तत्त्वं—ध्येयालम्बनस्य प्रत्ययस्य सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्[1]। ध्यानमेव ध्येयाकारनिर्भास-प्रत्ययात्मकं न स्वरूपेण शून्यमिव ध्येयस्वभावावेशाद्यदा भवति तदा समाधि-रित्युच्यते[2] इति। (भाग० ३।२८।३४) ॥२७॥

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं
निर्वाणमृच्छति मनः सहसा यथार्चिः ।
आत्मानमत्र पुरुषोऽव्यवधानमेक-
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥२८॥

अथास्य योगस्य फलमाह 'मुक्तेति। त्यक्ते तु बड़िशे मनः सहसा निर्वाणमृच्छति नाशं प्राप्नोति। यथेन्धनाभावादर्चिः। कदा। यर्हि यदा मुक्ताश्रयं निर्ग्रन्थित्वात्। निर्विषयं प्रक्षीणकर्मत्वात्। विरक्तं छिन्न-संशयत्वात्। अत्र अस्यां दशायां पुरुष आत्मानमन्वीक्षते अनुवृत्तम-खण्डं पश्यति ' अव्यवधानव्यवधायकस्य मनसो भावात्। अत एवैकं जीव-परयोर्भेदाभावात्। यतः प्रतिनिवृत्तो यत्रोदितस्तत्रैव लीनो गुणप्रवाहः कार्य-कारणभावो यस्य स तथा। (भाग० ३।२८।३५) ॥२८॥

---

1 तत्र प्रत्ययैकतानता ध्यानम्।—पातञ्जलम् ३।२।

2 तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।—पातञ्जलम् ३।३।

सोऽप्येतया चरमया मनसो निवृत्त्या
स्वस्मिन्[1]महिम्न्यवसितः सुखदुःखबाह्ये ।
हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः ॥२६॥

सोऽपीति । सोऽप्यात्मा स्वस्मिन् महिम्नि नित्यनिरतिशयानन्दघने पदे अवसितः अवबद्धः संश्लिष्टो भवति । घटाकाशमिव महाकाशे । कया । मनसो निवृत्त्या । एतया योगाभ्यासलब्धया । अत एव चरमया पुनरावृत्तिशङ्कारहितया । सुखदुःखबाह्ये पुण्यपापफलभोगाभावात् । हेतुत्वमसति कर्तर्यवसितम् । कर्ता सात्त्विकोऽहङ्कारः । स चासन् मायामयत्वात् । दुःखयोः सुखदुःखयोः । युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् । द्यावोस्तथेति चेदितिवत् । यत् सहेतुत्वं स्वात्मन् विधत्ते । अहङ्कारकृतमात्मकृतं मन्यते । तदिदानीं येन कृतं तत्रैवावसितमित्यर्थः । यत उपलब्धपरात्मकाष्ठः साक्षात्कृतपरमात्मस्वरूपः । (भाग० ३।२८।३६) ॥२६॥

देहन्तु[2] तं न चरमः स्थितमुत्थितं वा
सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम् ।
दैवादपेतमथ दैववशादुपेतं
वासो यथा परिकृतं मदिरामदान्धः ॥३०॥

ईदृशस्य च देहाभिमानो नास्तीत्याह । देहमिति । तं देहं सिद्धो विपश्यति । आभासमात्रेण पश्यति । किन्तु स्थितमुत्थितं वेति विवेकेन न पश्यतीति वेरर्थः । यतः स्वरूपमध्यगमत् साक्षात्कृतवान् । परिकृतं प्रावृतम् । तथाच श्रुतिः । यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेत इति[3] । (भाग० ३।२८।३७) ॥३०॥

---

1 भाग० तस्मिन् ।
2 भाग० देहञ्च ।
3 बृहदारण्यकम् ४।४।७

देहोऽपि दैववशगः खलु कर्म यावत्
स्वारम्भकं प्रतिसमीक्षत एव सासुः ।
तं सप्रपञ्चमधिरूढसमाधियोगः
स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥३१॥

ननु त्यक्ताभिमानश्चेद्देहस्तदैव पतेदिति नेत्याह ' देहोऽपीति । यावत् स्वारम्भकं कर्मास्ति तावत् प्रतिसमीक्षत एव । कुतः ' दैववशगो यतः । दैवं प्राक्कर्म । खलुशब्दो हेतौ । नन्वात्मना त्यक्ताभिमानस्यास्य कुतः प्रवृत्तिनिवृत्ती । तत्राह ' सासुः सलिङ्गशरीरः । ननु ज्ञानोदयेऽपि चेत् कर्माणि न निवर्तन्ते तर्हि सञ्चितैः कर्मभिर्देहान्तराणि स्युः ' तत्राह ' तमिति । तं देहं सप्रपञ्चं सकारणं पुनर्न भजते । तत्र हेतुः ' अधीति । स्वाप्नमिव प्रतिबुद्धवस्तुः । अयमर्थः ' तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथ सम्पत्स्य[1] इति श्रुतिः । न विमोक्ष्यते अथ ब्रह्म सम्पत्स्यते प्राप्स्यति । उभयत्र तकारलोपश्छान्दसः । अस्मादवधिश्रवणात् प्रारब्धफलं कर्म भोगादेव नश्यति । अनारब्धफलन्तु ज्ञानादित्येषा च फलोक्तिस्तृतीययोगे तीव्राधिमात्रस्य ज्ञेया । अन्यथाऽनेनैव कृतार्थत्वादुत्तरयोगद्वयोक्तिवैयर्थ्यं स्यादत एव तत्र फलं नोक्तम् । अत्र तु फलसंकीर्तनमस्यैव तृतीये फलभूमिकामधिरूढस्यैतत् फलं भवतीति दर्शयितुम् । कपिलो देवहूतिम् । (भाग० ३।२८।३८) ॥३१॥

एकैकशोऽङ्गानि धिया नु भावयेत्
पादादि यावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत्
परं परं शुध्यति धीर्यथा यथा ॥३२॥

अवयवशो रूपं क्रमेण चिन्त्यमित्युक्तम् । तस्यावधिमाह ' एकैकेति । अपोह्य त्यक्त्वा पादौ ध्यायन्ती धीर्यदा शुध्यति ध्येयं विनावतिष्ठते तदा गुल्फौ ध्यायेत् । गुल्फौ ध्यायन्ती यदा प्राग्वत्तदा जङ्घे ध्यायेदित्यादिक्रमेण हसितं त्यक्त्वा निर्विषयैवावतिष्ठते स समाधिः । शुकः । (भाग० २।२।१३) ॥३२॥

1 छान्दोग्यम् ६।१४।२

हृत्पुण्डरीकमन्तःस्थमूर्ध्वनालमधोमुखम् ।
ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ॥३३॥

अथ मध्याधिमालमाह' हृदिति । अन्तःस्थं हृन्मध्यस्थं स्वतोऽधोमुखं सदतितीदृशेन प्रणवाग्रेणोच्चलनादूर्ध्वमुखं ध्यात्वेत्यर्थः । उन्निद्रमुत्फुल्लम् । अष्टौ भूम्यादितत्त्वानि पलाणि यस्य स तथा । (भाग० ११।१४। ३६) ॥३३॥

कर्णिकायां न्यसेत् सूर्यसोमाग्नीनुत्तरोत्तरम् ।
वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलम् ॥३४॥

कर्णिकायां प्रणवं न्यसेद् ध्यायेत्' सत्त्वादिरूपाणि सूर्यादिविम्बानि । उत्तरोत्तरं क्रमेण । एतत् उक्तेष्वन्यतमम् । ध्यानेषु मङ्गलं स्वस्त्ययनम् । (भाग० ११।१४।३७) ॥३४॥

इन्द्रियाणीन्द्रियार्थेभ्यो मनसाकृष्य तन्मनः ।
बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥३५॥

ध्यानमुक्तं प्रत्याहारमाह ' इन्द्रियाणीति । इन्द्रियाणि अश्वान् । मनसा प्रग्रहेण । धीरो विषयैरजितः । सर्वतः सर्वावयवरूपे मयि । (भाग० ११।१४। ४२) ॥३५॥

तत् सर्वव्यापकञ्चित्तमाकृष्यैकत्र धारयेत् ।
नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥३६॥

धारणामाह ' तदिति । एकत्र चरणादौ । देशबन्धश्चित्तस्य धारणा इति हि पातञ्जलम्[1] । एवं प्रागुक्तदिशा स्मितान्तं ध्यायेत् । सुस्मितमिति हि विशेषणे तात्पर्यम् । (भाग० ११।१४।४३) ॥३६॥

तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ।
तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तयेत् ॥३७॥

समाधिमाह' तत्रेति । तत्र स्मिते । पदं स्थैर्यम् । व्योम्नि मायोपाधावीश्वरे ।

---

1 पातञ्जलदर्शनम् ३।१

तच्च व्योम । मदारोहो निरुपाधिमत्स्वरूपमारूढः । न किञ्चिच्चिन्तयेत्' ध्यातृध्येय-विभागमपि त्यजेदित्यर्थः । प्रत्याहारधारणे ध्यानात् प्राक् ' पश्चात् समाधिः ' यमादिचतुष्कन्त्वर्थसिद्धम् ' तदेवमष्टाङ्गो योग इहोक्तः । (भाग० ११।१४। ४४) ॥३७॥

एवं समाहितमतिर्मामेवात्मानमात्मनि ।
विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतम् ॥३८॥

तस्य फलमाह ' एवमिति । एवं सप्तभिरङ्गैः समाधिं प्राप्ता मतिर्यस्य स तथा । माम् आत्मानं जीवम् । मय्यात्मनि परमात्मनि सर्वात्मन् सर्वात्मके विचष्टे विशेषात् पश्यति । मां मयीति जीवपरयोरभेद उक्तो ज्योतिरिति दृष्टान्तः । यथा प्रतिबिम्बभूतं ज्योतिरुपाध्युपरमे बिम्बी स्यात् तथेत्यर्थः । अत्रापि फलोक्तिः प्राग्वत् । श्रीकृष्ण उद्धवम् । (भाग० ११।१४।४५) ॥३८॥

अन्तकाले तु पुरुष आगते गतसाध्वसः ।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥३९॥

तीव्राधिमात्रमाह । अन्तकाल इति । गतसाध्वसः त्यक्तमरणभयः । असङ्गशस्त्रेण असंगो ह्ययं पुरुष[1] इत्युपदेशदार्ढ्येन । तं देहमनु ये पुत्र-कलत्रादयस्तेषु । (भाग० २।१।१५) ॥३९॥

गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ।
शुचौ विविक्त आसीनो विधिवत् कल्पितासने ॥४०॥
अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम् ।
मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥४१॥

प्रव्रजितः सन्न्यस्य निर्गतः । धीरो गृहस्यास्मर्ता । विधिवत् ।

नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्[2] ।

मनसा न तु वाचा । शुद्धमुदात्तादिधर्मैरहितम् । त्रिवृत् त्रिभिरकारो-कारमकारैर्वर्तितं ग्रथितम् । ब्रह्मणः प्रथमं रूपम् । अक्षरं वर्णं परं

1 बृहदारण्यकम् ४।३।१५ 2 गीता ६।११

स्फोटात्मकम् । यच्छेत् स्थिरीकुर्यात् । जितश्वासः प्राणायामैः । ब्रह्मबीजमोङ्कार-मविस्मरन् । स एव जपगर्भः प्राणायामः । (भाग० २।१।१६-१७) ॥४०-४१॥

नियच्छेद्विषयेभ्योऽक्षान् मनसा बुद्धिसारथिः ।
मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥४२॥

अक्षान् इन्द्रियाश्वान् । मनसा प्रग्रहेण । कर्मभिः कर्मवासनाभिः । आक्षिप्तमितस्ततो नीतम् । शुभार्थे धारयेत् हृदयपुण्डरीके मूर्धज्योतिषि नाभिचक्रे[1] नासिकाग्रे अन्यस्मिन् वा पापक्षयकरे वस्तुनि चतुर्भुजादौ बध्नीयात् । (भाग० २।१।१८) ॥४२॥

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ।
मनो निर्विषयं युक्त्वा ततः किञ्चन न स्मरेत् ॥४३॥

तत्रापि क्रमादेकैकावयवं ध्यायेत् । अव्युच्छिन्नेन ध्येयान्तररहितेन । युक्त्वा समाधाय तच्च निर्विषयं मनः । (भाग० २।१।१९) ॥४३॥

पदं तत् परमं विष्णोर्मनो यत्र प्रसीदति ॥४४॥

श्रीवोपदेवकृते मुक्ताफले विष्णुरूपम् ।
इति द्वितीयोऽध्यायः ॥२॥

पदं विष्णोर्निराकारस्य परमं पदं स्फूर्तिस्थानम् । यत्र यस्यां दशायाम् । प्रसीदति सत्त्वमात्रशेषमवतिष्ठते । अयमर्थः—उक्तभूमिकाभ्यासबलात् सर्व-वृत्तिप्रत्यस्तमये संस्कारशेषे चेतसि निरुद्धे असम्प्रज्ञातसमाधिना निर्विशेषचैतन्य-लाभः । ततश्च ससंस्कारं चित्तं निवर्तते । तस्मिंश्च निवृत्ते पुरुषः स्वरूपं प्रविष्टः शुद्धः केवलो मुक्त इत्युच्यते । तथाच सूत्रम्—तदा द्रष्टुः स्वरूपे-ऽवस्थानम्[2] । अयमेव मुक्तिशब्दार्थः

मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः[3]

इत्यत्रोक्तः ।

---

1 नाभिचक्रे कायव्यूहज्ञानम् कूर्मनाड्यां स्थैर्यम् मूर्धज्योतिषि सिद्धदर्शनम् ।—पातञ्जलदर्शनम् ३।२९-३२

2 पातञ्जलदर्शनम् १।३

3 भागवतम् २।१०।६

तदेवमाप्लुतो धीर इति यमनियमोपलक्षणम् । आसीन इत्यासनमुक्तम् । अभ्यसेदिति प्राणायामः । नियच्छेदिति प्रत्याहारः । ततो धारयेदित्यविषयस्य क्रमाद्विषयीकरणरूपा धारणा । ध्यायेदिति तस्यैव क्रमत्यागो ध्यानम् । युक्त्वेति निर्विषयतारूपसमाधिरित्यष्टाङ्गो योग उक्तः । शुकः राजानं प्रति । (भाग० २।१।१६) ॥४४॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुरूपम् ।

समाप्तोऽयं द्वितीयोऽध्यायः ॥

———

तृतीयोऽध्यायः

अथ विष्णोरवताररूपाणि चत्वारिंशत् । हरियज्ञवामनमन्वन्तरेशानां पुनरुक्तत्वात् ।

तत्र वराहः ।

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्
क्रौडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागत आदिदैत्यं
तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥१॥

एवन्तावदियता प्रबन्धेन मुमुक्षोः समाधिसामग्रीं समग्रामुक्त्वेदानीमस्यैव व्युत्थानदशायां योगान्तरायपरिहारार्थमिष्टावाप्त्यर्थञ्च भगवज्जन्मकर्मानुसन्धानं विधातुमाह । विष्णोरवताररूपाणीति । तत्रान्तरायाः—व्याधि-स्त्यान-संशय-प्रमादालस्याविरति-भ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपाः । दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः[1] । तत्र स्त्यानमकर्मण्यता । प्रमादः समाधिभूमेरलाभः । अनवस्थितत्वं यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठा । जन्मकर्मानुसन्धानेन महाँल्लाभः । तदुक्तम्

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वत[2] इति ।

कुतश्चत्वारिंशदेव । चतुर्णामन्येषामप्युपलम्भात् । तत्राह । हरीति । पौनरुक्त्यञ्च मन्वन्तरावतारार्थम् । ते चावताराश्चतुर्धा । कल्पमन्वन्तर-युगस्वल्पभेदात् ।

तत्र कल्पावतारान् शृण्वन्नध्वविघ्नोपशान्तये वराहं भावयेदित्याह । तत्रेति । आदिदैत्यं हिरण्याक्षम् । (भाग० २।७।१) ॥१॥

---

1 पातञ्जलम्—१।३०—३१ 2 गीता ४।९

जातो रुचेरजनयत् सुयमान् सुयज्ञ
आकूतिसूनुरमरानथ दक्षिणायाम् ।
लोकत्रयस्य महतीमहरद्यदार्तिं
स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥२॥

लोकापवादनिरासार्थं यज्ञमाह ' जात इति । रुचिः पिता । आकूतिर्माता । दक्षिणा पत्नी । सुयमा नाम देवाः पुत्राः । स्वायम्भुवो मनुर्मातामहः । तेन सुयज्ञ इति प्रथममुक्तः पश्चाद् हरिरिति । यतो लोकानामार्तिमहरत् । (भाग० २।७।२) ॥२॥

कपिलः ।

जज्ञे च कर्दमगृहे द्विज देवहूत्यां
स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ।
ऊचे ययात्मशमलं गुणसङ्गपङ्क-
मस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥३॥

राजसत्त्वादिदोषहानार्थं कपिलावतारमाह ' कपिल इति । कर्दमः पिता । देवहूतिर्माता । नव भगिन्यः । आत्मगतिं ब्रह्मविद्याम् । यया माता पुत्रस्य गतिं मुक्तिं प्रपेदे । आत्मशमलं मलिनीकरणम् । गुणसंगाख्यं पङ्कं विधूयास्मिन्नेव जन्मनि । हे द्विज नारद । (भाग० २।७।३) ॥३॥

दत्तात्रेयः ।

अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो
दत्तो मयाहमिति यद्भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहा
योगर्धिमापुरुभयीं यदुहैहयाद्याः ॥४॥

अलब्धभूमिकत्वनिवृत्त्यर्थं दत्तात्रेयमाह ' अत्रेरिति । आत्मैव मया तव पुत्रो दत्त इत्यत्रिं प्रत्याह । तस्माद्दत्तः । अत्र्यपत्यत्वादात्रेयः । इतश्चा-

निजः[1] इत्यपत्यार्थे ढक्। ऋद्धिं सिद्धिम्। उभयीं भुक्तिमुक्तिरूपाम्। हैहयः कार्तवीर्यः। आदिशब्दादलर्कप्रह्लादौ। (भाग० २।७।४) ॥४॥

चतुःसनः।

तप्तं तपो विविध-लोकसिसृक्षया मे
आदौ सनात् स्वतपसः स चतुःसनोऽभूत्।
प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं
सम्यग् जगाद मुनयो यदचक्षतात्मन् ॥५॥

कामोपशमार्थं चतुःसनमाह। तप्तमिति। यन्मया तपस्तप्तं स चतुःसनोऽभूत्। तप एव चतुर्धावतीर्णम्। सनत्कुमारः सनकः सनन्दनः सनातन इति। सनशब्दोपलक्षितचतुर्भेदः। सनात् अखण्डितं यत् स्वतपस्तस्मादिमानि नामानि। सत्त्वमात्मतत्त्वं जगाद च। यद् गदितं मुनय आत्मन्यपश्यन्। उपदेशादेव साक्षात्कारोऽभूदित्यर्थः। (भाग० २।७।५) ॥५॥

नारदः।

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥६॥

प्रमादहानार्थं नारदावतारमाह। तृतीयेति। सात्वतं पञ्चरात्रम्। नैष्कर्म्यं फलाभावत्वेन कर्मत्वाभावः। सूतः शौनकम्। (भाग० १।३।८) ॥६॥

नरनारायणः।

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां
नारायणो नर इति स्वतपःप्रभावः।
दृष्ट्वात्मनो भगवतो नियमावलोपं
देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥७॥

उग्रधर्महानार्थं नारायणावतारमाह। धर्मस्येति। धर्मः पिता।

---

1 पाणिनिः ४।१।१२२

मूर्तिर्माता । दक्षो मातामहः । नरो भ्राता । स्वः अकृत्रिमस्तपःप्रभावो यस्य स तथा । नियमावलोपं घटितुं निष्पादयितुम् । देव्योऽप्सरसः । न शेकुः । यद्यप्यनङ्गपृतनाः कामसैन्यानि । आत्मनः आत्मरूपाण्यन्या अप्सरसो भगवतो नारायणस्य देहादुत्पन्ना दृष्ट्वाः । (भाग० २।७।६) ॥७॥

कामं दहन्ति कृतिनो ननु रोषदृष्ट्या
रोषं दहन्तमुत ते न दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं प्रविशन् बिभेति
कामः कथं न पुनरस्य मनः श्रयेत ॥८॥

नारायणस्य धैर्यं वर्णयन्ति काममित्यादिना । केचित् कृतिनः । कामं तावद्रोषमाविष्कृत्य दहन्ति । रोषं पुनस्तानेव दहन्तं नो दहन्ति । न च सहन्ते । सोऽयं रोषो यस्यान्तःकरणं प्रविशन्नत्यर्थं बिभेति । कामस्य तु का वार्ता । (भाग० २।७।७) ॥८॥

विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो
बालोऽपि सन्नुपगतस्तपसे वनानि ।
तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो
दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥९॥

उद्दिष्टसिद्ध्यर्थं ध्रुवप्रियं भावयेदित्याह । विद्ध इति । मातुः सुनीतेः सपत्नी या सुरुचिः तस्या उदितानि वाक्यानि तान्येव पत्रिणो बाणास्तैः । राज्ञ उत्तानपादस्य । अन्ति समीपे । ध्रुवगतिं ध्रुवपदम् । गृणते स्तुवते । दिव्या मुनयः सप्तर्षयः । यद् यत्र । आत्मन उपरि स्थितम् । अधस्तात् स्थिताः । (भाग० २।७।८) ॥९॥

पृथुः ।

यद्वेणमुत्पथगतं द्विजवाक्यवज्र-
निष्प्लुष्टपौरुषभगं निरये पतन्तम् ।

त्रात्वार्थितो जगति पुत्रपदञ्च लेभे
दुग्धा वसूनि वसुधा सकलानि येन ॥१०॥

क्षुत्पिपासाशान्त्यर्थं पृथुमाह — यद्वेणेति। त्रात्वा रक्षित्वा। यत् पुत्र इति पदं नाम लेभे। पुन्नाम्नो नरकात्त्रायत[1] इति पुत्रः। तेन च वेणः पुत्रेण त्रातः। अर्थितो द्विजैः। जगति जगदर्थम्। वसूनि रत्नानि। (भाग० २।७।९) ॥१०॥

ऋषभः।

नाभेरसावृषभ आस सुदेविसूनु-
र्यो वै चचार समदृग् जड़योगचर्याम्।
यत्पारमहंस्यमृषयः पदमामनन्ति
स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥११॥

अनवस्थिततत्वहानार्थमृषभमाह — नाभेरिति। नाभिः पिता। सुदेवी माता। जड़वद्योगेन नित्यसमाधिना चर्या जड़योगचर्या। स्वस्थो न तु विषयस्थः। (भाग० २।७।१०) ॥११॥

हयग्रीवः।

सत्रे ममास भगवान् हयशीरषाथो
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥१२॥

देवहेलनकृतदोषहानार्थं हयग्रीवावतारमाह — सत्र इति। सत्रे यज्ञे। मम ब्रह्मणः। हयशिरा आस बभूव। अथो पूर्णाहुतेरनन्तरम्। यज्ञपुरुषत्वमेव व्यनक्ति छन्दोमय इति सार्धैस्त्रिभिः। तपनीयं सुवर्णम्। उशतीः कमनीया वेदाख्याः। श्वसन्तः श्वासं मुञ्चन्तः। नस्तः नासापुटात्। (भाग० २।७।११) ॥१२॥

---

1 द्रष्टव्यं रामायणम् २।१०७।१२

मत्स्यः ।

मत्स्यो युगान्तसमये मनुनोपलब्धः
क्षौणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्म-
आदाय तत्र विजहार ह वेदमार्गान् ॥१३॥

जित्वोपसर्गहानार्थं मत्स्यमाह ' मत्स्य इति । क्षौणीं नौरूपां मिनोति स्वशृङ्गे प्रक्षिपतीति क्षौणीमयः । निकायः समूहः । केतः आश्रयः । नावि प्राणिस्थापनात् । मम मुखादुरुभये सलिले विस्रंसितान् पतितान् वेदमार्गान् आदाय तत्र सलिले विजहार । वेदा एव मार्गा भुक्तेर्मुक्तेश्च । (भाग० २।७।१२) ॥१३॥

कूर्मः ।

क्षीरोदधावमरदानवयूथपाना-
मुन्मथ्नताममृतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः ॥१४॥

नरकहेतुहानार्थं कूर्ममाह ' क्षीरोदधाविति । गोत्रं मन्दराद्रिम् । निद्रां क्षणयति क्षणवतीं लब्धावसरां करोतीति निद्राक्षणः । तत्करोतीति णिच् । विन्मतोर्लुक्[1] । अद्रेः परिवर्तः सव्यापसव्यभ्रमः कषाणः कषन् घर्षणसुखप्रदो यस्यां सा कण्डूर्यस्य स तथा । (भाग० २।७।१३) ॥१४॥

नृसिंहः ।

त्रैपिष्टपोरुभयहा स नृसिंहरूपं
कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ।
दैत्येन्द्रमाशु गदयाभिपतन्तमारा-
दूरौ निपात्य विददार नखैः स्फुरन्तम् ॥१५॥

1 पाणिनिः ५।३।६५

अरण्यभयहानार्थं नृसिंहावतारमाह । त्रैपिष्टपेति । त्रैपिष्टपा देवाः । तेषामुरुभयं हन्तीति तथा । भ्रमद्भ्रुकुटिदंष्ट्रेण करालं रौद्रं वक्त्रं यस्य स तथा । भ्रुकुटिदंष्ट्रेणेति प्राण्यङ्गत्वादेकवद्भावः । आरात् समीपे । स्फुरन्तं सत्त्वोद्रेकेण । (भाग० २।७।१४) ॥१५॥

हरिः ।

अन्तःसरस्युरुबलेन पदे गृहीतो
ग्राहेण यूथपतिरम्बुजहस्त आर्तः ।
आहेदमादिपुरुषाखिललोकनाथ
तीर्थश्रवः श्रवणमङ्गलनामधेयः ॥१६॥
श्रुत्वा हरिस्तमरणार्थिनमप्रमेय-
श्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाट्य तस्मा-
द्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥१७॥

आर्तिहानार्थं हरिमाह । अन्तरिति । ग्राहो नक्रः । अरणार्थिनं शरणार्थिनम् । पतगराजो गरुडः । विनिपाट्य विदार्य । (भाग० २।७।१५-१६) ॥१६-१७॥

ग्राहात् प्रपन्नमिभराजममुञ्चदात्
संस्तुन्वतोऽङ्घ्रिपतितान् श्रमणानृषींश्च ।
शक्रश्च वृत्रवधतस्तमसि प्रविष्टं
देवस्त्रियोऽसुरगृहे पिहिता अनाथाः ॥१८॥

ग्राहादिति । प्रपन्नं शरणागतम् । संस्तुन्वतः संस्तुवतः । अङ्घ्रिपतितान् कश्यपस्य समिदाहरणे गोष्पदे मग्नान् । श्रमणानूर्ध्वरेतसो वालखिल्यान् । अपिहिता अवरुद्धाः । द्रुमिलो निमिम् । (भाग० ११।४।१८-१९) ॥१८॥

वामनः ।

ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः ।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः ॥१९॥

स्थलोपसर्गहानार्थं वामनमाह ' ज्यायानिति । कुतो ज्यायान् । यद् यस्मादिमान् लोकान् विचक्रमे । अथ प्रतिग्रहानन्तरम् । प्रतिग्रहश्च वामनरूपेण । अधियज्ञो विष्णुः ' यज्ञाधिष्ठातृत्वात् । किमस्य याचने कारणम् । यतः पथि चरन् स्वधर्मस्थः पुरुषः प्रकारान्तरेण न चाल्यो न पदाद्भ्रंशनीय इति नीतिः । (भाग० २।७।१७) ॥१९॥

नार्थो बलेरयमुरुक्रमपादशौच-
मापः शिखाधृतवतो विबुधाधिपत्यम् ।
यो वै प्रतिश्रुतमृते न चिकीर्षदन्य-
दात्मानमङ्ग मनसा हरयेऽभिमेने ॥२०

बलेर्न पदभ्रंशः किन्त्वधिकपदलाभ इत्याह ' नार्थ इति । अतस्तस्य नायं पुरुषार्थो यद्विबुधाधिपत्यम् । यतोऽसावुरुक्रमपादशौचं या आपस्ताः शिखायां शिरसि धृतवान् । यत आत्मानं प्रतिश्रुतशेषपूरणत्वेन मनसा अत्यादरेणाभिमेने अङ्गीकृतवान् । कथम्भूतमात्मानम् । यः प्रतिश्रुतं विना अन्यद् न चिकीर्षत् कर्तुं नैच्छत् । बहुलं छन्दस्यमाङ्योगेऽपि[1] इत्यडभावः । यद्यपि गुरुणा वारितः शप्तश्च । (भाग० २।७।१८) ॥२०॥

हंसः ।

तुभ्यञ्च नारद भृशं भगवान् विवृद्ध-
भावेन साधु परितुष्ट उवाच योगम् ।

1 पाणिनिः ६।४।७५ ।

ज्ञानञ्च भागवतमात्मसतत्त्वदीपं
यद्वासुदेवशरणा विदुरञ्जसैव ॥२१॥

स्त्याननाशस्य प्रहाणार्थं हंसावतारमाह । तुभ्यमिति । योगं भक्तियोगम् । सतत्त्वं तात्त्विकं रूपम् । (भाग० २।७।१९) ॥२१॥

मन्वन्तरेशः ।

चक्रञ्च दिक्ष्ववहितं दशसु स्वतेजो
मन्वन्तरेषु मनुवंशधरो बिभर्ति ।
दुष्टेषु राजसु दमं व्यदधात् स्वकीर्तिं
सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥२२॥

दुर्गोपसर्गहानार्थं मन्वन्तरेशमाह । चक्रमिति । स्वमकुण्ठितं तेजो यस्य तत् स्वतेजश्चक्रं बिभर्ति । येन चक्रवर्तीति नाम । त्रयाणां लोकानां पृष्ठे यत् सत्यं तस्मिन् ब्रह्मसभायामित्यर्थः । (भाग० २।७।२०) ॥२२॥

धन्वन्तरिः ।

धन्वन्तरिश्च भगवान् स्वयमेव कीर्ति[1]-
र्नाम्नां[2] नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्धे
आयुष्यवेदमनुशास्त्यवतीर्य लोके ॥२३॥

व्याधिहानार्थं धन्वन्तरिमाह । धन्वन्तरीति । नाम्नां कीर्तिः नामकीर्तनादित्यर्थः । वैद्यैरलभ्यं यज्ञे भागं अवरुन्धेऽलभत । कीदृशम् अमृतायुः सुस्वादुत्वादमृतम् । परिणामहितत्वादायुः । आयुःसाधनं वेदं वैद्यकम् । अनुशास्ति करोतीति । लोकेऽवतीर्य काशिराजगृहे उत्पद्य । (भाग० २।७।२१) ॥२३॥

1 भाग० कीर्तिं 2 भाग० नाम्ना

मोहिनी ।

धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥२४॥

अविरतिहानार्थं मोहिनीमाह ' धान्वन्तरमिति । धन्वन्तरिरूपं स्त्रीरूपञ्च सुरानपाययत् ' सुधामिति शेषः । अन्यानसुरान् मोहयन् । केन रूपेणामृतानयनं पायनञ्च मोहिनीस्त्रीरूपेणेत्यर्थः । सूतः शौनकम् । (भाग० १।३।१७) ॥२४॥

परशुरामः ।

क्षत्रं क्षयाय विधिनोपभृतं महात्मा
ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सुः[1] ।
उद्धन्त्यसाववनिकण्टकमुग्रवीर्य-
स्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥२५॥

अद्रिकूटोपसर्गहाणार्थं जामदग्न्यावतारमाह ' क्षत्रमिति । विधिना दैवेन । उपभृतं संवाधतम् । क्षयाय मृत्यवे । असौ विष्णुः । त्रिःसप्तकृत्व एकविंशतिवारान् । परश्वधः परशुः । (भाग० २।७।२२) ॥२५॥

श्रीरामः ।

अस्मत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्तिमार्छत् ॥२६॥

प्रवासदुःखप्रहानार्थं रामावतारमाह ' अस्मासु ब्रह्मादिषु प्रसादेन सुमुखः प्रहसितमुखः । कलेशो विष्णुः । सर्वशक्तिमयत्वात् । कलया अंशेन । गुरुः

1 भाग० नरकार्ति०

पिता। निदेशः आज्ञा। यस्मिन् विरुध्य वैरं कृत्वा। दशकन्धरो रावणः। आर्तिमार्छत् दुःखं सम्प्राप्तः। (भाग० २।७।२३) ॥२६॥

यस्मा अदादुदधिरूढभयाङ्गवेपो
मार्गं सपद्यरिपुरं हरवद्दिधक्षोः।
दूरे सुहृन्मथितरोषसुशोणदृष्ट्या
तातप्यमानमकरोरगनक्रचक्रः ॥२७॥

यस्मा इति। यस्मै रामाय उदधिर्मार्गमदात्। रूढः प्राप्तो भयजनित-सर्वाङ्गवेपो येन स तथा। सपदि शीघ्रम्। कस्माद्भयम्? दिधक्षो रामादेव। यथा त्रिपुरं हरो दिधक्षुः। दूरे सुहृदा सीतया मथितो विलोडितो यो रोषः तेन सुशोणा अतिरक्ता या दृष्टिस्तया। चक्रं समूहः। (भाग० २।७।२४) ॥२७॥

वक्षःस्थलस्पर्शरुग्नमहेन्द्रवाह-
दन्तैर्विडम्बितककुब्जयरूढहासम्[1]।
सद्योऽसुभिः सह विनेष्यति दारहर्तु-
र्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥२८॥

वक्षःस्थलेति। दारहर्तुर्दशाननस्य हासं गर्वम्। विनेष्यति नाशयिष्यति। असुभिः प्राणैः सह। अधिसैन्ये वानरसैन्यमध्ये। उच्चरत उत्कर्षेण विचरतः। धनुषो विस्फुर्जितैः उग्रशब्दैर्वानरान् विद्रावयत इत्यर्थः। रावणस्य वक्षःस्थल-स्पर्शेन रुग्ना भग्ना ये महेन्द्रस्यैरावणस्य दन्तास्तैः। विडम्बितो नटैरिवानुकृतो ध्वनिरूपेण यः ककुभां दिशां जयस्तेन रूढो हासः। अहो मे अद्भुतं वीर्यमिति विस्मयस्यानुभावो हासः। स च भग्नैरैरावतदन्तैस्तत्र तत्राभिनीत इत्यर्थः। (भाग० २।७।२५) ॥२८॥

1 ककुब्जुष ऊढहासमिति श्रीमद्भागवतीयं पाठान्तरम्।

श्रीकृष्णः ।

भूमेः सुरेतरवरूथविमर्दितायाः
क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः
कर्माणि चात्ममहिमोपनिबन्धनानि ॥२६॥

अथ सर्वान्तरायप्रहाणार्थं सर्वकामसिद्ध्यर्थञ्च कृष्णावतारं भावयेदित्याह भूमेरिति । वरूथः समूहः । कलया पूर्णरूपेण न त्वंशेन कृष्णस्तु भगवान् स्वयम्[1] इत्यनेन विरोधात् । सितं निर्मलं मुक्तिरूपम् । कृष्णं मलिनं भुक्तिरूपं यत् कं सुखं तस्येशः । केशव्याख्याने तु पूर्ववद् विरोधः । इत्थमेव ।

उज्जहारात्मनः केशौ सितकृष्णौ महामुने[2]

इति तन्त्रान्तरोक्तिरपि व्याख्येया । केशौ सुखस्वामिनौ । सितो रामः । आत्मनः स्वमूर्तेः सकाशादुज्जहार उद्धृतवान् कल्पितवान् । हरिवंशे हि भगवान् कस्यांश्चिद्गिरिगुहायां स्वमूर्तिं निक्षिप्य गरुडञ्च तत्रावस्थाप्य स्वयमत्रागत इत्युक्तम् । तदुक्तं हरिवंशे

स देवानभ्यनुज्ञाय विविक्ते त्रिदशालये ।
जगाम विष्णुः स्वं देशं क्षीरोदस्योत्तरां दिशम् ॥
तत्र वै पार्वती नाम गुहा देवैः सुदुर्गमा ।
त्रिभिस्तस्यैव विक्रान्तैर्नित्यं पर्वसु पूजिता ॥
पुराणं तत्र विन्यस्य देहं हरिरुदारधीः ।
आत्मानं योजयामास वसुदेवगृहे विभुः ॥

यैस्तु यथाश्रुतमेवेदं व्याख्यातम् ते न सम्यगदृष्टवन्तः यतः सुरमात्रस्यापि निर्जरत्वरूपप्रसिद्धावकालकलिते भगवति जरानुदयेन केश-

1 भागवतम् १।३।२८　　　　2 विष्णुपुराणम् ५।१।५९

शौक्ल्यानुपपत्तिः। न चास्य केशेषु नैसर्गिकी सितकृष्णतेति प्रमाणमस्ति। अत एव नरसिंहपुराणे कृष्णावतारप्रसङ्गे शक्तिशब्द एव प्रयुक्तो न तु केशशब्दः। तथा हि

वसुदेवाच्च देवक्यामवतीर्य महीतले।
सितकृष्णे च तच्छक्ती कंसाद्यान् घातयिष्यतः॥

इत्यादिना। अस्तु तर्हि अंशोपलक्षणः केशशब्दः। नोऽविलुप्तसर्वशक्तित्वेन साक्षादादिपुरुषत्वस्यैव निश्चेतुं शक्यत्वात्। विष्णुकृष्णादिशब्दानामविशेषतः पर्यायत्वप्रतीतेश्च। नैवमवतारान्तरेषु कस्य वान्यस्य जन्मदिनं जयन्त्याख्ययातिप्रसिद्धम्। अत एवोक्तं महाभारते—

भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।
शाश्वतं ब्रह्म परमं योगिध्येयं निरञ्जनम्॥ इति।

यत्तूक्तं ततो जगन्मङ्गलमच्युतांशमिति[1]। तत्र बहुव्रीहिः। यच्च तत्रांशेनावतीर्णस्येति। तत्रांशेन सह इत्यर्थः। अंशो बलभद्रः। एवं सर्वत्र। एतेन मत्केशौ वसुधातलमित्यपि व्याख्यातम्। यत्तु

ताविमौ वै भगवतो हरेरंशाविहागतौ[2]।

इति। तदन्यकल्पविषयम्। यद्वा अंशश्च अंशश्च अंशौ। तत्रैकोऽंशशब्दो यथास्थितोऽर्जुनविषयः। अन्यस्तु अंशाः सन्त्यस्येत्यंशः। अर्शाद्यच्प्रत्ययान्तो भगवद्विषयः। यत्राद्यभिन्न इत्यादि हि प्रागुक्त इत्यलमतिप्रसङ्गेन। आत्मनः श्रीकृष्णस्य महिमोपनिबध्यते सम्बद्धो दृश्यते येषु कर्मसु तानि। अनन्यसाध्यानीत्यर्थः। (भाग० २।७।२६) ॥२६॥

तोकेन जीवहरणं यदुलूकिकाया-
स्त्रैमासिकस्य च पदा शकटोपवृत्तः।

---

1 भागवतम् १०।२।१८

2 भागवतम् ४।१।५८

यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा
उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम् ॥३०॥

तानि च कुर्वतोऽस्य मार्गो जनैर्नोपलभ्यते। तान्येवाह तोकेनेति। तोको बालः। उलूकिका पूतना। पदा पादेन। उपवृत्तः पर्यस्तीभूतः। रिङ्गता जानुभ्यां गच्छता। अन्तरगतेन मध्यं प्राप्तेन। दिविस्पृशोः अर्जुनयोः। उन्मूलनम्। एतत् कर्मत्रयम्। न भाव्यं यदि स्वमहिमानं न दर्शयेत्। (भाग० २।७।२७) ॥३०॥

यद्वै व्रजे व्रजपशून् विषतोयपीतान्
[1]गोपांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या।
तच्छुद्धयेऽतिविषवीर्यविलोलजिह्व-
मुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम् ॥३१॥

यद्वै व्रज इति। विषरूपे तोये पीतं पानं येषां ते तथा। तुशब्दश्चार्थे। तच्छुद्धये ह्रदिनीशुद्धये। उच्चाटयिष्यत् उच्चाटितवान्। अतीतमात्रे लुङ्। अतीतकल्पापेक्षया उन्नेष्यतीत्यादि भविष्यत्त्वम्। उरगं कालियम्। ह्रदिनी यमुना। (भाग० २।७।२८) ॥३१॥

तत् कर्म दिव्यमिव यन्निशि निःशयानं
दावाग्निना शुचिवने परिदह्यमाने।
उन्नेष्यति व्रजमतोऽवसितान्तकालं
नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः ॥३२॥

तत्कर्मेति। इवशब्दो वाक्यालङ्कारे। शुचिवने ग्रीष्मवने। उन्नेष्यति उद्धरिष्यति। अतो दावाग्नेः अवसितो निर्णीतः अन्तकालो मृत्युर्यस्य तत्तथा। नेत्रे पिधाय पिहिते कारयित्वा। स बलः बलभद्रः। (भाग० २।७।२९) ॥३२॥

---

1 भाग० पाशानजीवयदनु०

गृह्णीत यद्यदुपबन्धममुष्य माता
शुल्वं सुतस्य न तु तत्तदमुष्य माति ।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी
संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥३३॥

माता यशोदा । शुल्वं दाम । न माति यावदाबध्यते तावन्मानं न लभते । संवीक्ष्य दृष्ट्वा । प्रतिबोधिता विष्णुरयमिति सञ्जातबोधा । (भाग० २।७।३०) ॥३३॥

नन्दश्च मोक्ष्यति भयाद्वरुणस्य पाशाद्
गोपान् बिलेषु पिहितान् मयसूनुना च ।
अह्न्यापृतं निशि शयानमतिश्रमेण
लोकं विकुण्ठमुपनेष्यति गोकुलं स्म ॥३४॥

नन्दश्चेति । पाशाद् भयं तस्मात् । मयसूनुर्व्योमः । आपृतं व्यापृतम् । विकुण्ठे वैकुण्ठे । उप समीपे नेष्यति । (भाग० २।७।३१) ॥३४॥

गोपैर्मखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्त-
वर्षो महीध्रमनघैककरे सलीलम् ॥३५॥

रिरक्षुः रक्षितुमिच्छुः । आर्षमनिट्त्वम् । ऊच्छिलीन्ध्रं छत्राकारं वर्षासु भवति । महीध्रं गोवर्धनम् । हे अनघ ! नारद । (भाग० २।७।३२) ॥३५॥

क्रीडन् वने निशि निशाकररश्मिगौर्यां
रासोन्मुखः कलपदायतमूर्छितेन ।
उद्दीपितस्मररुजां व्रजभृद्वधूनां
हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥३६॥

क्रीडन्निति । गौर्यां शुक्लायाम् । रासोन्मुखः रासक्रीडायामासक्तः ।

कलैर्मधुरैः पदैः आयतमालापेन दीर्घतां नीतं यन्मूर्छितं मूर्छनाख्यं गीतं तेन। उद्दीपितो यः स्मरः स एव रुग् मदनजपीड़ा यासां तास्तथा। धनदानुजः शङ्खचूड़ः। (भाग० २।७।३३) ॥३६॥

ये च प्रलम्बखरदर्दुरकेश्यरिष्ट-
मल्लेभकंसयवनाः [1]कुजपौण्ड्रकाद्याः।
अन्ये च [2]साल्वकपिवल्कलदन्तवक्र-
सप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥३७॥

ये चेति। प्रलम्बाद्याः रुक्मिपर्यन्ताः एकोनविंशतिः। कुजो भौमः। कपिर्द्विविदः। वल्कलो यो नैमिषे बलभद्रेण हतः। सप्तोक्षं सप्तवृषाः। (भाग० २।७।३४) ॥३७॥

ये वा मृधे समितिशालिन आत्तचापाः
काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः।
यास्यन्त्यदर्शनमलं बलपार्थभीम-
व्याजाह्वयेन हरिणा निलयं तदीयम् ॥३८॥

ये वेति। समितौ संग्रामे शालन्ते ते समितिशालिनः। हरिणा सह मृधे संग्रामे सति काम्बोजाद्याः तदीयं निलयं यास्यन्ति। न विद्यते दर्शनमलो रागादिर्यत्र निलये स तथा। बलपार्थभीमा व्याजाह्वयाः कपटनामानि यस्य तेन। तत्त्वतस्तु बलभद्रादयो हरिनामान एव। (भाग० २।७।३५) ॥३८॥

व्यासः

कालेन मीलितधियामवमृश्य नृणां
स्तोकायुषां स्वनिगमो बत दूरपारः।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां
वेदद्रुमं विटपशो विभजिष्यति स्म ॥३९॥

1 भाग० कपिपौण्ड्र०　　2 भाग० साल्वकुजवल्कल०

अशेषसन्देहहानार्थं व्यासावतारमाह ' कालेनेति । स्वनिगमः स्वकृतो वेदराशिः । बत अहो । दूरपारः दूरस्थितपर्यन्त इत्यवमृश्य । आविर्हितः अवतीर्णः । अनुयुगं द्वापरे । विटपशः शाखाभेदेन । (भाग० २।७।३६) ॥३९॥

बुद्धः

देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन रचिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥४०॥

भ्रान्तिदर्शननिवृत्त्यर्थं बुद्धावतारमाह ' देवेति । पूर्भिः पुरीभिः । अदृश्यतूर्भिरलक्षितभ्रमणवेगाभिः । विमोहो गृहीतत्यजनेऽशक्तिः । प्रलोभोऽन्यस्यक्तार्थग्रहणे । भाष्यते उच्यते विष्णुना । औपधर्म्यं धर्माभासः । स्वार्थे ष्यञ्[1] । (भाग० २।७।३७) ॥४०॥

कल्किः

यर्ह्यालयेष्वपि सतां न कथा हरेः स्युः
पाषण्डिनो द्विजजना वृषला नृदेवाः ।
स्वाहा स्वधा वषडिति स्म गिरो न यत्र
शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥४१॥

कलिदोषनिरासार्थं कल्किनमाह ' यर्ह्येति । यर्हि यदा पाषण्डिनो वेदबाह्याचाराः । नृदेवा राजानः यदा वृषलाः शूद्राः । एषाश्च फलोक्तिः । षष्ठस्याष्टमेऽध्यायेऽनुक्ते तु लिङ्गैकं फलमूह्यम् । ब्रह्मा नारदम् । (भाग० २।७।३८) ॥४१॥

---

1 पाणिनिः ५।४।२४ वाः ।

मन्वन्तरावताराः ।

एवं कल्पावतारानुक्त्वा मन्वन्तरावतारानाह । मन्वन्तरेति ।

यज्ञः

इति मन्त्रोपनिषदं व्याहरन्तं समाहितम् ।
दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा ॥४२॥

स्वायम्भुवीये मन्वन्तरे जातं यज्ञमाह । यज्ञ इति । इति पूर्वोक्तप्रकारेण मन्त्रोपनिषदमीशावास्येति रहस्यमन्त्रं[1] व्याहरन्तं जपन्तं स्वायम्भुवं जग्धुं खादितुं क्षुधाविष्टाः । (भाग० ८।१।१७) ॥४२॥

तांस्तथावसितान् वीक्ष्य यज्ञः सर्वगतो हरिः ।
यामैः परिवृतो देवैर्हत्वाशासत्त्रिविष्टपम् ॥४३॥

अवसितान् । अवेति गतमित्यर्थे । सितं बन्धनम् । ततो बहुव्रीहिः । एतेनोच्छृङ्खलानित्यर्थः । (भाग० ८।१।१८) ॥४३॥

विभुः

ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ।
तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥४४॥

स्वारोचिषीये विभुमाह । ऋषेरिति । तस्यां तुषितायाम् । ततो वेदशिरसः । (भाग० ८।१।२१) ॥४४॥

अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ।
अन्वशिक्षन् व्रतं तस्य [2]कौमाराद्ब्रह्मचारिणः ॥४५॥

तस्य विभोः कौमारात् कुमारत्वात् । ब्रह्मचारिणः व्रतमाबाल्याद् ब्रह्मचर्यम् । (भाग० ८।१।२२) ॥४५॥

---

1 ईशोपनिषत् १।१　　2 भाग० कौमारब्रह्म०

सत्यसेनः धर्मः

धर्मस्य सूनृतायान्तु भगवान् पुरुषोत्तमः ।
सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥४६॥
सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ।
भूतद्रुहो भूतगणानवधीत् सत्यजित्सखः ॥४७॥

उत्तमे मन्वन्तरे सत्यसेनमाह । धर्मस्येति । धर्मः पिता । सूनृता माता । सत्यव्रता देवा भ्रातरः । सत्यजित्तदानीन्तन इन्द्रः । (भाग० ८।१।२५-२६) ॥४६-४७॥

हरिः

तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः ।
हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ॥४८॥

तामसीये हरिमाह । तत्रापीति । हरिणी माता । हरिमेधाः पिता । शुकः राजानम् । (भाग० ८।१।३०) ॥४८॥

वैकुण्ठः

पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ।
तयोः सकलया जज्ञे वैकुण्ठो भगवान् स्वयम् ॥४९॥
वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः ।
रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥५०॥
तस्यानुभावः कथितो गुणाश्च परमोदयाः ।
भौमान् रेणून् स विममे यो विष्णोर्वर्णयेद्गुणान् ॥५१॥

रैवतीये वैकुण्ठमाह । पत्नीति । शुभ्रः पिता । तत्प्रियकाम्यया लक्ष्म्याः प्रियचिकीर्षया । (भाग० ८।५।४-६) ॥४९—५१॥

अजितः

तत्रापि देवसम्भूत्यां वैराजस्याभवत् सुतः ।
अजितो नाम भगवानंशेन जगतीपतिः ॥५२॥

चाक्षुषीयेऽजितमाह । तत्रापीति । षष्ठे मन्वन्तरे । संभूतिर्माता । वैराजः पिता । (भाग० ८।५।९) ॥५२॥

कूर्मः

पयोधिं येन निमथ्य सुराणां साधिता सुधा ।
भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मन्दरः ॥५३॥

येन अजितेन । शुकः राजानम् । (भाग० ८।५।१०) ॥५३॥

वामनः

अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ।
आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥५४॥

वैवस्वतीये वामनमाह । अत्रापीति । अत्रापि सप्तमे मन्वन्तरे । आदित्याः अदितिपुत्राः । अवरजः कनिष्ठः । (भाग० ८।१३।६) ॥५४॥

सार्वभौमः

देवगुह्यात् सरस्वत्यां सार्वभौम इति प्रभुः ।
स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः ॥५५॥

सावर्णीये सार्वभौममाह । देवेति । सरस्वती माता । स्थानमिन्द्रपदम् । पुरन्दरो वर्तमान इन्द्रः । (भाग० ८।१३।१७) ॥५५॥

ऋषभः

आयुष्मतोऽम्बुधारायामृषभो भगवान् किल ।
भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥५६॥

दक्षसावर्णीये ऋषभावतारमाह । आयुष्मतेति । अम्बुधारा माता । अद्भुतो नव इन्द्रः । (भाग० ८।१३।२०) ॥५६॥

विष्वक्सेनः

विष्वक्सेनो विसूच्यान्तु शम्भोः सख्यं करिष्यति ।
जातः स्वांशेन भगवान् गृहे विश्वजितो विभुः ॥५७॥

ब्रह्मसावर्णीये विष्वक्सेनमाह ' विष्वगिति । शम्भुरिन्द्रः । विश्वजित् पिता । (भाग० ८।१३।२३) ॥५७॥

धर्मसेतुः

आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ।
वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥५८॥

धर्मसावर्णीये धर्मसेतुमाह ' आर्यकस्येति । वैधृत इन्द्रः । (भाग० ८।१३।२६) ॥५८॥

स्वधामा

[1]स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ।
अन्तरं सत्यसहसः सूनृतायाः सुतो विभुः ॥५९॥

भद्रसावर्णीये स्वधामानमाह ' स्वधामेति । तस्य भद्रसावर्णेर्मनोः । अन्तरं मन्वन्तरम् । साधयिष्यति पालयिष्यति । सत्यसहाः पिता । (भाग० ८। १३।२९) ॥५९॥

योगेश्वरः

देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥६०॥

देवसावर्णीये योगेश्वरमाह ' देवहोत्रस्येति । उपहर्ता अर्पयिष्यति । दिवस्पतेरिन्द्रस्य अर्थादिन्द्रपदम् । (भाग० ८।१३।३२) ॥६०॥

1 'सुधामाख्यो' इति क्वचिद्दृष्ट' भागवतीयं पाठान्तरम् ।

बृहद्भानुः

सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः ।
विनतायां[1] महाराज क्रियातन्तून् वितायिता ॥६१॥

इन्द्रसावर्णीये बृहद्भानुमाह ' सत्रायणेति । तदा चतुर्दशे । मन्वन्तरेशानां कल्पावतारत्वं मन्वन्तरावतारत्वञ्च काकतालीयन्यायेन यौगपद्यासम्भवात् । मन्वन्तरेशस्तु प्रागुक्तोऽप्यनुसन्धेयः । शुकः राजानम् । (भाग० ८।१३।३५) ॥६१॥

युगावताराः

[शुक्लः]

कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः ।
कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलू ॥६२॥

युगावतारानाह ' कृतेति । शुक्ल इति नामतो वर्णतश्च । अक्षः अक्षसूत्रम् । कृष्णाजिनादीनि बिभ्रत् । ब्रह्मचारिवेश इत्यर्थः । (भाग० ११।५।२१) ॥६२॥

हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरोऽमलः ।
ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥६३॥

तन्नामान्याह ' हंस इति । हन्ति गच्छति जानाति सर्वमिति हंसः । हन्तेर्गत्यर्थस्य कर्तर्यौणादिकः सः । सुपर्णः परमात्मा । द्वासुपर्णेति श्रुतेः[2] । विकुण्ठा माया तामधितिष्ठतीति वैकुण्ठः ' शैषिकोऽण्[3] । धारयतीति धर्मः । योगः समाधिः । परमात्मा ब्रह्म । (भाग० ११।५।२३) ॥६३॥

रक्तः

त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः ।
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥६४॥

त्रेतायामिति । त्रिमेखलः । त्रिगुणा मेखला दीक्षाङ्गभूता यस्य सः तथा । दीक्षितवेश इत्यर्थः । असौ विष्णुः । (भाग० ११।५।२४) ॥६४॥

1 'वितानायां' इति क्वचिद्दृष्टं भागवतीयं पाठान्तरम् ।
2 मुण्डकोप० ३।१।१
3 पाणिनिः ४।२।९२ वाः

विष्णुयज्ञः पृश्निगर्भः सर्ववेद उरुक्रमः ।
वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते ॥६५॥

विष्णुरिति। पृश्निः सुतपसः प्रजापतेर्भार्या। तस्याः पुत्रः। सर्वे वेदा यस्मिन् स तथा। वर्षति पुण्यफलमाकम्पयति च पापफलं दानेनेति वृषाकपिः। जयत्येव सदेति जयन्तः। उरुर्महान् गायो गानं यस्य स तथा। (भाग० ११। ५।२६) ॥६५॥

पीतः

द्वापरे भगवान् श्यामः पीतवासा निजायुधः ।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥६६॥

निजानि चक्राणि। आदिशब्दाद् वज्रध्वजसरोजयवाङ्कुशादीनि। सहजं चिह्नमङ्कः। आगन्तुकं लक्षणं कौस्तुभादिराजवेश इत्यर्थः। (भाग० ११।५। २७) ॥६६॥

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय [1]सर्वभूतात्मने नमः[1] ॥६७॥

तन्नामान्याह' नम इति। वासुदेव-संकर्षण-प्रद्युम्नानिरुद्धा महदहङ्कार-मनोबुद्धीनां सङ्कल्पाभिमान-संशय-निश्चयहेतूनामन्तःकरणानामधिष्ठातारः। (भाग० ११।५।२९) ॥६७॥

कृष्णः कलौ ।

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्र-पार्षदम् ।
यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥६८॥

कृष्णः कलौ। त्विषा अकृष्णम् इन्द्रनीलोज्ज्वलम्। अङ्ग मुखादि' उपाङ्गं कर्णादि' अस्त्रं चक्रादि' पार्षदः सुनन्दादिः' तैः सहितम्। वेषस्य च विशेषानिर्देशात् यथाभिमतत्वं गम्यते। यज्ञैर्देवतार्चनैः

1...1 भाग० तुभ्यं भगवते नमः

आराधयन्तीत्यर्थः। संकीर्तनप्रायैः नामसंकीर्तनप्रधानैः। द्वापरे तु पूजायाः प्राधान्यम्। तदुक्तम्[1]

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्॥

इति। (भाग० ११।५।३२) ॥६८॥

नारायणाय ऋषये पुरुषाय महात्मने।
विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः॥६९॥
ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्तिहं प्रणतपाल भवाब्धिपोत
वन्दे महापुरुष ते चरणारविन्दम्॥७०॥

कलौ यत्किञ्चिन्महिमानुवर्णनं तत्सर्वं नामावृत्तितुल्यमिति सूचयितुं नामावसरे स्तुतिमाह' ध्येयमिति। हे प्रणतपाल! ते चरणारविन्दं वन्दे। तत् किम्? यथा राजादिसेवा लघुत्वापादिका तथास्यावनतिर्नेत्याह' महापुरुषेति। न च योगादिवत्तत्सेवायामायास इत्याह' ध्येयमिति। सुखहेतुतया सदा ध्यातुमुचितम्। तदुक्तम्[2]

आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम्।
पापक्षयश्च भवति स्मरतां तमहर्निशम्॥

इति। तर्हि किन्तावदेव फलम्? नेत्याह' परीति। परिभवं हन्ति मनोरथं पूरयतीत्यर्थः। यद्यप्यन्यदेवता अप्येवं तथापि ता नाशेषपापक्षये क्षमाः। इदन्तु क्षमत इत्याह' तीर्थेति। तीर्थं गङ्गा' आस्पदम् आश्रयः' अत एव भवविरिञ्चिभ्यामपि स्तुतम्। का वार्तान्यदेवतानाम्। तस्मादाश्रयणयोग्यमित्याह' शरण्यमिति। महद्भिः सेव्यमानत्वाद् गम्भीरम्।

---

1 विष्णुपुराणम् ६।२।१७

2 विष्णुपुराणम् १।१७।७८

ततश्च न गणयत्यल्पकानित्यपि नास्तीत्याह ' भृत्येति । प्रसन्नगम्भीरञ्चेत्यर्थः । यथा चान्यैः शमिताप्यार्तिः पुनरुदेति न तथाऽत्रेत्याह ' भवेति । (भाग० ११।५।३०।३३) ॥६६-७०॥

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्मिष्ठ आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्-
वन्दे महापुरुष ते चरणारविन्दम् ॥७१॥

प्रसन्नगम्भीरतामेवाह ' त्यक्त्वेति । अरण्यगमनमपि घटते प्रतिकूल-परिजनादुपक्षीणाद्वा राज्यादित्यत आह ' सुदुस्त्यजसुरेप्सितेति । तर्हि किमनित्यपरिज्ञानाद् बलवद्भयाद्वा ? नेत्याह ' आर्येति । यथा पिता प्रस्थापयितुं शक्नोति तथा किमपि किं निगूढं दूषणमस्ति । नेत्याह ' धर्मिष्ठ इति । अनिच्छतोऽपि पितुः सत्यपालनायेत्यर्थः । गाम्भीर्यमुक्त्वा प्रसन्नता-माह ' मायेति । मृगरूपं मारीचम् । दयिता सीता । धर्मिष्ठत्वादिको रामव्यापारस्तच्चरणे समारोप्यतेऽतिशयार्थम् । यथा—

यामि मनोवाक्कायैः शरणं करुणात्मकं जगन्नाथम् ।
जन्मजरामरणार्णवतारणतरिमुदाराङ्घ्रियुगम् ॥

इति । करभाजनो निमिम् । (भाग० ११।५।३४) ॥७१॥

स्वल्पावतारः ।

सर्गे तपोऽहमृषयो नव ये प्रजेशाः
स्थानेऽथ धर्ममखमन्वमरावनीशाः ।
अन्ते त्वधर्महरमन्युवशासुराद्या
मायाविभूतय इमाः पुरुशक्तिभाजः ॥७२॥

श्रीवोपदेवकृते मुक्ताफले विष्णववताररूपम् ।

इति तृतीयोऽध्यायः ॥३॥

स्वल्पावतारमाह ' सर्ग इति । अहं ब्रह्मा । प्रजेशाः प्रजापतयः । स्थानं पालनम् । धर्मो यज्ञाधिष्ठात्री देवता । हरो रुद्रः । मन्युवशाः सर्पादयः । ब्रह्मा नारदं प्रति ।

एषाञ्च स्वल्पत्वेन युगमन्वन्तरकल्पावतारेषु क्रमादल्पत्वं महत्त्वं महत्तरत्वं महत्तमत्वञ्चेति गम्यते । (भाग० २।७।३६) ॥७२॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्ण्वतारररूपम् ।

समाप्तोऽयं तृतीयोऽध्यायः ॥३॥

चतुर्थोऽध्यायः

विष्णोरधिष्ठानरूपाणि द्वाविंशतिः ।

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ।

अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥१॥

एवं योगान्तरायप्रतिघातार्थं भगवज्जन्मकर्मानुसन्धानमुक्त्वेदानीमभेदभावनया विक्षिप्तादिचित्तभूमिकाजयार्थमेकाग्रतासम्पादनार्थञ्च भगवतोऽधिष्ठानान्याह । विष्णोरिति । विष्णोरधिष्ठितानि रूपाणि द्वाविंशतिः । तेषां पूज्यत्वमाह । अथेति । भूतानां देहे कृतालयं क्षेत्रज्ञम् । दानं दीनेषु । मानमुत्तमेषु । मैत्री समेषु । अभिन्नेन चक्षुषा सर्वात्मा विष्णुरिति तेषां बुद्धया । (भाग० ३।२९।२७) ॥१॥

जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ।
ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥२॥
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ।
तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः ॥३॥
रूपभेदविदस्तत्र ततश्चोभयतोदतः ।
तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ।४॥
ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥५॥

जीवा इति । हे शुभे देवहूते ! सजीवनिर्जीवयोः सजीवः श्रेष्ठः । प्राणय-

प्राणिनोः सजीवयोः प्राणी । सचित्ताचित्तयोः प्राणिनोः सचित्तः । स्पर्शज्ञा-स्पर्शज्ञयोः सचित्तयोः स्पर्शज्ञः । रसज्ञारसज्ञयोः स्पर्शज्ञयो रसज्ञः । गन्धज्ञागन्धज्ञयो रसज्ञयोर्गन्धज्ञः । शब्दज्ञाशब्दज्ञयोर्गन्धज्ञयोः शब्दज्ञः । रूपज्ञारूपज्ञयोः शब्दज्ञयो रूपज्ञः । उभयतोदन्तैकदन्तयो रूपज्ञयोः उभयतोदतः । सपादापादयोरुभयतोदन्तयोः सपादः । चतुष्पदबहुपदयोः सपादयोश्चतुष्पादः । हस्तीभूतपादद्वयाहस्तीभूतपादद्वययोश्चतुष्पादयोर्हस्तीभूतपादद्वयः । वर्णावर्णयोर्हस्तीभूतपादयोर्वर्णः । ब्राह्मणाब्राह्मणयोर्वर्णयोर्ब्राह्मणः । वेदज्ञा-वेदज्ञयोर्ब्राह्मणयोर्वेदज्ञः । वेदार्थज्ञावेदार्थज्ञयोर्वेदज्ञयोर्वेदार्थज्ञः । (भाग० ३।२६।२८-३१) ॥२-५॥

अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वधर्मकृत् ।
मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ॥६॥

संशयच्छेद्यसंशयच्छेदिनोर्वेदार्थज्ञयोः संशयच्छेदी । स्वधर्मनिष्ठाधर्मनिष्ठयोः संशयच्छेदिनोः स्वधर्मनिष्ठः श्रेयान् । यथालाभसन्तुष्टायथालाभसन्तुष्टयोः स्वधर्मनिष्ठयोर्यथालाभसन्तुष्टः श्रेयान् । धर्मानुजीविधर्मोपजीविनोर्यथा-लाभसन्तुष्टयोर्धर्मानुजीवी । (भाग० ३।२६।३२) ॥६॥

तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः ।
मय्यर्पितात्मनः पुंसो मयि सन्न्यस्तकर्मणः ।
न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥७॥

विष्णुभक्ताविष्णुभक्तयोर्धर्मानुजीविनोर्विष्णुभक्तः । इन्द्रियवृत्तित्वं स्पर्शज्ञानादिसामान्यं न स्वतन्त्रम् । क्रिया उद्यमः । अर्थस्तत्फलम् । आत्मा कर्ता भोक्ता च । विष्णुप्रीत्यर्थमेवोद्यमः । फलन्त्वानुषङ्गिकम् । विष्णुप्रीत्यर्थमेव फल-भोगः । आत्मतुष्टिस्त्वानुषङ्गिकी । विष्णुप्रीत्यर्थमेवात्मधारणम् । मुक्तिस्त्वानु-षङ्गिकी । अर्पणशब्दार्थो निरन्तरमस्याश्चित्तवृत्तेरखण्डता मय्यर्पितेति । श्लोक-षट्केन विष्णुभक्तप्रशंसा । परं श्रेष्ठम् । कपिलो देवहूतिम् । (भाग० ३।२६।३३)॥७॥

नाहं तथाद्मि यजमानहविर्विताने
श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन ।
यद् ब्राह्मणस्य मुखतश्चरतोऽनुघासं
तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥८॥

हुतभुङ्मुखेन विताने यज्ञे अदन् अश्नन् तथा नाद्मि । किम्भूतम् श्च्योतता क्षरता घृतेन प्लुतम् आलोडितम् । यद् यथा ब्राह्मणस्य मुखेन चरतः अश्नतः अनुघासम् प्रतिग्रासम् अद्मि । सन्तुष्टस्य मयि नारायणे अवहितैः अर्पितैः निजकर्मजपाकैः प्रारब्धकर्मजनितैः शुभाशुभैः । अर्पणञ्च नारायणायेति समर्पयेत्तदिति वक्ष्यति । (भाग० ३।१६।८) ॥८॥

येषां बिभर्म्यहमकुण्ठविकुण्ठयोग-
मायाविभूतिरमलाङ्घ्रिरजः किरीटैः ।
विप्रान्नु को न विषहेत यदर्हणाम्भः
सद्यः पुनाति सहचन्द्रललामलोकान् ॥९॥

येषामिति । कः पुरुषः विप्रान् न विषहेत तत्कृतं क्रोधं न सहेत । यैर्विप्रैः सत्यलोकवासिभिः त्रिविक्रमत्वे मच्चरणार्हणीकृतं पदं नभोगङ्गारूपम् । चन्द्रललामेन शिवेन सह त्रीन् लोकान् अद्यापि सद्यः पुनाति । तथा येषाममलमङ्घ्रिरजोऽहं साहस्रैः किरीटैर्बिभर्मि । अकुण्ठा अखण्डा देशकालाभ्याम् विकुण्ठाख्यलोकरूपा योगमाया विभूतिर्यस्य स तथा । (भाग० ३।१६।९) ॥९॥

ये मे तनूर्द्विजवरान् [1]दुहतीर्मदीया
भूतान्यलब्धशरणानि च भेदबुद्ध्या ।
द्रक्ष्यन्त्यघक्षतदृशो ह्यहिमन्यवस्तान्
गृध्रा रुषा मम कुशन्त्यधिदण्डनेतुः ॥१०॥

---

1 दुहितॄरिति स्वामिधृतं पाठान्तरम् ।

ये म इति। द्विजवरान् ब्राह्मणान्। मदीया दुहतीर्दुहितॄः धेनूः। गावो हि सूर्यात् प्रसूताः। सूर्यश्च विष्णुः। अलब्धशरणानि रक्षकहीनानि भूतानि च। एता मम तनवः ममाधिष्ठानानि। तानि ये भेदबुद्धया अनधिष्ठानबुद्धया द्रक्ष्यन्ति विष्णुं भजन्तोऽपि तेषामपकारं करिष्यन्ति नोपकारम्। यद्यपि सर्वं विष्णोरधिष्ठानं तथाप्यत्र कृतावुपकारापकारौ झटिति विष्णुं स्पृशतः। ममत्वातिरेकात्। अघहतदृशः पापैरन्धीकृतदृष्टयः। अहिमन्यवः सर्पक्रोधाः। सर्पाः खल्वेतेनैव क्रुध्यन्ति। न च क्रोधं त्यजन्ति। तान् पुरुषान् गृध्राः गृध्राकारा यमदूताः कुशन्ति छिन्दन्ति घातयन्ति। मम रुषा प्रेरिताः। अहं हि दण्डनेतॄणां यमादीनामधिष्ठाता। (भाग० ३।१६।१०) ॥१०॥

ये ब्राह्मणान् मयि धिया क्षिपतोऽर्चयन्त-
स्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः।
वाण्यानुरागकलयात्मजवद् गृणन्तः
सम्बोधयन्त्यहमिवाहमुपाकृतस्तैः ॥११॥

ये ब्राह्मणानिति। ये ब्राह्मणान् सम्बोधयन्ति तैरहमुपाकृतः कृतषोडशोपचारः। मयि धिया अर्चयन्तः विष्णुबुद्धया पूजयन्तः। क्षिपतः तिरस्कारान् कुर्वतोऽपि तुष्यद्हृदः प्रीयमाणचित्ताः। पापमयैरित्यतस्तिरस्कारादिति। पद्मोपमं ब्राह्मणवक्त्रं क्रोधाग्निना शुष्यत् स्मितसुधया सिञ्चन्तः आत्मजवत् पुत्रानिव गृणन्तः स्तुवन्तः। अहमिव अहं यथा सम्बोधयामि। भगवान् चतुःसनम्। (भाग० ३।१६।११) ॥११॥

यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधीः।
यत्तीर्थबुद्धिः सलिले न कर्हिचि-
ज्जनेष्वभिज्ञेषु स एव गोखरः ॥१२॥

व्यतिरेकभङ्ग्यापि प्रशंसन्ति यस्येति। कुणपं निर्जीवं शरीरम्। त्रिधातुकं तेजोऽबन्नात्मकत्वात् वातपित्तकफबद्धत्वाद्वा। स्वधीः आत्मीयबुद्धिः। भौमे प्रतिमादौ इज्यधीः पूज्यबुद्धिः। यद् यस्य जले तीर्थबुद्धिः। न त्वभिज्ञेषु भक्तेषु। कर्हिचित् कदाचित्। गोखर इति अज्ञत्वनिन्द्यत्वे उक्ते। भगवान् कुरुक्षेत्रे मिलितान् मुनीन्। (भाग० १०।८४।१३) ॥१२॥

मनसैतानि भूतानि प्रणमेद् बहुमानयन्।
ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥१३॥

तत्त्वतस्तु विष्णोरधिष्ठानमित्याह। मनसेति। भगवान् प्रविष्ट इति। मनसा बहुमानयन्। (भाग० ३।२९।३४) ॥१३॥

अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा।
तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनम् ॥१४॥

प्रतिमैकपूजकं निन्दन्ति अहमिति। अर्चा प्रतिमा। (भाग० ३।२९।२१) ॥१४॥

यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्।
हित्वार्चां भजते मौढ्याद् भस्मन्येव जुहोति सः ॥१५॥

यो मामिति। सत्त्वान्नित्यत्वम्। आत्मत्वान्निर्निमित्तप्रेमास्पदत्वम्। ईश्वरत्वात् फलदातृत्वम्। हित्वा त्यक्त्वा। योऽर्चां प्रतिमां भजते सोऽग्निं हित्वा भस्मन्येव जुहोति। (भाग० ३।२९।२२) ॥१५॥

द्विषतः परकाये मां प्राणिनो भिन्नदर्शिनः।
भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥१६॥

भस्मवत् प्रतिमापूजनस्य निष्फलहेतुत्वमाह। द्विषत इति। मनःशान्तिर्हि फलम्। सा च द्वेषहानेः। सा च सर्वात्मा विष्णुरिति दर्शनात्। तच्च प्रतिमैव विष्णुरिति पश्यतो नास्ति। (भाग० ३।२९।२३) ॥१६॥

अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे ।
नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥१७॥

प्रतिमार्चनाद्विष्णोस्तुष्टिस्ततो मनःशान्तिरिति चेत् सापि नास्तीत्याह ' अहमिति । उच्चावचैर्विविधैः । क्रियया पूजया । हे अनघे देवहूते ! द्रव्यैरुत्पन्नया न तु कर्तृगुणेन । स हि मां द्वेष्ट्यर्चयति च । (भाग० ३।२६।२४) ॥१७॥

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ।
यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥१८॥

यस्तु नो द्वेष्टि किन्तु सर्वात्मा विष्णुरिति न जानाति ' स यावन्न जानाति तावदर्चादावर्चयेदित्याह ' अर्चादाविति । आदिशब्दादुक्तेष्वधिष्ठानेषु क्रमाद् विष्णुबुद्धिं कुर्वन् सर्वात्मा विष्णुरिति जानीयात् । (भाग० ३।२६।२५) ॥१८॥

आत्मनश्च परस्यापि यः करोत्यन्तरोदरम् ।
तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥१९॥

तज्ज्ञानं विना मृत्युभयं न निवर्तते । उदरमन्तरं कुरुते अथ तस्य भयम्भवतीति श्रुतेः । तदेवाह आत्मन इति । अन्तरं भेदम् । उदरमत्यन्तम् । भयं कालचक्रपरिभ्रमणम् । विदधे अहं सृजामि । मृत्युर्हि मद्रूपम् । कपिलो देवहूतिम् । (भाग० ३।२६।२६) ॥१९॥

अथ विष्णोर्महिमा

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह
यः पार्थिवान्यपि कविर्विममे रजांसि ।

चस्कम्भ यः स्वरहसास्खलता त्रिपृष्ठं
यस्मात्त्रिसाम्यसदनादुरुकम्पयानम् ॥२०॥

एवं भगवतोऽधिष्ठानान्युक्त्वा इदानीं यत् स्तूयते तद्विधीयत इति न्यायान्मुमुक्षोर्भगवति स्वातिरेकमनुरागं विधातुं भगवतो माहात्म्यमाह ' विष्णोरिति । अत्रापि श्लोकसप्तकेन पूर्वरङ्गं विधास्यन् सामस्त्येन महिमा ब्रह्मादिभिरपि दुर्विज्ञात इति द्वाभ्यामाह ' विष्णोरिति । नु अहो । इह एषु त्रैलोक्यस्थेषु कविषु मध्ये । कतमः किंजातीयः । योऽपि कविरतीन्द्रियदर्शी पृथ्वीं परिभ्रमन् संख्यातवान् सोऽपि नार्हति ' अन्यस्य का वार्ता । कोऽसौ विष्णुः । यस्त्रिपृष्ठं चस्कम्भ धृतवान् । त्रयो लोकाः पृष्ठे यस्य तत् त्रिपृष्ठं कालचक्रम् । स्वरहसा स्वेन बलेन । अस्खलता अप्रतिहतेन । यस्माद्विष्णोर्महत्तत्त्वमासीत् । त्रयाणां गुणानां साम्यं मूलप्रकृतिः सदनमधिष्ठानं यस्य स तथा । कम्पयानं कम्पयमानम् । सर्वाणि वस्तूनि सर्वेषां सर्वचेष्टाप्रदमित्यर्थः । (भाग० २।७।४०) ॥२०॥

नान्तं विदाम्यहममी मुनयोऽग्रजास्ते
मायाबलस्य पुरुषस्य कुतोऽवरा ये ।
गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनापि समवस्यति नास्य पारम् ॥२१॥

नान्तमिति । अहं ब्रह्मा । ते तव नारदस्य । अग्रजाः सनकादयः । व्यधिकरणे षष्ठी । अवरा इन्द्राद्याः । यतः शेषोऽपि नाद्यापि समवस्यति जानाति । स यद्यप्यादिदेवो दशशताननश्च । (भाग० २।७।४१) ॥२१॥

येषां स एव भगवान् दययेदनन्तः
सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् ।

ते दुस्तरामतितरन्ति च देवमायां
नैषां ममाहमिति धीः श्वश्रृगालभक्ष्ये ॥२२॥

एवमपि ज्ञेयत्वमुक्त्वाऽस्य भगवतः प्रसादतः सुज्ञाततामाह ' येषामिति । स एव नान्यो दययेद्दयां कुर्यात् । निर्व्यलीकं निष्कपटम् । चकाराद्विदन्ति च । एषां तीर्णमायानाम् । श्वश्रृगालभक्ष्ये शरीरे । तत्र स्वशरीरेऽहंधीः परशरीरे ममधीः । तीर्णमायत्वेऽतिक्रमेदित्यर्थः । (भाग० २।७४२) ॥२२॥

वेदाहमङ्ग परमस्य हि योगमायां
यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुश्च तदात्मजाश्च
प्राचीनवर्हि ऋभुरङ्ग उत ध्रुवश्च ॥२३॥

भगवत्प्रसादाज् ज्ञायत इत्यत्र निदर्शनान्याह ' वेदाहमिति । अहं ब्रह्मा । हे अङ्ग नारद । मणिमन्त्रादिभिर्विना या समाधिमात्रादाविर्भवति सा योगमाया । दैत्यवर्यः प्रह्लादः । मनुः स्वायम्भुवः ' तत्पत्नी शतरूपा । आत्मजाः प्रियव्रताद्याः । उत अहो । (भाग० २।७४३) ॥२३॥

इक्ष्वाकुरैलमुचुकुन्दविदेहगाधि-
रध्वम्बरीषसगरा गयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनुरन्तिदेवा
देवव्रतो बलिरमूर्तरयो दिलीपः ॥२४॥

ऐलः पुरुरवाः । विदेहो जनकः । नाहुषो ययातिः । देवव्रतो भीष्मः । (भाग० २।७४४) ॥२४॥

सौभर्युतङ्कशिबिदेवलपिप्पलाद-
[1]शारद्वतोद्धवपराशरभूरिषेणाः ।

---

1 भाग० सारस्वतो०

येऽन्ये विभीषणहनूमदुपेन्द्रदत्त-
पार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥२५॥

उतङ्को भगवता दर्शितविश्वरूपः। द्वितकारश्चायं शब्दः, आर्षो द्वितीयतकारलोपः। श्रुतदेवो भगवदातिथ्यकारी। (भाग० २।७।४५) ॥२५॥

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्रीशूद्रहूणशबरा अपि पापजीवाः।
यद्यद्भुतक्रमपरायणशीलशिक्षा-
स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥२६॥

ते वै इति। अद्भुतक्रमो विष्णुः तत्परायणं यच्छीलं सद्वृत्तं तत्र शिक्षा येषां ते तथा। श्रुते गुरूपदेशे धारणा येषां ते तथा। (भाग० २।७।४६) ॥२६॥

शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं
शुद्धं समं सदसतः परमात्मतत्त्वम्।
शब्दो न यत्र पुरुकारकवान् क्रियार्थो
माया परैत्यभिमुखे च विलज्जमाना ॥२७॥

एवं पूर्वरङ्गं कृत्वा प्राधान्यान्निराकारमहिमानं तावदाह, शश्वदिति। शश्वन्नित्यम्। कुतः, यतः प्रशान्तं निष्क्रियम्। कुतः, यतोऽभयम्, भयञ्च द्वितीयात्।[1] तच्च प्रतिबोधमात्रम्। कुतः, यतः शुद्धम्। शुद्धस्य ज्ञानस्य तस्य न कर्त्रादियोगः। न च तदसिद्धम्, यतः समम्। ज्ञानविशेषेषु सामान्यरूपेण स्थितम्। तच्च सदसतः परम्। न कार्यं नापि कारणम्, विशेषस्यैव तथात्वात्। न चात्मा ह्यस्य द्वितीयः, यत आत्मरूपम्। तदुक्तं

1 बृहदारण्यकं (१।४।२) द्रष्टव्यम्।

श्रीशङ्कराचार्यैः ' ज्ञानज्ञेयविहीनोऽपि सदाज्ञ इति । न च तज्ज्ञान-शब्देन सद्द्वैतम् ' यतोऽत्र नो शब्दः । शब्दो हि कारकार्थः क्रियार्थो वा ' न च तत्तद्रूपम् । नापि मनसा द्वैतम् । मनोऽपि हि माया ' सा च परैति दूरे गच्छति ' अभिमुखे स्थातुं विलज्जमानेव । (भाग० २।७।४७) ॥२७॥

तद्वै पदं भगवतः परमस्य पुंसो
ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् ।
सध्र्यङ् नियम्य यतयो यमकर्तहेतिं
जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥२८॥

तदेव ज्ञानं भगवतः पदं ब्रह्मेति प्रसिद्धं न च निष्प्रमाणकम् । यद् यतयो विदुः अनुभवन्ति । अजस्रसुखं विशोकञ्च । यच्चित्ततोदः कृपया[1] इत्युक्तम् । शोकविहीनत्वात् । किं कृत्वा विदुः । सध्र्यक् सहचरं चित्तं नियम्य लयविक्षेपाभ्यां निर्वर्त्य ' सहाञ्चतीति सध्र्यक् । ततो यमकर्तहेतिं जह्युः त्यजन्ति । यमश्चित्तवृत्तियमनप्रयत्नः ' स एव कर्तहेतिः हृदयग्रन्थिच्छेदनशस्त्रम् । प्राप्तोपेया उपायं त्यजन्तीत्यर्थः । स्वराड् दरिद्रः ' स हि स्वस्य राड् न तस्य भृत्यो न स्वामी । स यदा निपानस्य जलाशयस्य खननार्थमुपात्तेन खनित्रेण जीवन् धन-सञ्चयादिन्द्रः सम्पन्नो भवति ' तदा निपानखनित्रं जहाति । एवं संसारी यममभ्यस्यन् यदा मुक्तो भवति ' तदा च यमं जहाति । (भाग० २।७।४८) ॥२८॥

स श्रेयसामपि विभुर्भगवान् यतोऽस्य
भावस्व भावविहितस्य सतः प्रसिद्धिः ।
देहे स्वधातुविगमेऽनुविशीर्यमाणे
व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥२९॥

यदेतदुक्तं पदं यच्च तस्योपार्जकः स भगवानित्याह ' स श्रेयसामिति ।

---

1 भागवतम् २।२।२७

योऽपि श्रेयसां पदसाधनानां विभुः सम्पादकः सोऽपि भगवान्। यतः कारणादस्य श्रेयसः प्रसिद्धिर्निष्पत्तिः। सतः सद्रूपात्। भावानां पदार्थानां स्वभावो ब्राह्मणत्वाद्यसाधारणरूपम्' तेन विहितस्य 'ब्राह्मणस्येदं क्षत्रियस्येदमिति विभागेनोक्तस्य। सद्रूपश्च स एव। स हि देहे विशीर्यमाणे न हि विशीर्यते। अजश्च जायमाने न हि जायते। व्योमेव स्वधातूनां देहकारणानां विगमे नाशे। (भाग० २।७।४६) ॥२६॥

सोऽयन्तेऽभिहितस्तात भगवान् विश्वभावनः।
समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥३०॥

निराकारमहिमानमुक्त्वोपसंहरति' सोऽयमिति। यत् सद् यच्चासत्' तत् सर्वं हरेरन्यन्न भवति। हरिस्तु अस्मादन्य एवेति संक्षेपः। (भाग० २।७।५०) ॥३०॥

इदं भागवतं नाम यन्मे भगवतोदितम्।
संग्रहोऽयं विभूतीनां त्वमेतद्विपुलीकुरु ॥३१॥

साकारमहिमानं ब्रुवन् चतुर्भिः पूर्वरङ्गमाह' इदमिति। यद् यस्माद्भगवतोक्तं तेन भागवतम्' प्रोक्तार्थेऽण्[1]। विभूतयो लीलावताराः। विपुलीकुरु विस्तारय। (भाग० २।७।५१) ॥३१॥

यथा हरौ भगवति नृणां भक्तिर्भविष्यति।
सर्वात्मन्यखिलाधार इति सङ्कल्प्य वर्णय ॥३२॥

यथेति। अनेन वर्णितेन हरौ नृणां भक्तिर्भविष्यतीति सङ्कल्पं मनसि विधाय भागवतं यथावद् वर्णय। अत्र हि हरेर्भगवत्त्वं सर्वात्मकत्वं सर्वाधारत्वञ्च वर्ण्यते। तच्च भक्तिं द्रढयति। (भाग० २।७।५२) ॥३२॥

---

1 पाणिनि: ४।२।६४ वा०



मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥३३॥

ननु चिदेकरसे वस्तुनि लीलावतारादि मायाद्वारकम् । मायामयस्य च वर्णनेन समीहितसिद्धिः । न हि जलाभासात् पिपासा शाम्यतीत्यत आह ' मायामिति । अयमर्थः ' यद्यपि चरित्रं मायामयं तथापि तच्छ्रद्धया वर्णितं श्रुतमनुमोदितं वा मायां निवर्तयति । तत्र हेतुः ईश्वरस्येति । तथा च शाम्बस्त्वां स्तोष्यामीति । ब्रह्मा नारदम् । (भाग० २।७।५३) ॥३३॥

नैवात्मनः प्रभुरयं निजलाभपूर्णो
मानं जनादविदुषः करुणो वृणीते ।
यद् यज्जनो भगवते विदधीत मानं
तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥३४॥

नन्वीश्वरोऽपि चेत् स्वगुणवर्णनेन तुष्यति तर्हि राजादितुल्यत्वं स्यादत आह ' नैवेति । अयं विष्णुः मानं न वृणीते । कुतः निजस्य नित्यनिरतिशयानन्दस्वरूपस्य लाभेन पूर्णत्वात् । पूर्णा अपि क्वचित् परोद्वेगेन उद्विग्ना दृश्यन्ते । अयन्तु न तथा इत्यत आह ' करुण इति । तथापि लब्धनिर्वाहार्थमन्यापेक्षया भाव्यम् । नेत्याह ' प्रभुः ईशिता । अविदुष इति । जन एवाज्ञतया तं सापेक्षं मन्यत इत्युक्तम् । ननु सेव्यमानोऽप्ययमखण्डतातिशयश्चेत् किमर्थं सेव्यत इत्यत आह ' यद् यदिति । भगवत इति चतुर्थ्या सङ्कल्पस्य तादर्थ्यमुक्तम् । भजनस्य कृतस्यातिशयस्य भगवत्यभावेऽपि तत् प्रीतिबुद्ध्या कृतमात्मनि फलतीत्यर्थः । अत एव विदधीतेत्युक्तम् । नतु विदध्यादिति । मानं पूजारूपम् । आत्मनेपदादेव क्रियाफलस्य कर्तृगामित्वे सिद्धे चतुर्थीनिर्देशोऽतिशयार्थः । नन्वन्यार्थकृतं कथमन्यस्य स्यादिति तत्राह ' प्रतीति । प्रतिमुखं मुखप्रतिबिम्बम् । युक्तञ्चेदम् । विष्ण्वात्मनो बिम्बप्रतिबिम्बत्वात् । प्रह्लादो बालान् । (भाग० ७।६।११) ॥३४॥

तत्पादशौचं [1]कलिकल्मषापहं
स्वधर्मविन्मूर्ध्न्यदधात् सुमङ्गलम् ।
यद्देवदेवो गिरिशश्चन्द्रमौलि-
र्दधार मूर्ध्ना परया च भक्त्या ॥३५॥

एवं पूर्वरङ्गं कृत्वा पादयोर्महिमानं द्वाभ्यामाह ' तत्पादेति । तस्य वामनस्य चरणक्षालनमुदकम् । कल्मषं पापम् । स्वेषां पित्रादीनां । धर्मं विप्रपूजारूपं वेत्तीति स्वधर्मविद् बलिः । सुमङ्गलतामाह ' यदिति । देव-देवत्वादप्राकृतत्वम् । गिरिशत्वान्निरपेक्षत्वम् ' चन्द्रमौलित्वात् सालङ्कारत्वम् । एवम्भूतोऽपि दधारेति वस्तुशक्तिः । तत् किमवज्ञया धृतवान् । नेत्याह ' मूर्ध्नेति । नापि व्यलीकेन इत्याह ' परयेति । शुको राजानम् । (भाग० ८।१८।२८) ॥३५॥

यत्पादयोरशठधीः सलिलं प्रदाय
दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ।
अप्युत्तमां गतिमसौ भजते त्रिलोकीं
दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥३६॥

यदिति । यस्य तव पादयोः सतीं निष्कामां सपर्यां पूजाम् । उत्तमा गतिर्मोक्षः । असौ बलिः । पुनः त्रिलोकीं दाश्वान् दत्तवान् । ऋच्छेत् प्राप्नुयात् । ब्रह्मा त्रिविक्रमम् । (भाग० ८।२२।२३) ॥३६॥

गायन्ति ते विशदकर्म गृहेषु देव्यो
राज्ञां स्वशत्रुवधमात्मविमोक्षणञ्च ।
गोप्यश्च कुञ्जरपतेर्जनकात्मजायाः
पित्रोश्च लब्धशरणा मुनयो वयञ्च ॥३७॥

अथ चतुर्भिः कीर्तेर्महिमा ' गायन्तीति । देव्यो देवस्त्रियः । राज्ञो जरासन्ध-

---

1 भाग० जनकल्म०

बद्धराजपत्न्यः। शत्रुर्जरासन्धः। आत्मनाम् आत्मभूतानां प्रेयसां विमोक्षणम्। तस्य च वर्तिष्यमाणत्वेऽप्यधुनैव गानम्' निष्पन्नत्वेनाध्यवसायात्। गोप्यश्च शत्रोः शङ्खचूडस्य वधम्। कुञ्जरपतेर्गजेन्द्रस्य मोक्षणम्। सीतायाश्च। पित्रोर्वसुदेवदेवक्योः। उद्धवः श्रीकृष्णम्। (भाग० १०।७१।६) ॥३७॥

यद्विश्रुतिः श्रुतिनुतेदमलं[1] पुनाति
पादावनेजनपयश्च वचश्च शास्त्रम्।
भूः कालभर्जितभगापि यदङ्घ्रिपद्म-
स्पर्शोत्थशक्तिरपि[2] वर्षति नोऽखिलार्थान् ॥३८॥

यदिति। यद्विश्रुतिर्यस्य श्रीकृष्णस्य विश्रुतिः कीर्तिः। इदं जगत् पुनाति। श्रुतिनुता वेदैः स्तुता। पयो वचश्च जगत् पुनाति। वचः शास्त्रं श्रीभागवतं वेदरूपत्वेन वा हितोपदेशकत्वात्। भगो भजनीयत्वम्। यदङ्घ्रि-पद्मस्पर्शेन उद्भूतशक्तिः सर्वार्थान् वर्षति। (भाग० १०।८२।२६) ॥३८॥

तद्दर्शनस्पर्शनानुपथप्रजल्प-
शय्यासनाशनसयौनसपिण्डबन्धः।
येषां गृहे निरयवर्त्मनि व ्तां वः
स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥३९॥

तद्दर्शनेति। दर्शनं स्पर्शनञ्च' अनुपथः अनुगतिश्च' प्रजल्पो गोष्ठी च' शय्या शयनञ्च' आसनञ्च' अशनं भोजनञ्च' सयौनबन्धः विवाहसम्बन्धः' सपिण्ड-बन्धः दैहिकसम्बन्धः। तेन श्रीकृष्णेन सह दर्शनाद्युपलक्षितसयौनसपिण्डबन्धो येषां वोऽस्ति। किञ्च—येषां वो यदूनाम्। अनुपथः अनुगमनम्। सयौनं योनि-सम्बन्धः। सपिण्डः सापिण्ड्यम्। बन्धः सम्बन्धः। येषां युष्माकम्। तस्य विष्णोर्दर्शनादिलक्षणः। गृहे स्थितानामप्यास। स्वर्गापवर्गयोर्विरमो यस्मात्

1 भागवतटीकायां स्वामिधृतं पाठान्तरं श्रुतिरमीवमलम्। 2 भाग० रभि०।

सम्बन्धात्। स च स्वयं साक्षात् विष्णुरेवास न तु युष्मत्प्रयत्नात्। कुरुक्षेत्रे मिलिता राजानः। (भाग० १०।८२।३०) ॥३९॥

यस्यामलं दिवि यशः प्रथितं रसायां
भूमौ च ते भुवनमङ्गल दिग्वितानम्।
मन्दाकिनीति दिवि भोगवतीति चाधो
गङ्गेति चेह चरणाम्बु पुनाति विश्वम् ॥४०॥

श्रीवोपदेवकृते मुक्ताफले विष्णुप्रकरणम्।
इति चतुर्थोऽध्यायः ॥४॥

यस्येति। हे भुवनमङ्गल! यस्य ते यशो मन्दाकिन्यादिव्याजेन जगत् पुनाति। रसा पातालम्। वितानम् उल्लोचः। नारदः श्रीकृष्णम्। (भाग० १०।७०।४४) ॥४०॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुप्रकरणम्।
समाप्तोऽयं चतुर्थोऽध्यायः ॥४॥

पञ्चमोऽध्यायः

अथ विष्णुभक्तिप्रकरणम् ।

तत्र विष्णुभक्तेर्लक्षणम् ।

तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥१॥

एवं विष्णुं प्रपञ्चय क्रमप्राप्तं भक्तिप्रकरणमारभते । अथेति ।

तत्रापि भक्तेः सामान्यलक्षणं वक्तुमाह । तत्रेति । तत्र विष्णुभक्तेर्लक्षणं भेदाश्च ।

तस्मादिति । यस्मात् कृष्ण एव कैवल्यप्रदः । यद्वा तस्मादुपायविशेषस्य[1] विवक्षितत्वात् । केनापि विहितेन अविहितेन वा उपायेन साध्यसिद्ध्यवधृतसामर्थ्येन । न तून्मादादिना । कृष्णे सत्त्वोपाधौ ब्रह्मणि । निवेशयेत् । लिङ्निर्देशस्याविवक्षितत्वादुपायपूर्वं भगवति मनःस्थिरीकरणं भक्तिरिति लक्षणार्थः। न तावदस्यासम्भवः प्रह्लादादौ सुप्रसिद्धत्वात् । न च कर्मक्षयार्थविधिसिद्ध्यर्थयोर्भक्त्योरव्याप्तिः । तयोरप्यन्तःकरणशुद्धिहेतुत्वेन मनोनिवेशहेतुत्वात् । नाप्युन्मादादावभक्तिभूतेऽतिव्याप्तिः । तस्यानुपायत्वेन निरस्तत्वात् । नापि शुद्धायां भक्तावुपायानिर्देशादुपायेनेति लक्षणे नान्तर्भूतमिति शङ्क्यम् । श्रौताभावेऽप्यानुमानिकस्य सम्भवात् । तस्मादनवद्यं लक्षणम् । नारदो युधिष्ठिरम् । (भाग० ७।१।३१) ॥१॥

सा द्वेधा । विहिता अविहिता च ।

तत्र विहिता

देवानां गुणलिङ्गानामानुश्रविककर्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥२॥

---

1 ख-पुस्तके ०विशेषस्याविवक्षितत्वादिति पाठः ।

एवं सामान्यभक्तिं लक्षयित्वा इदानीमुपायभेदात्तद्विशेषानाह। सेति। सा सामान्यरूपा। विहिता वेदोक्ता।

देवानामिति। देवानां चक्षुराद्यधिष्ठातॄणां सूर्यादीनाम्। गुणा एव लिङ्गानि ग्राह्यत्वात्। तद्यथा रूपप्रतिपत्तिः कारणपूर्विका क्रियात्वात् छिदिक्रियावत्। गुणा एव लिङ्गानि न तु गुणवन्तः। तेषां नाशे दुःखापत्तेः। गुणस्य न नाशस्ततोऽन्यत्र भावात्। एवञ्च तत्तद्विशेषत्यागाद् महासामान्ये सत्त्व एव वृत्तिः। आनुश्रविकाणि वेदोक्तान्येव कर्माणि येषां देवानाम्। तद्यथा चक्षुरादिभिर्विहिता एव रूपादयो ग्राह्या न तु सर्वे। आनुश्रविकाण्येव कर्माणि न तु दृष्टानि। तेषां फलाभावे दुःखापत्तेः। इतरेषां न फलार्थत्वम्। तन्निवृत्त्यर्थत्वात्। यथोक्तम्—

परोक्षवादो वेदोऽयं बालानामनुशासनम्।
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥[1]

इति। सत्त्व एव न रूपादौ। एकमनसः पुरुषस्य देवानाम्। एकत्रैव मनो यस्य नोभयत्र। अयमर्थः। यद्यपि देवानां सत्त्वे सत्त्वव्यञ्जके च विष्णौ वृत्तिस्तथापि मनसो विष्णावेव। सा च स्वाभाविकी स्वभावेन जाता नोन्मादादिना विकारेण। (भाग० ३।२५।३२) ॥२॥

अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥३॥

अनिमित्तेति। निमित्तेन ख्यातिलाभपूजादिना हीना। भागवती भगवतः इयं भजमानभज्यमानयोर्भगवत्त्वात्। यथोक्तं

1 भागवतम् ११।३।४४

सर्वभूतेषु यः पश्येत्

इत्यादिना[1]। सिद्धेर्गरीयसी कैवल्यादधिका। कैवल्ये सुखत्वम्, भक्तौ तु सुखानुभवः। जरयति नाशयति। कोशं मायावरणम्। निगीर्णं भुक्तमन्नम्। अस्याश्च विहितत्वे आनुश्रविककर्मणामिति लिङ्गम्। कपिलो देवहूतिम्। (भाग० ३।२५।३३) ॥३॥

सा द्वेधा, मिश्रा शुद्धा च। मिश्रा त्रेधा, कर्ममिश्रा कर्मज्ञानमिश्रा ज्ञानमिश्रा च।

कर्ममिश्रा त्रेधा, राजसी सात्त्विकी तामसी च।

अभिसन्धाय यद्धिंसां दम्भं मात्सर्यमेव वा।
संरम्भी भिन्नदृग्भावं मयि कुर्यात् स तामसः ॥४॥

अथ विहितायाः प्रभेदानाह, सेति। सा विहिता। कर्म क्रिया धात्वर्थः। ज्ञानमात्मविषयः परोक्षो बोधः।

तामसी त्रेधा, हिंसार्था दम्भार्था मात्सर्यार्था च। अभिसन्धायेति, हिंसा प्राणवियोजको व्यापारः। दम्भः परवञ्चना। मात्सर्यं परोत्कर्षासहिष्णुत्वम्। अभिसन्धाय उद्दिश्य। संरम्भी सक्रोधः। भिन्नदृक् भेदं सत्यं मन्यमानः। भावं भक्तिम्। एवं पृथग्भावः। तामसः, तामसभक्तियोगात्, एवं राजसः सात्त्विकश्च। भक्तस्वरूपकथनेन भक्तिर्लक्षिता, भक्तिप्रयुक्तत्वात् भक्तशब्दस्य। अत्राभिसन्धानं कर्म। तस्य च हिंसादिविषयत्वात्तामसं विहितत्वं श्येनन्यायेन। (भाग० ३।२९।८) ॥४॥

विषयानभिसन्धाय यश ऐश्वर्यमेव वा।
अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ॥५॥

राजसी त्रेधा, विषयार्था यशोऽर्था ऐश्वर्यार्था च। ता एवाह विषयेति।

1 भाग० ११।२।४५

विषया रूपादयः। यशः साधुवादः। ऐश्वर्यम् अप्रतिहताज्ञत्वम्। अर्चा-दाविति तामसे सात्त्विके च ज्ञेयम्। (भाग० ३।२९।९) ॥५॥

कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥६॥

सात्त्विकी त्रेधा। कर्मक्षयार्था विष्णुप्रीत्यर्था विधिसिद्ध्यर्था च। कर्मेति। कर्म पापम्। निर्हारः क्षयः। परस्मिन्निति

यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्

इत्यत्रोक्ते[1] भगवदादिरूपे तत्त्वे। अत्र हि भगवदादयः सत्त्वगुण-त्रिगुणनिर्गुणानां वाचका इत्युक्तं परमहंसप्रियायाम्। यजेत् पूजयेत्। यष्टव्यमिति विधौ कृत्यप्रत्ययः। अयमर्थः। चित्तं हि प्रख्या-प्रवृत्ति-स्थितिशीलत्वात् त्रिगुणम्। तत्र प्रख्यारूपं चित्तं भूयसा तमसा संसृष्टं हिंसाद्युपगं भवति। तथा रजसा संसृष्टमैश्वर्यादिप्रियं भवति। तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया भगवत्प्रियादिषु धर्मेषु प्रवर्तते। कपिलो देवहूतिम्। (भाग० ३।२९।१०) ॥६॥

कर्मज्ञानमिश्रा त्रेधा। उत्तमा मध्यमा अधमा च। सत्त्वता-रतम्यात्।

तत्रोत्तमा

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥७॥

एवं कर्ममिश्रां नवभेदामुक्त्वा कर्मज्ञानमिश्रां त्रिभेदामाह। कर्मेति। त्रित्वे हेतुमाह। सत्त्वेति। अयमर्थः। ज्ञानं हि सत्त्वादुत्पद्यते।

---

1 भागवतम् १।५।३२

सत्त्वात् संजायते ज्ञानम्

इति[1] वचनात्। अतः सत्त्वस्य प्रकर्षसाम्यापकर्षे ज्ञानस्य त्रिरूपत्वाद् भक्तेस्त्रैविध्यम् ॥

सर्वेति। सर्वभूतेषु स्थितस्यात्मनो जीवस्य भगवत्त्वम्। उत्तम उत्तम-भक्तियोगात्। एवं मध्यमप्राकृतौ। अत्र पश्येत् दर्शनं कुर्यादिति कर्म। दर्शनस्य चात्मविषयत्वं ज्ञानम्। आत्मनश्च भगवत्त्वं भक्तिः। उत्तमत्वं चास्याः सर्वभूत-स्थितैकात्मविषयेण ज्ञानेन मिश्रत्वात्। (भाग० ११।२।४५) ॥७॥

मध्यमा

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥८॥

ईश्वर इति। अत्रेश्वरादीनां प्रेमादिभिः क्रमात् सम्बन्धः। ईश्वरे प्रेम्णा विषयरागः पराक्रियते। मैत्र्या ईर्षा। कृपया गर्वः। उपेक्षया द्वेषः। ईश्वरो जगत्कारणं मायोपाधिः पुरुषः। तदधीना ईश्वरार्पितप्राणाः बालिशा मूर्खाः। अत्रेश्वरस्य जगत्कारणत्वाद्यनुसन्धानं ज्ञानम्। तत्र प्रेम भक्तिः। तत्सिद्धये तदधीनादिषु मैत्र्यादिकरणं कर्म। अस्याश्च मध्यमत्वमीश्वरस्य सर्वात्मकत्वेनावगमात्। (भाग० ११।२।४६) ॥८॥

अधमा

अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥९॥

अर्चायामिति। ईहते करोति। अत्रार्चायामेव हरिरस्तीति बोधो ज्ञानम्। श्रद्धया तत्पूजनं भक्तिः। तद्भक्तेषु पूजाया अकरणं कर्म। अधमत्वञ्चास्यास्तुच्छज्ञानमिश्रत्वात्[2]। हरिः निमिम्। (भाग० ११।२।४७) ॥९॥

---

1 गीता १४।१७ 2 क-पुस्तके अधमत्वञ्चास्याज्ञानमिश्रत्वादिति पाठः।

ज्ञानमिश्रा

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ।
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥१०॥

एवं सगुणां भक्तिं निरूप्य निर्गुणामाह ' ज्ञानेति । सर्वगुहाशये सर्वात्मनि । गङ्गाम्भो हिमपर्वतैः प्रतिबाध्यमानमपि यथा समुद्रमेवाभिनिविशते तथा विषयैर्विच्छिद्यमानापि मनोवृत्तिस्तानतीत्य विष्णुमेवैतीत्यविच्छेदे दृष्टान्त उक्तः । निर्गुणो ज्ञानमिश्रः । अत्र च निर्गुणत्वं प्रागुक्तानां गुणकार्याणामनुपलम्भात् । न चास्या ऐकात्म्यविषयत्वे नोत्तमकर्मज्ञानमिश्रया सहाविशिष्टत्वमिति शङ्क्यम् ' अत्र पश्येदितिवत् कर्मनिर्देशाभावात् । न चात्रापि मनोगतिरिति मनोगमनं कर्म । यदृच्छोपस्थितगुणश्रुतिमात्रेण स्वभावत एव मनसः प्रवृत्त्या प्रयत्नेन प्रेषणाभावात् । अत्र मयि मनोगतिरिति भक्तिः' तत्रापि सर्वगुहाशये मयीति ज्ञानमिश्रत्वे बीजम् । (भाग० ३।२९।११) ॥१०।

शुद्धा

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥११॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥१२॥

एवं मिश्रां भक्तिमुक्त्वा शुद्धामाह' शुद्धेति । अहैतुकी फलाकाङ्क्षारहिता । अव्यवहिता निरन्तरा । अहैतुकीत्वमेवाह ' सालोक्येति । यस्यां भक्तौ क्रियमाणायां तुष्टेन भगवता दीयमानमपि सालोक्यादि भक्ता न गृह्णन्ति । सालोक्यम् एकस्मिन् लोके अवस्थानम् । सामीप्यं समीपे अवस्थानम् । सारूप्यं तुल्यरूपप्राप्तिः । सार्ष्टिर्जगत्स्रष्ट्यादिवर्जं तुल्यप्रभावत्वम् । एकत्वं चतुर्भुजादिमूर्त्यधिष्ठात्रा पुरुषेण सहैक्यम् । उत अहो देवहूते । (भाग० ३।२९।१२-१३) ॥११-१२॥

स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ।
येनातिव्रज्य त्रिगुणान्[1] मद्भावायोपपद्यते ॥१३॥

अयमात्यन्तिकः ' ततः परं प्रकारान्तराभावात् । अस्यैव भक्तियोग इत्याख्येत्याह ' अन्वर्थत्वेन भक्तिशब्दस्यात्रैव मुख्यत्वात् । इतरेषु हि फल एवानुरागो न विष्णौ ' फललाभे भक्तित्यागात् । अस्याश्च शुद्धत्वं कर्मज्ञानाभ्याममिश्रत्वात् ।

अथास्य चतुर्दशविधस्यापि विहितभक्तियोगस्य फलमाह ' येनेति । येन भक्तियोगेन । अतिव्रज्य अतीत्य । त्रीन् गुणान् तामसत्वादिभावान् । मद्भावाय ब्रह्मसायुज्याय । उपपद्यते योग्यो भवति । अधमभक्तियोगादुत्तमभक्तियोग्यत्वमकाम्यमानमपि भवतीति सर्वेषामेकमेव फलम् । कालविलम्बकृतो विशेष इत्यर्थः । कपिलो देवहूतिं प्रति । (भाग० ३।२९।१४) ॥१३॥

अविहिता चतुर्धा ' कामजा द्वेषजा भयजा स्नेहजा च ।
कामाद्द्वेषाद्भयात् स्नेहाद् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिङ्गताः ॥१४॥

एवं विहितां चतुर्दशभेदामुक्त्वा चतुर्भेदामविहितामाह ' अविहितेति । कामोऽत्र परपरिगृहीताया अनूढाया वा स्त्रियाः परपुरुषे दुरभिसन्धिः । द्वेषोऽप्रीतिः । भयं त्रासः । स्नेहः कामातिरिक्तः सन्निकर्षादिजः परस्परमकृत्रिमचित्तबन्धः ।

कामादित्यादि ' यथा विहितया भक्त्या ईश्वरे मनो निवेश्य केचित्तद्गतिं गच्छन्ति ' तथाऽविहितेनापि कामादिना बहवो गता इत्यर्थः । तद्गुरुच्छेदमपि अघं हित्वा त्यक्त्वा । तत्र हेतुरीश्वर इति हेतुगर्भो निर्देशः । अयमर्थः ' ईश्वरो हि कृपाशालित्वात् प्रभुत्वाच्च कथमेष्वनिविष्टमन्तःकरणमवेक्ष्य भक्तानां फलं प्रसूते । न तूपायविशेषेणैवेति गच्छन्तीत्युक्त्वा गता

1 त्रिगुणमिति भागवतपाठः ।

इति भूतत्वनिर्देशादविहितानुष्ठानेऽपि कृतार्थत्वमुक्तम्। तेनान्येषामिह प्रवृत्ति-विशेष इत्यर्थः। अविहितत्वं तस्याः कामादेः स्वभावसिद्धत्वेन विधातुमशक्यत्वात्। अप्राप्तो ह्यर्थो विधिगोचरः। विधिरत्यन्तमप्राप्तौ [1]इत्युक्तत्वात्। न च मनः कृष्णे निवेशयेदिति लिङ्प्रत्ययेन विहितत्वादविहितत्वं विप्रतिषिद्धमिति शङ्क्यम्। लिङ्निर्देशाविवक्षितत्वस्य दर्शितत्वात्। नापि बहवस्तद्गतिं गता इत्यर्थवादसामर्थ्यादत्रैव विधिकल्पनेति वाच्यम्। अर्थवादिकविधिकल्पनस्याप्यप्राप्तविषयत्वात्। न च गोप्यादिषु साध्यसाधनभावस्य दृष्टत्वाद् विहितत्वम्। न हि गोपीनामीश्वरत्वबोधेन भजनं किन्तु जारत्वेन भजमानानां तासां दैवात् तस्येश्वरत्वान्मुक्तिलाभः। [2]तदुक्तम्

तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः॥

इति। ननु यथा गोपादीनां भगवत्सन्निधानात् कामाद्युदयस्तथा चाधुनिकेषु सन्निकर्षाभावेन कामाद्युदयाभावाद् व्यर्थस्तदुपदेशः। नैवम्' इदानीमपि विष्णुस्थूलमूर्त्यधिष्ठातरि भगवति कासाञ्चित् स्त्रीणां भावबन्धस्य दृश्यमानत्वात्। एवमन्यत्र। तस्मात् सिद्धमस्या भक्तेरविहितत्वम्। (भाग० ७।१।२६) ॥१४॥

भक्तिष्वधिकारिणः।

गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो॥

सम्बन्धात् स्नेहात्। वृष्णयो यूयं चेत्येकम्। भक्त्या विहितया। वयमित्यत्र विभागः॥१५॥

एवं द्विरूपायामपि भक्तीनां स्वरूपं निष्कृष्य तास्वधिकारिणं कथयितु-

---

1 विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥
विधिरसायने ह्यर्थसंग्रहे च।

2 भागवतम् १०।२९।११।

माह ' भक्तिष्विति। अवान्तरप्रकरणत्वादथशब्दाभावः। तत्राप्युद्दिष्टक्रमानुसारेण विहिताधिकारिषु वाच्येषु प्रत्यासन्नत्वेन बुद्धिस्थत्वादविहिताधिकारिण एव प्रथममाह ' गोप्य इति। कामादिना गोप्यादयः। वयं नारदादयो भक्त्या विहितया तद्गतिं गता इति पूर्वेणैवान्वयः। नन्वत्र कामादीनां पञ्चानामुपलम्भात् कथमविहितायाश्चातुर्विध्यम्? तत्राह ' सम्बन्धादिति। सम्बन्धेन स्नेहो विशेषः। सम्यग्बन्धः चित्तस्य वशीकारो यस्मात् स्नेहात्' निरतिशयादित्यर्थः। यदि हि सम्बन्धस्नेहयोर्भिन्नविषयत्वमुच्येत तदा सम्बन्धस्य वृष्णिषु पाण्डवेषु च कृतार्थत्वात् स्नेहग्रहणानर्थक्यं स्यात्। स्नेहादित्येवोच्यमाने स्नेहाभासेऽतिप्रसक्तिः। तदर्थं सम्बन्धविशेषणम्। यद्वा स्नेहेनैव सम्बन्धो विशेषः। स्नेहोऽस्त्यतिशयेन यस्मिन् सम्बन्धे मत्वर्थीयोऽर्शआद्यच् प्रत्ययः[1]। सम्बन्धशब्दस्तु यथास्थितार्थः। अक्रियमाणेऽपि स्नेहग्रहणे दुर्योधनादिषु सम्बन्धसद्भावादतिप्रसक्तिः। सम्बन्धादयः स्नेहः। तस्मादिति तु व्याख्याने सम्बन्धग्रहणानर्थक्यम्। कथञ्चित् सम्बन्धस्य सर्वत्र सम्भवात्। तस्मात् सम्बन्धस्नेहयोर्विशेषणविशेष्यभावेनैकत्वाद्युक्तम्। चातुर्विध्यमेवमेवैतत्। यो हि मन्यते भक्तिव्यतिरेकेण पञ्चानामलोक्तिरिति। तन्मते

तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा।
स्नेहात् कामेन वा युञ्ज्यात् कथञ्चिन्नेक्षते पृथक्॥

[2]इत्येतद् विरुध्यते। अत्र हि निर्वैरशब्देन भक्तिनिर्देशाद् भक्तिसहितानामेव पञ्चानामुक्तिः। अत एवेदमपि युज्यते

[3]कतमोऽपि न वेणः स्यात् पञ्चानां पुरुषं प्रति। इति

तस्माद् युक्तं व्याख्यातमाचार्येण ' सम्बन्धात् स्नेहात् वृष्णयो यूयञ्चेत्येकमित्यादिना। नारदो युधिष्ठिरम्। (भाग० ७।१।३०) ॥१५॥

---

1 पाणिनिः ५।२।१२७

2 भागवतम् ७।१।२५

3 भागवतम् ७।१।३१

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ।
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ॥१६॥

अथ विहितास्वधिकारिभेदमाह । निर्विण्णानामिति । न्यासिनां कर्मत्यागिनां मध्ये निर्विण्णानां वीतरागाणां ज्ञानयोगः ज्ञानमिश्रा भक्तिः । तेषु न्यासिषु मध्ये अनिर्विण्णानां कर्मसु सत्सु ज्ञानयोगः । कर्मज्ञानयोगः त्यक्तकाम्यकर्मणामप्यतीव्रवैराग्याणां कर्मज्ञानमिश्रा भक्तिरित्यर्थः । कामिनां काम्यकर्मासक्तानां तु कर्मयोगः कर्ममिश्रैवेत्यर्थः । (भाग० ११।२०।७) ॥१६॥

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥१७॥

शुद्धभक्त्यधिकारिणमाह । यदृच्छयेति । यद्यपि निष्कामैः कर्मभिः शुद्धसत्त्वस्य भगवत्कथादौ श्रद्धा स्यात् तथापि साधनसहस्रदुर्लभेति द्योतनाय यदृच्छयेत्युक्तम् । भक्तियोगः श्रद्धा भक्तिः । स एव भक्तियोगाख्य इत्युक्तत्वात् । (भाग० ११।२०।८) ॥१७॥

य एतान् मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् ।
क्षुद्रान् कामांश्चलैः प्राणैर्जुषन्तः संसरन्ति ते ॥१८॥

एवमधिकारिभेदं निरूप्य भक्तिहीनान्निन्दति । य एतानिति । मत्पथः मत्प्राप्त्युपायान् । भक्तीति शुद्धायाः । भक्तिज्ञानेति ज्ञानमिश्रायाः । ज्ञानक्रियेति कर्ममिश्रायाः । भक्तिज्ञानक्रियेतिसमस्तेन कर्मज्ञानमिश्रायाः । क्षुद्रास्तुच्छाः । कामा विषयाः । जुषन्तः सेवमानाः । संसरन्ति । संसरणं जन्ममृत्युदुःखानुभवः । (भाग० ११।२१।१) ॥१८॥

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥१९॥

भजमानेष्वपि स्वाधिकारप्राप्तभूमिकात्यागेन भूमिकोत्तराधिष्ठाने दोषमाह ।

स्वे स्व इति। उभौ गुणदोषौ। भगवान् उद्धवम्। (भाग० ११।२१।२) ॥१६॥

एवं सति कर्ममिश्रा नव गृहस्थानाम्। कर्मज्ञानमिश्रास्तिस्रो वनस्थानाम्। ज्ञानमिश्रैका भिक्षूणाम्। शुद्धैका सर्वेषामुत्पन्नेऽनुरागे। उत्पाद्ये तु यथासम्मिश्राः। अविहिताश्चतस्रो गोप्यादितुल्यानाम्। एवमष्टादश भेदाः ॥२०॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तेर्लक्षणं भेदाश्च।

इति पञ्चमोऽध्यायः ॥५॥

अथाधिकारिप्रघट्टकार्थं सुखग्रहणाय स्पष्टयति ' एवमिति। एवमधिकारिनिर्णये सति तत्रापि प्रकृत्यानुरूपेण सात्त्विक्यादिविभागः स्वयमूह्यः। गृहस्थेष्वपि निष्कामकर्मणां कर्मज्ञानमिश्रैव। विदेह-याज्ञवल्क्यादयो ह्यत्र निदर्शनम्। भिक्षवोऽत्र परमहंसाः। अन्येषां नैष्ठिकब्रह्मचारिणाञ्च कर्मज्ञानमिश्रैव। शुद्धेति। पूर्वपूर्वभक्त्यभ्यासबलाद् रजस्तमःक्षये विशुद्धोर्जिते सत्त्वोद्बले चेतसि भगवत्यनुरागोदये प्रयत्नमन्तरेण शुद्धा भक्तिराविर्भवतीत्यभिप्रेत्याह ' उत्पन्नेऽनुराग इत्यादि। ततः परमदूरविप्रकृष्टा मुक्तिः। गोप्यादितुल्यानामिति। भगवति प्रभूतकामद्वेषभयस्नेहासक्तानामन्येषामित्यर्थः। तदेवं मिश्रास्त्रयोदश ' शुद्धैका ' अविहिताश्चतस्रः ' इत्यभिप्रेत्य भक्त्याष्टादशभेदया इति प्रागुक्तमित्याशयेनोपसंहरति ' एवमित्युक्तप्रकारेण ॥२०॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तेर्लक्षणं भेदाश्च।

समाप्तोऽयं पञ्चमोऽध्यायः ॥५॥

षष्ठोऽध्यायः

अथ विष्णुभक्तिमहिमा

यावन्न जायेत परावरेऽस्मिन्
विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं
क्रियावसाने प्रयतः स्मरेत ॥१॥

एवं सपरिकरां भक्तिं निरूप्य तत्र मुमुक्षोः प्रवृत्तिविशेषार्थं तन्माहात्म्यमाह ' विष्णुभक्तीति । तत्राप्यष्टादशभिः पूर्वरङ्गं विधास्यन् प्रथमेन भक्तेर्गहनत्वमाह ' यावदिति । परावरे कार्यकारणरूपे अस्मिन् शास्त्रप्रसिद्धे विश्वेश्वरे विश्वस्य प्रथमकारणे द्रष्टरि साक्षित्वेन निष्पादितकार्ये भक्तियोगः । तल्लीलाश्रवणादिभिर्विना स्थातुमशक्तिः । स्थवीयः षोडशकलं स्थूलत्वं नामरूपादिमत्त्वम् । तच्चान्यत्रान्यस्मादतिशयितमितीयसुन्प्रत्ययः[1] । क्रियावसाने षोडशोपचारपूजानन्तरम् । प्रयतः पूतचित्तः । एवम्भूतो भक्तियोग इयता प्रबन्धेन निष्पाद्यत इत्यस्य सहसा दुर्लभत्वाद् गहनत्वमित्यर्थः । शुको राजानम् । (भाग० २।२।१४) ॥१॥

नैष्कर्म्यमप्यच्युतभाववर्जितं
न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे
न चार्पितं कर्म यदप्यकारणम् ॥२॥

अथ पञ्चभिः कर्मयोगाद् भक्तिमुत्कर्षयन् एकेन भक्तिहीनं कर्म निन्दति नैष्कर्म्यमिति । नैष्कर्म्यं ज्ञानयोगः । अच्युतभावो विष्णुभक्तिः । कुतो न

---

1 पाणिनिः ५।३।५७

शोभते यतोऽज्ञानमलम् । अज्ञानं मलो दोषो यत्र तत्तथा । तत् कुतः ? यतो निरञ्जनम् । निर्गतमञ्जनं ब्रह्मणो व्यञ्जनं सत्त्वं यस्मात्तत्तथा । अयमर्थः । नैष्कर्म्यं हि ब्रह्मज्ञानप्रधानम् । तच्च सत्त्वगुणे ब्रह्मण्युपासिते भवति । नेतरगुणे निर्गुणे वा । यदा भक्तिहीनं मनो नैष्कर्म्यमपि न शोभते तदा । कर्म पुनः कुतः शोभते । न कुतोऽपीत्यर्थः । यतः शश्वदभद्रम् । अनुष्ठाने फले चामङ्गलम् । न चेश्वरेऽर्पितं नारायणायेति येनाभद्रत्वहानिः । ननु किं काम्यकर्म निन्द्यते । नेत्याह । यदप्यकारणं नित्यं नैमित्तिकञ्च कारणं कामना । नैष्कर्म्यमपीत्यपिशब्दात् कर्मनिन्दायां तात्पर्यम् । (भाग० १।५।१२) ॥२॥

जुगुप्सितं धर्मकृतेऽनुशासतः
स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरः स्थितो
न मन्यते तस्य निवारणं जनः ॥३॥

मुमुक्षया जिज्ञासुमुपस्थितं शिष्यं प्रति भक्तेरन्यं वर्णयतो विश्रब्धवञ्चनदोषः स्यादित्याह । जुगुप्सितमिति । जुगुप्सितमधर्मसाधनम् । विषयसेवनम् । तत्रैव स्वभावेन रक्तस्य धर्मकृते धर्माय योऽनुशास्ति तस्य महान् व्यतिक्रमः । यस्याप्तत्वेन गृहीतस्य वाक्यादधर्मोऽपि धर्मोऽयमिति निश्चित्य स्थितः । इतरः प्राकृतो जनः । तस्यान्यथा ग्रहणस्य निवारणमन्यैः क्रियमाणं न मन्यते । तस्योपदेष्टुरयं दोषः । तदुक्तम्

कामिनो वर्णयन् कामान् लोभं लुब्धस्य वर्णयन् ।
नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन् ॥ (भाग० १।५।१५) ॥३॥

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरे-
र्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वा भद्रमभूदमुष्य किं
को वार्थ आप्तोऽभजता[1] स्वधर्मतः ॥४॥

कश्चिद्विष्णुलीलाश्रवणादेः साकारोपासनस्यान्तरङ्गस्य बहिरङ्गेनाग्निहोत्रादिना व्यवधानं मा भूदिति स्वधर्मं त्यजति। कश्चित्तु नित्याकरणे प्रत्यवायभयादीश्वरार्पणे त्वयथावत् कृतं स्यादिति च भक्तियोगं त्यजति। तयोः प्रथमः श्रेयानित्याह¹ त्यक्त्वेति। अपक्वः साधकः अन्त्यभूमिकामप्राप्तः। अथ नित्याकरणप्रत्यवायादनन्तरम्। ततः स्थानाद् यत्र क्वचन स्थाने यदि पतेत्। अमुष्य पतितस्य किमभद्रमभूत् न किमपीत्यर्थः। विष्णुभक्तिवासनासद्भावादिति भावः। अभजता भक्तिहीनेन स्वधर्मतः को वा अर्थः प्राप्तः। न कोऽपीत्यर्थः। विषयसुखे प्राप्तेऽप्यनर्थत्वादित्यर्थः। (भाग० १।५।१७) ॥४॥

तस्यैव हेतोः प्रयतेत कोविदो
न लभ्यते यद् भ्रमतामुपर्यधः।
तल्लभ्यते दुःखवदन्यतः सुखं
कालेन सर्वत्र गभीररंहसा ॥५॥

अनर्थत्वमेवाह¹ तस्यैवेति। हेतोरिति सप्तम्यर्थे षष्ठी। यत् स्वतः सुखं भ्रमद्भिर्न लभ्यते। कारकस्य शेषत्वविवक्षायां षष्ठी²। तदर्थं प्रयतेत। यत्त्वन्यतो विषयजन्यं सुखं तत् सर्वत्र लभ्यते। नहि दुःखं केनापि प्रार्थ्यते। तत्र हेतुः कालेनेति। गभीररंहसा दुर्लक्ष्यवेगेन। (भाग० १।५।१८) ॥५॥

न वै जनो जातु कथञ्चनाव्रजे-
न्मुकुन्दसेव्यन्यवदङ्गसंसृतिम्।
स्मरन् मुकुन्दाङ्घ्र्युपगूहनं पुन-
र्विहातुमिच्छेन्न रसग्रहो जनः ॥६॥

त्यक्त्वेति श्लोके स्वधर्मत्यागेन भजतः पतनमभ्युपेत्याभद्रत्वहानिमुक्त्वा

---

1 भाग० ऽभजतां 2 पाणिनिः २।३।५० (वार्तिकम्)

इदानीं तु पतनमेव नास्तीत्याह ' न वै इति। कदाचित् प्रमादेनापि संसृतिं नाव्रजेत्। अन्यवद् भक्तिहीनस्वधर्मनिष्ठवत्। स यथा स्खलितः स्थानाच्च्यवते तथा नायमिति व्यतिरेके दृष्टान्तः। अङ्ग अहो व्यास। उपगूहनं मानसालिङ्गनम्। रसे रसवति वस्तुनि ग्रह आग्रहो यस्य स तथा ' अत एव कथञ्चिद्विस्मृतमपि भक्तिसुखं पुनर्झटिति स्मरति। अत एव न च्यवते। नारदो व्यासम्। (भाग० १।५।१९) ॥६॥

श्रेयःसृतिं भक्तिमुदस्य ते विभो
क्लिश्यन्ति ये केवलबोधलब्धये।
तेषामसौ क्लेशल एव शिष्यते
नान्यद् यथा स्थूलतुषावघातिनाम् ॥७॥

अथ पञ्चभिर्ज्ञानयोगाद् भक्तिमुत्कर्षयन् तत्रैकेन भक्तिं विना आत्मसाक्षात्कारो न भवतीत्याह ' श्रेयःसृतिमिति। श्रेयःसृतिं मुक्तिमार्गम्। उदस्य त्यक्त्वा। क्लिश्यन्ति शमदमादीननुतिष्ठन्तः श्राम्यन्ति। केवलो बोधो ब्रह्मज्ञानम्। क्लेशलः श्रम एव शिष्यते न तु ज्ञानम् ' स्वार्थे लच् प्रत्ययः। मत्वर्थीयानामपि स्वार्थिकत्वं द्रुमादिवत्। (भाग० १०।१४।४) ॥७॥

अथापि ते देव पदाम्बुजद्वय-
प्रसादलेशानुगृहीत एव हि।
जानाति तत्त्वं भगवन्महिम्नो
न चान्य एकोऽपि चिरं विचिन्वन् ॥८॥

ननु ज्ञानानामेव कार्त्स्न्येनानुष्ठानाज् ज्ञानं भविष्यति ' किं भक्त्या उपाधिज्ञानाङ्गानुष्ठानेऽपि हि निश्चितं भक्तिस्तुतिमात्रम्। अन्यो भक्तित्यागेनापि ज्ञानेप्सुः। एको विजनस्थः। विचिन्वन् आत्मानं पश्यन्। अयमर्थः। यथा साकारभजनेऽनायासेन तत्त्वाधिगमः ' नैवं सहसा निराकारप्रवेशे '

तस्य बहुक्लेशसाध्यत्वात् । तदुक्तम् 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्[1] इति । (भाग० १०।१४।२९) ॥८॥

ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभि-
र्ये प्रायशोऽजितजितोऽप्यसि तैस्त्रिलोक्याम् ॥९॥

तस्मात् साधनान्तरे श्रमं हित्वा जिज्ञासुना भक्तिरेवानुसर्तव्येत्याह 'ज्ञान इति । ज्ञाने ज्ञानविषये प्रयासं श्रमाद्यनुष्ठानं हित्वा भवदीयानां विष्णुभक्तानां वार्तां कथां नमन्तः मानवाः श्रवणादिभिराद्रियमाणा एव जीवन्ति । नान्यत् कुर्वन्ति । सन्तो मुखरिता यया । वाचंयमा अपि सन्तः कथासौन्दर्याद्वाचालतां भजन्तीत्यर्थः । स्थान एव स्थिताः । न तु तीर्थविशेषे । श्रुतिः—कर्णवेदश्च अस...। इति संशयवचनमुक्तिविशेषार्थम् । यद्यपि त्वमन्यैरजितः ' तथापि कथारूपमर्मज्ञानाद् भक्तैर्जितो वशीकृतोऽसि ' ज्ञातोऽसीत्यर्थः । (भाग० १०।१४।३ ॥९॥

पुरेह भूमन् बहवोऽपि योगिन-
स्त्वदर्पितेहा निजकर्मलब्धया ।
विबुध्य भक्त्यैव कथोपनीतया
प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥१०॥

उक्तेऽर्थे सदाचारं प्रमाणयति ' पुरेति । हे भूमन् व्यापिन् । योगिनोऽपि इत्यपिशब्दाद् योगेन विलम्बितां सिद्धिमालोक्य भक्तिश्रिता इत्युक्तम् । त्वदर्पितेतिविशेषणत्रयेण तत्तु वाङ्मनोभिरित्येतद्विवृतम् । तत्र ईहा मनश्चेष्टेति मनसो व्यापार उक्तः । निजकर्मेति कायस्य । कथेति वाचः । उपनीता निकटीकृता । भक्त्यैव न साधनान्तरेण । विबुध्य ब्रह्माऽस्मीति निश्चयेन ज्ञात्वा ।

1 गीता—१२।५

अज्ञः सुखेन। परां गतिं यतः परं गम्यं नास्ति। ते अच्युतस्य गतिम् अच्युतस्थानम्। (भाग० १०।१४।५) ॥१०॥

तत्तेऽनुकम्पां सुसमीक्षमाणो
भुञ्जान एवात्मकृतं विपाकम्।
हृद्वाग्वपुर्भिर्विदधन्नमस्ते
जीवेत यो मुक्तिपदे स दायभाक् ॥११॥

एवं ज्ञानयोगादुत्कर्षमुक्त्वोपसंहरति' तदिति। तत् तस्मादात्मकृतं स्वकर्मविपाकं विविधफलं भुञ्जान एव न त्वन्यान्यारभमाणः। दायभागिति वाचोयुक्त्या मुक्तेर्दायवदनपह्नवनीयत्वादावश्यकत्वमुक्तम्। ब्रह्मा श्रीकृष्णम्। (भाग० १०।१४।८) ॥११॥

केचित् केवलया भक्त्या वासुदेवपरायणाः।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥१२॥

ननु किं भक्त्या' प्रायश्चित्तैरेव पापक्षयात् सत्त्वशुद्धौ ज्ञानमुदेष्यतीति चेत्तत्राह' केचिदिति। केवला प्रायश्चित्तनिरपेक्षा। कार्त्स्न्येनेति यथा प्रायश्चित्तभेदाद्भिन्नपापक्षयो नैवमत्रेत्युक्तम्। भक्तिस्त्वेकैव सर्वपापक्षये क्षमेत्यर्थः। तदेव दृष्टान्तेन व्यञ्जयम्। नीहारं हिमम्। (भाग० ६।१।१५) ॥१२॥

न तथा ह्यघवान् राजन् पूयेत तप-आदिभिः।
यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया ॥१३॥

प्रायश्चित्तैः सावशेषा शुद्धिः। भक्त्या तु पुनः पापप्रवृत्तिनिवारणादात्यन्तिकीत्याह' न तथेति। हे राजन् परीक्षित्। आदिशब्दाज् जनपदाः तीर्थादयश्च। प्राणो जीवनम्। तत्पुरुषेषु वैष्णवेषु निषेवया। वैष्णवो हि

मुख्यमधिष्ठानं विष्णोः। न चाधिष्ठानं विना भक्तिः। (भाग०६।१।१६) ॥१३॥

सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः।
सुशीलाः साधवो यत्र नारायणपरायणाः ॥१४॥

किञ्च प्रायश्चित्तेभ्यो भक्तिरविघ्नेत्याह' सध्रीचीन इति। सध्रीचीनः साधुः। यत्र भक्तिमार्गे। साधवः साधनभूताः। साधनवैगुण्याद्विघ्नाः। (भाग० ६।१।१७) ॥१४॥

प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम्।
न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः ॥१५॥

इतोऽपि तेभ्यो भक्तिर्विशिष्टेत्याह' प्राय इति। न निष्पुनन्ति निश्चयेन न पवित्रयन्ति। नारायणपराङ्मुखं यथा स्यात्तथा चीर्णानि। अयमर्थः' भक्तिहीनैः प्रायश्चित्तैर्ज्ञानपूर्वेषु पापेषु न कर्मक्षयः' किन्तु व्यवहार्यत्वमात्रम्। तत्सहितैस्तयैवाद्वयमपीति भक्तेर्विशिष्टम्। अत एव बहिःशुद्धिः प्रायश्चित्तैः' अन्तःशुद्धिस्तु भक्त्यैवेति दृष्टान्तेन व्यञ्जितम्। (भाग० ६।१।१८) ॥१५॥

एतावतालमघनिर्हरणाय पुंसां
संकीर्तनं भगवतो गुणकर्मनाम्नाम्।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि
नारायणेति म्रियमाण इयाय मुक्तिम् ॥१६॥

भक्त्यैव सर्वपापक्षय इत्यत्र निदर्शनमाह' एतावतेति। गुणाः सौन्दर्यादयः। कर्माणि सृष्ट्यादीनि। नामानि नारायणादीनि। एषामन्यतमस्य संकीर्तनं पापक्षयाय समर्थम् इत्येतावताऽनेनैव ज्ञातव्यम्। यदजामिलोऽपि मुक्तिमवाप।

अजामिम् अकुलीनां स्त्रियं दासीं लाति गृह्णातीति अजामिलः। सोऽपीत्यपिशब्दार्थः। नारायणेति विक्रुश्य सम्यक् कीर्तयित्वा। तच्च पुत्रं विक्रुश्य न तु हरिम्। क्लिष्टाघवानशुचिरपि अस्वस्थचित्तोऽपि म्रियमाणः। (भाग० ६।३।२४) ॥१६॥

प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्बत माययालम्।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्मणि युज्यमानः ॥१७॥

नन्वेवञ्चेत् किमिति सर्वे भक्तिमेव नानुतिष्ठन्तीत्यत आह ' प्रायेणेति। तदिदं भक्तिमाहात्म्यम्। मधुना मधुरेणार्थवादेन पुष्पिता फलाशामात्रदा न तु कदाचित् फलिता। वैतानिके यज्ञसम्बन्धिनि महति बहुक्लेशे मायामोहितत्वेन श्रद्धाजाड्याद्वेदधर्मेषु प्रवर्तन्ते। न तु भक्तावित्यर्थः। (भाग० ६।३।२५) ॥१७॥

एवं विमृश्य सुधियो भगवत्यनन्ते
सर्वात्मना विदधते खलु भावयोगम्।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां
स्यात्पातकं तदपि हन्त्युरुगायवादः ॥१८॥

अमोहितास्तु भक्तिमेवानुतिष्ठन्तीत्याह ' एवमिति। भावो भक्तिः। सेयमस्य। अथापि प्रमादेनेत्यर्थः। उरुगायो विष्णुः। वादः संकीर्तनम्। (भाग० ६।३।२६) ॥१८॥

ते देवसिद्धपरिगीतपवित्रगाथा
ये साधवः समदृशो भगवत्प्रपन्नाः।

तान्नोपसीदत हरेर्गदयाभिगुप्तान्
नैषां वयं न च वयः प्रभवाम दण्डे ॥१९॥

एवं पूर्वरङ्गं कृत्वा भक्तस्तुतिद्वारा भक्तिसामान्यं स्तौति ' ते देवेति । नोपसीदत समीपमागच्छत । वयः कालः । (भाग० ६।३।२७) ॥१९॥

तानानयध्वमसतो विमुखान् मुकुन्द-
पादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलैरसङ्गै-
र्जुष्टाद् गृहे निरयवर्त्मनि बद्धतृष्णान् ॥२०॥

तर्हि कान् प्रति गन्तव्यमिति तानाह ' तानानयध्वमिति ।ताननुभूतान् ' असकृदत्रागमनात् । अनुभूतवाचो तच्छब्दो यच्छब्दं नापेक्षत इति प्रागुक्तम् । अजस्रं जुष्टात् । (भाग० ६।३।२८) ॥२०॥

जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥२१॥

वैमुख्यमेव दर्शयति ' जिह्वेति । गुणं सत्त्वादिकमधिकृत्य प्रवृत्तं नाम । यद् येषाम् । यमः स्वदूतान् । (भाग० ६।३।२९) ॥२१॥

पानेन ते देव कथासुधायाः
प्रवृद्धभक्त्या विशदाशया ये ।
वैराग्यसारं प्रतिलभ्य बोधं
यथाञ्जसान्वीयुर्विकुण्ठधिष्ण्यम्[1] ॥२२॥

1 भाग० ०युरकुण्ठधिष्ण्यम्

तथापरे चात्मसमाधियोग-
बलेन जित्वा प्रकृतिं बलिष्ठाम् ।
तामेव धीराः पुरुषं विशन्ति
तेषां श्रमः स्यान्न तु सेवया ते ॥२३॥

ननु सांख्ययोगाभ्यासबलाद् विविक्तप्रकृतिपुरुषस्य मृत्युभयं न भविष्यति किं भक्त्या तत्राह द्वाभ्याम्, पानेनेति। प्रथमं कथासुधापानम्, ततः कथानायके भक्तिः। ततोऽन्यत्र वैराग्यम्। ततः कथानायकस्वरूपज्ञानम्, ततः समाधिरविक्षिप्तचित्तत्वम्। तदर्थं योगः स्वपदप्राप्तिः।

यथायं मार्गस्तथाऽन्योऽपीत्याह, आत्मनः स्वस्य समाधिरविक्षिप्त-चित्तत्वं तदर्थं योगो यमनियमादिसेवा। तद्बलेन प्रकृतिजयः, ततस्त-द्रहितपुरुषप्राप्तिः। अनयोर्मार्गयोर्मध्ये द्वितीये श्रमः। तत्त्वानि विष्णुम्। (भाग० ३।५।४६-४७) ॥२२-२३॥

अहो ममामी वितरन्त्यनुग्रहं
हरिं गुरुं यज्ञभुजामधीश्वरम् ।
स्वधर्मयोगेन यजन्ति मामका
निरन्तरं क्षौणितले दृढव्रताः ॥२४॥

एवं भक्तिसामान्यं स्तुत्वा तद्विशेषान् स्तुवानः सात्त्विकीस्तिस्रस्त्रिभिः स्तौति, अहो इत्यादिना। अहो सभ्याः। मम पृथोः। अमी मद्देश-वासिनः। यजन्ति पूजयन्ति। अत्र स्वधर्मेति विधिसिद्धयर्था स्तुता। पृथुः सभ्यान् (भाग० ४।२१।३६) ॥२४॥

मन्ये धनाभिजनरूपतपःश्रुतौज-
स्तेजःप्रभावबलपौरुषबुद्धियोगाः ।

नाराधनाय हि भवन्ति परस्य पुंसो-
भक्त्या तुतोष भगवान् गजयूथपाय ॥२५॥

अभिजनः कुलम् । तपः कृच्छ्रादि । श्रुतं शास्त्रम् । ओजो मनःपाटवम् । तेजः कान्तिः । प्रभावः शौर्योष्मा । बलं देहसौष्ठवम् । पौरुषं सम्भावना । बुद्धिर्मन्त्रशक्तिः । योग उद्यमः । हि यस्मात् । धनादिहीनाय गजयूथपाय गजेन्द्राय तुतोष । अत्र कर्मक्षयार्था । गजो हि कर्मक्षयार्थं स्तुतवान् । (भाग० ७।६।६) ॥२५॥

विप्राद् द्विषड्गुणयुतादरविन्दनाभ-
पादारविन्दविमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थ-
प्राणं पुनाति स कुलं न तु भूरिमानः ॥२६॥

द्विषड् द्वादश । गुणा धनाभिजनादयः । यद्वा

[1]शमो दमस्तपः शौचं क्षान्त्यार्जवविरक्तताः ।
मौनविज्ञानसन्तोषाः सत्यास्तिक्ये द्विषड्गुणाः ॥

इत्युक्ताः । षड्गुणा इति पाठे यजनादयः[2] । श्वपचमन्त्यजम् । ईहितं कायचेष्टा । अर्थः पश्वादिः । प्राणो जीवनम् । स श्वपचः । भूरिमानो बहुगर्वो विप्रः । अनेन विष्णुप्रीत्यर्था । अत्र हि वाक्ये सर्वस्य भगवदर्पणे तात्पर्यम् । प्रह्लादो नृसिंहम् । (भाग० ७।६।१०) ॥२६॥

---

1 श्रीमद्भागवतसप्तमस्कन्धीयनवमाध्यायदशमश्लोकटीकायां श्रीधरस्वामिधृतमहाभारतवचनम् ।

2 अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट् कर्माण्यग्रजन्मनः ॥ मनुः १।८८

देवर्षिभूताप्तनृणां पितॄणां
न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं
गतो मुकुन्दं परिहृत्य कर्तम् ॥२७॥

अथ कर्मज्ञानमिश्रां द्वाभ्यां स्तुवन् तत्कर्तु विधिनिषेधातीतां दर्शयति । देवेति । आप्तनृणाम् अवसरे प्राप्तानामतिथीनामित्यर्थः । वैश्वदेवब्रह्मयज्ञभूतवल्यतिथिपूजानित्यश्राद्धाख्यपञ्चमहायज्ञकरणेन देवादीनां नायमधीनः । नाप्यकरणे ऋणी । सर्वात्मना सर्वभूतेषु भगवद्भावदर्शनेन । कर्तं भेदम् । कृतीच्छेदने इत्यस्य रूपम् । (भाग० ११।५।४१) ॥२७॥

स्वपादमूलं भजतः प्रियस्य
त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथञ्चि-
द्धुनोति सर्वं हृदि सन्निविष्टः ॥२८॥

विध्यतीतामुक्त्वा निषेधातीतामाह । स्वपादेति । अन्यभावो भेदबुद्धिः । विकर्म पापम् । उत्पतितम् अकस्माद्घटितम् । कथञ्चित् प्रमादेन । ननु निष्कामस्य भजनं न तु पापक्षयार्थमित्यत आह । हृदि सन्निविष्ट इति । वस्तुसामर्थ्यादित्यर्थः । करभाजनो निमिम् । (भाग० ११।५।४२) ॥२८॥

शुद्धिर्नृणां न तु तथेड्य दुराशयानां
विद्याश्रुताध्ययनदानजपक्रियाभिः[1] ।
सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध-
तच्छ्रद्धया[2] श्रवणसंभृतया यथा स्यात् ॥२९॥

वस्तुसामर्थ्यमेवाह । शुद्धिरिति । हे ईड्य स्तुत्य ! विद्या वैश्वानराद्-

1 भाग० ०दानतपःक्रियाभिः　　2 भाग० ०सच्छ्रद्धया ।

पासना । श्रुतं शास्त्रम् । अध्ययनं वेदाक्षरग्रहणम् । दानं हिरण्यादेः सत्पात्रेऽर्पणम् । जपो मन्त्रावृत्तिः । क्रिया अग्निहोत्रादि कर्म । सत्त्वात्मनाम् ऋषभ सात्त्विकश्रेष्ठ । विशुद्धोर्जितसत्त्वकारणात् । ब्रह्माद्याः श्रीकृष्णम् । (भाग० ११।६।६) ॥२६॥

ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ।
अव्रतातप्ततपसः सत्सङ्गान्मामुपागताः ॥३०॥

उक्तेऽर्थे निदर्शनमाह । ते नेति । ते दैत्यादयः । अव्रताश्च ते अतप्त-तपसश्च । श्रीकृष्ण उद्धवम् । (भाग० ११।१२।७) ॥३०॥

बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः ।
प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥३१॥
यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥३२॥

अस्याञ्च प्रवृत्तायां विषयाद्यनर्थश्च शाम्यतीत्याह । बाध्येति द्वाभ्याम् । भस्मसात् करोति कार्त्स्न्येन भस्मीकरोति । कृत्स्नशः ससंस्काराणि । (भाग० ११।१४।१८-१६) ॥३१-३२॥

न साधयति मां योगो न साङ्ख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥३३॥
भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥३४॥

संसारसिन्धुमतिदुस्तरमुत्तितीर्षो-
र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथारसनिषेवणमन्तरेण
पुंसो भवेद्विविधदुःखदवार्दितस्य ॥३५॥

अथ ज्ञानमिश्रां त्रिभिः स्तौति । न साधयतीति । न साधयति न वशीकरोति । योगश्चित्तवृत्तिनिरोधः । साङ्ख्यं प्रकृतिपुरुष-विवेकः । धर्मो नित्य-नैमित्तिकानुष्ठानम् । स्वाध्यायो मन्त्रजपः । तपः पराकादि । त्यागः सन्न्यासः । ऊर्जिता उत्कटा । (भाग० ११।१४।२०) ॥३३॥

अपि सम्भवात् सम्भवादपि । सम्भूतमात्रापि पुनाति । किं पुनः प्रौढा । श्वपाकोऽन्त्यजः । श्रीकृष्ण उद्धवम् । (भाग० ११।१४।२१) ॥३४॥

अन्तरेण विना । दवो वनवह्निः । अत्रोर्जितैका लीलाकथेति पदानि ज्ञान-मिश्रत्वे बीजम् । शुको राजानम् । (भाग० १२।४।४०) ॥३५॥

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥३६॥

अतः परं शुद्धभक्तिं स्तौति । अकाम इति । अकामो भक्तिमात्रकामः । सर्वेषूक्तानुक्तेषु कामो यस्य । भक्तियोगः श्रद्धा भक्तिः । परं पुरुषं विष्णुम् । शुको राजानम् । (भाग० २।३।१०) ॥३६॥

यत्पादपङ्कजपलाशविलासभक्त्या
कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तद्वन्न रिक्तमतयो यतयोऽपि रुद्ध-
स्रोतोगणास्तमरणं भज वासुदेवम् ॥३७॥

मुक्तिकामस्तु विशेषतो भक्तिमेवाद्रियेत इत्याह । यत्पादेति । पलाशं दलम् । अङ्गुल्यवयवः । विलासः सौन्दर्यम् । कर्माण्याशेरतेऽस्मिन्निति कर्माशयश्चित्तम् । ग्रथितं गुम्फितम् । उद्ग्रथयन्ति त्रैगुण्यग्रन्थिं भिन्दन्ति । रिक्तमतयः सोऽस्मीति भावुकाः । स्रोत इन्द्रियम् । तद्वन्नोद्ग्रथयन्ति । यद्वत् पूर्णमतयस्तं प्रपद्यन्त इति । भेदभावनायां ज्ञेयं पृथगस्तीति मतेः पूर्णत्वम् । अभेदभावनायान्तु ज्ञातैवेति रिक्तता । अरणं शरणम् । कुमाराः पृथुम् । (भाग० ४।२२।३९) ॥३७॥

नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः ।
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता: ॥३८॥

न चास्यामन्येष्विव वृत्तजात्याद्येव प्रयोजकमित्याह । नालमिति । हे असुरात्मजाः दैत्यपुत्राः । वृत्तं सदाचारः । (भाग० ७।७।५१) ॥३८॥

न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ॥३९॥

व्रतानि हरिदिनोपवासादीनि । अमला शुद्धा तया । विडम्बनं जीवनाय नटनम् । (भाग० ७।७।५२) ॥३९॥

रायः कलत्रं पशवः सुतादयो
गृहा मही कुञ्जरकोषभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः
कुर्वन्ति मर्त्यस्य कियत् प्रियञ्चलाः ॥४०॥
एवं हि लोकाः क्रतुभिः कृता अमी
क्षयिष्णवः सातिशया न निर्मलाः ।
तस्माददृष्टश्रुतदूषणं परं
भक्त्योक्तयेशं भजतात्मलब्धये ॥४१॥

ननु किं भगवत्प्रीत्या दृष्टश्रुतविषयैरेवात्मप्रीतिर्भविष्यतीति तत्राह द्वाभ्यां राय इति । रायो धनानि । भूतिरैश्वर्यम् । कामाः कामसाधनानि । क्षणभङ्गुरायुषो मर्त्यस्य । यतश्चलाश्चपलाः । प्रह्लादः बालान् । (भाग० ७।७।३९-४०) ॥४०-४१॥

भयं द्वितीयाभिनिवेशतः स्या-
दीशादपेतस्य विपर्ययोऽस्मृतिः ।

तन्माययातो बुध आभजेत्तं
भक्त्यैकयेशं गुरुदेवतात्मा ॥४२॥

एकया इत्युक्तम् । तत्र हेतुमाह ' भयमिति । द्वितीये देहादावभिनिवेशाद् यद्भयं तत्तन्मायया स्यात् । किन्तद्भयमित्यत आह ' ईश्वरादुपाधिना पृथग्भूतस्य विपर्ययः[1] संसारित्वम् । भ्रम ईश्वरत्वास्मृतिश्चेति ' गुरौ देवताबुद्धिः । (भाग० ११।२।३७) ॥४२॥

भक्तिः परेशानुभवो विरक्ति-
रन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाश्नतः स्यु-
स्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥४३॥

यदा चैवं भक्तिर्जायते अत एव सगुणोपासनामुपास्य साक्षात्कारे सति तस्यात्मतया स्फुरणात्तत्रैवानुपाधिः प्रेमा अविद्यायाश्चावरकत्वनिवृत्तिरात्मकामता च भवतीत्याह ' भक्तिरिति । भक्तिः प्रेमात्मिका । यया विष्णुं विना क्षणमपि न वितिष्ठते । तत आत्मनो ब्रह्मत्वानुभवः । तस्य च परमानन्दरूपतया अन्यत्र विरक्तिररुचिः । प्रपद्यमानस्य भक्त्यङ्गवर्गेण भजतः । एककालत्वे दृष्टान्तः । यथेति । यथा भुञ्जानस्य प्रतिग्रासं सुखलब्धिः क्षुधानिवृत्तयः स्युः । (भाग० ११।२।४२) ॥४३॥

इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या
भक्तिर्विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजन्
ततः परां शान्तिमुपैति साक्षात् ॥४४॥

---

1 विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् । योगदर्शनम् १।१।८

त्रिषु जातेषु कृतकृत्यतामाह ' इतीति । अनुवृत्तिरविच्छेदः । कविर्निमिम् । (भाग० ११।२।४३) ॥४४॥

एवं सुरासुरगणाः समदेशकाल-
हेत्वर्थकर्ममतयोऽपि फलेविकल्पाः ।
तत्रामृतं सुरगणाः फलमञ्जसापु-
र्यत्पादपङ्कजरजःश्रयणान्न दैत्याः ॥४५॥

भक्त्यैव फलावाप्तिरित्यत्र निदर्शनमाह ' एवमिति । हेतुः साधनम् । अर्थः प्रयोजनम् । कर्म उद्यमः । फलेविकल्पाः । षष्ठीस्थाने योगेतिवत् संज्ञायामप्यलुक्[1] । अञ्जसा अक्लेशेन । (भाग० ८।६।२८) ॥४५॥

यद्युज्यतेऽसुवसुकर्ममनोवचोभि-
र्देहात्मजादिषु नृभिस्तदसत् पृथक्त्वात् ।
तैरेव सद्भवति यत् क्रियतेऽपृथक्त्वात्
सर्वस्य तद्भवति मूलनिषेचनं यत् ॥४६॥

गृह एवासक्तस्यापि भगवत्प्रीतेरुपायमाह ' यदिति । यद्युज्यते तत्परिभूयते । असवः प्राणाः । तैर्देहादिभिः अपृथक्त्वात् सर्वात्मकविष्णाराधनबुद्ध्या । विष्णुर्हि मूलम् । शुकः । (भाग० ८।६।२६) ॥४६॥

न तेऽरविन्दाक्ष पदोपसर्पणं
मृषा भवेत् सर्वसुहृत्प्रियात्मनः ।
यथेतरेषां पृथगात्मनां सता-
मदीदृशो यद्वपुरद्भुतं हि नः ॥४७॥

1 पाणिनिः २।१।४४

न च राजादिवद्विष्णुभजने फलविकल्प इत्याह ' न त इति । सुहृत्त्वात् प्रत्युपकारमुपकारकत्वं ' प्रियत्वात् सुखसेव्यत्वम् ' आत्मत्वान्निकटस्थत्वम् । यद् यस्मात् पृथगात्मनां भेदबुद्धीनामपि नोऽस्मान् । अद्भुतं मात्स्यं वपुरदीदृशः दर्शितवानसि । वैवस्वतो भगवन्तम् । (भाग० ८।२४।३०) ॥४७॥

तस्मिन् भवन्तावखिलात्महेतौ
नारायणे कारणमर्त्यमूर्तौ ।
भावं विधत्तो नितरां महात्मन्
किं वावशिष्टं युवयोः सुकृत्यम् ॥४८॥

भगवत्प्राकट्ये सति कृतार्थतामाह ' तस्मिन्निति । आत्मतात्त्विकं रूपं हेतुनिर्मितम् । कारणेन सृष्ट्यादिना मनुष्यमूर्तिर्यस्य । तत्त्वतस्त्वमूर्तिः । भावं चित्तवृत्तिम् । हे महात्मन् नन्द! युवयोर्यशोदानन्दयोः । उद्धवो नन्दयशोदे । (भाग० १०।४६।३३) ॥४८॥

यत्पादसेवाभिरुचिस्तपस्विना-
मशेषजन्मोपचितं मलं धियः ।
सद्यः क्षिणोत्यन्वहमेधती सती
यथा पदाङ्गुष्ठविनिःसृता सरित् ॥४९॥

तस्मिन्नित्युक्तम् ' स क इति तमाह ' यत्पादेति । तपस्विनां तापत्रय-सन्तप्तानां मलं कालुष्यम् । क्षिणोति नाशयति । एधती वर्धमाना विषय सौन्दर्यात् । सती साध्वी विषयविशुद्धत्वात् । पृथुः सभ्यान् प्रति । (भाग० ४।२१।३१) ॥४९॥

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥५०॥

शुद्धभक्तेरन्यमुपायं षड्भिर्निन्दति । वस्तुतो गहनत्वेन निराकारत्वे प्रतिपत्तये पुनः पुनर्वचनं न दोषायेत्याह । न ह्यत इति । इह दृष्टश्रुतसुखरूपायां संसृतौ । भगवतीति विशेषणं विषयसौन्दर्यादेव भक्तिनिर्वाह इत्येवमर्थम् । शुकः । (भाग० २।२।३३) ॥५०॥

धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ।
मद्भक्त्योपेतमात्मानं न सम्यक् प्रपुणाति हि ॥५१॥

धर्म इति । आत्मानं चित्तम् । (भाग० ११।१४।२२) ॥५१॥

कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुध्येद् भक्त्या विनाशयः ॥५२॥

पूतात्मनश्चिह्नान्याह । कथमिति । प्रत्येकं विनाशब्दस्य निर्देशाद् रोमहर्षादीनां प्रत्येकं शुद्धिहेतुत्वम् । (भाग० ११।१४।२३) ॥५२॥

यथाग्निना हेम मलं जहाति
ध्मातं पुनः स्वं भजते च रूपम् ।
आत्मा च कर्मानुशयं विधूय
मद्भक्तियोगेन भजत्यथो माम् ॥५३॥

भक्त्या सवासनचित्तशुद्धिरिति । दृष्टान्तेन स्पष्टयति यथेति । ध्मातं तप्तम् । कर्मानुशयो लिङ्गदेहम् । भक्तियोगेन भजतीति भक्तिरेव भजनहेतुर्न फलाकाङ्क्षेत्युक्तम् । अथो शुद्ध्यनन्तरम् । भगवान् उद्धवम् । (भाग० ११।१४।२५) ॥५३॥

तापत्रयेणाभिहतस्य घोरे
सन्तप्यमानस्य भवाध्वनीश ।
पश्यामि नान्यच्छरणं तवाङ्घ्रि-
द्वन्द्वातपत्रादमृताभिवर्षात् ॥५४॥

शरणमाश्रयः। अमृतं सुधा मोक्षश्च। उद्धवः श्रीकृष्णम्। (भाग० ११।१६।६) ॥५४॥

मन्येऽकुतश्चिद् भयमच्युतस्य
पादाम्बुजोपासनमत्र नित्यम्।
उद्विग्नबुद्धेरसदात्मभावाद्
विश्वात्मना यत्र निवर्तते भीः ॥५५॥

मन्य इति। असति देहादावात्मभावादुद्वेगः। नन्वमरत्वमप्यकुतश्चिद्-भयं नेत्याह ' विश्वात्मना कार्त्स्न्येन। अमरत्वन्तु सावधिकमित्यर्थः ' आभूत-संप्लवं स्थानममृतत्वञ्च भाष्यत इति वचनात्। कविर्निमिम्। (भाग० ११।२।३३) ॥५५॥

राजन् पतिर्गुरुरलं भवतां यदूनां
दैवं प्रियः कुलपतिः क्व च किङ्करो वः।
अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो
मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम् ॥५६॥

शुद्धभक्तिर्मुक्तेरपि दुर्लभा इत्याह ' राजन्निति। राजन् हे परीक्षित्। पतिर्दृष्टोपद्रवनिवारणात्। गुरुर्हितोपदेशात्। भवतां पाण्डवानाम्। दैवम-दृष्टोपद्रवनिवारणात्। प्रियः प्रीतिजननात्। कुलपतिः पोषणात्। किङ्करः आज्ञाकरणात्। अतः कारणादेवमस्तु। मुकुन्दो मुक्तिं ददाति न तु भक्तिम्। भक्तिदाने हि भक्तस्य संविधानं कार्यम् ' न मुक्तिदाने। शुकः। (भाग० ५।६।१८) ॥५६॥

यस्यास्ति भक्तिर्भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः।

हरावभक्तस्य कुतो महद्गुणा
मनोरथेनासति धावतो बहिः ॥५७॥

भजमानः पुमान् देवैरप्याश्रियत इत्याह ' यस्येति । अकिञ्चना शुद्धा । सुरा इन्द्रादयः । गुणा ऐश्वर्यादयः । गुणैः समासते गुणद्वारा सम्यग्-वसन्तीत्यर्थः । महतामिन्द्रादीनां गुणा महद्गुणाः । असति विषये । (भाग० ५।१८।१२) ॥५७॥

तस्माद्रजोरागविषादमन्यु-
मानस्पृहाभयदैन्याधिमूलम् ।
हित्वा गृहं संसृतिचक्रबालं
नृसिंहपादं भजताकुतोभयम् ॥५८॥

शुद्धभक्तिं स्तुत्वोपसंहरति ' तस्मादिति । रजो रजःकार्यं तृष्णादि । रागः स्नेहपाशः । मन्युः क्रोधः । मानो दर्पः । आधिर्मनोव्यथा । संसृतीनां दुरवस्थानां चक्रबालं मण्डलं यस्मिन् गृहे । प्रह्लादो नृसिंहम् । (भाग० ५।१८।१४) ॥५८॥

न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥५९॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तिमहिमा ।
इति षष्ठोऽध्यायः ॥६॥

किं बहुना भक्तिमेवैकामाद्रियध्वमित्याह ' नेति । युज्यमाना क्रियमाणा । ब्रह्मसिद्धिर्मोक्षः । कपिलो देवहूतिम् । (भाग० ३।२५।१९) ॥५९॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तिमहिमा ।
समाप्तोऽयं षष्ठोऽध्यायः ॥६॥

सप्तमोऽध्यायः

अथ विष्णुभक्त्यङ्गवर्गप्रकरणम् ।

तत्र विष्णुभक्त्यङ्गवर्गलक्षण भेदाश्च ।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोति यद् यत् सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥१॥

तदेवं भक्तिप्रकरणमुपायत्वेनेत्युक्तम् । तत्रेतिकर्त्तव्यतां वक्तुमिदमारभ्यते । अथेति । तत्राप्यङ्गसामान्यं लक्षयति । कायेनेति । मनसा संशयः । इन्द्रियैश्चक्षुरादिभो रूपोपलम्भादि । बुद्ध्या निश्चयः । आत्मना अहङ्कारेणाभिमानः । वाशब्दश्चार्थे । तेनानुक्तस्य सङ्कल्पहेतोर्महत्तत्त्वस्य समुच्चयः । इन्द्रियैरित्येव सिद्धे कायाद्युक्तिरेकैकव्यापारस्याप्यङ्गत्वार्थम् । अत एव तुल्यकक्षाणां विकल्पार्थः प्रथमो वाशब्दः । यद् यदिति वीप्सया । सर्वस्य यावद्देहं क्रियमाणस्यार्पणमित्युक्तम् । तत् किं निषिद्धमप्यनुमतं नेत्याह । स्वभावमिति । स्वस्य भाव्यते प्राप्यते शास्त्रेणेति स्वभावम् । स्वविहितमित्यर्थः । तथापि किं विशिष्टनिस्तारबुद्ध्यार्पयेन्नेत्याह । अनुसृत इति । आत्मेश्वरयोः स्वस्वामिभावानुसन्धानमनुसरणं परस्मै भगवदादिरूपाय । इतिशब्दः प्रकारे । तेनेदं नारायणायेत्यनेन प्रकारेणार्पयेत् । नान्यथेत्यर्थः । अत्र हि चतुर्थीनिर्देशात्तादर्थ्यावगमात् सङ्कल्पमित्यन्वयः । ततश्च भगवदर्थत्वेन सर्वस्य सत्कर्मणः करणं भक्त्यङ्गमिति लक्षणार्थः । कविर्निमिम् । (भाग० ११।२।३६) ॥१॥

स एकोनविंशतिधा। षट्त्रिंशद्वर्गः। त्रिंशद्वर्गः। षड्विंशतिवर्गः। पञ्चविंशतिवर्गः। चतुर्विंशतिवर्गः। ।वशतिवर्गः। एकोनविंशतिवर्गः। अष्टादशवर्गः। पञ्चदशवर्गः। त्रयोदशवर्गः। द्वादशवर्गः। एकादशवर्गः। दशवर्गः। नववर्गः। सप्तवर्गः। षड्वर्गः। पञ्चवर्गः। चतुर्वर्गः। त्रिवर्गः। एते त्रयो यथोत्तरमन्तरङ्गाः॥

तत्र षट्त्रिंशद्वर्गः

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्॥२॥

एवं वर्गलक्षणमुक्त्वा तद्भेदान् वक्तुमाह ' स इति। स वर्गः। नन्वेकोनविंशतौ वर्गेषु किमुत्तरोत्तरस्य पूर्वपूर्वबाधकत्वम्? किंवा यवव्रीहिवत् सर्वेषां विकल्पः। आद्ये सर्वबाधकस्यैव कथनेन चरितार्थत्वादन्योक्त्यानर्थक्यम्। द्वितीये विषमशिष्टा विकल्पानुपपत्तिरिति चेत्तत्राह ' एते चेति। अन्तरङ्गत्वञ्च पूर्वपूर्वस्माद्वर्गादुत्तरोत्तरस्मिन् सारभूतानामङ्गानामुपलम्भात्। वस्तुतस्त्वेकस्मिन्नेव सर्वसद्भावादेकवर्गत्वम्। अवस्थाभेदेन तत्तदङ्गपरित्यागादनेकत्वम्। तत्र षट्त्रिंशद्वर्गं दर्शयन् द्वाभ्यां पूर्वरङ्गमाह ' तस्मादिति। तस्माल्लोकद्वयस्यापि सदोषत्वात् प्रपद्येत। निर्विघ्नः समित्पाणिराचार्यमुपतिष्ठेत। श्रेयउत्तमम् श्रेयःसु सत्कर्मसु मध्ये उत्तमं भक्तयज्ञाख्यम्। शाब्दे ब्रह्मणि वेदतात्पर्यविचारेण। परे चापरोक्षानुभवेन। निष्णातं निष्ठाप्राप्तम्। उपशमाश्रयमित्यनेनैव शिष्यवात्सल्यादयोऽन्येऽपि गुणा ज्ञेयाः। (भाग० ११।३।२१)॥२॥

तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः।
अमाययाऽनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः॥३॥

तत्रेति। तत्र गुरुकुले। गुरुरेव आत्मा दैवतञ्च यस्य। आत्मवद्देववच्च गुरुं संस्कुर्यादित्यर्थः। गुरुभक्त्या हि सर्वं सफलम्।

तदुक्तम्—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति ।

माया कपटम् । अनुवृत्तिः शुश्रूषा । यैर्धर्मैर्हरिस्तुष्येत । ननु कथं ज्ञेया हरितुष्टिः । तत्राह ' आत्मा तुष्येत् । आत्मतुष्ट्या विष्णुतुष्टिरनुमेया । विष्णवात्मनोर्विम्बप्रतिबिम्बत्वादित्यर्थः । ननु हरौ तुष्टे किं तत्राह ' आत्मद इति । (भाग० ११।३।२२) ॥३॥

सर्वतो मनसोऽसङ्गमादौ सङ्गञ्च साधुषु ।
दयां मैत्रीं प्रश्रयञ्च भूतेष्वद्धा यथोचितम् ।।४।।

अथाङ्गान्याह ' सर्वत इति । सर्वत इहामुत्रभोगेषु । असङ्गम् अनासक्तिम् । शिक्षेदिति सर्वैर्द्वितीयान्तैः सम्बध्यते । सङ्गः सान्निध्यम् । यथोचितमिति क्रमाद् दुःखिसुखिपुण्यवत्सु ददातीति त्रीणि । प्रश्रयो विनयः । अद्धा तत्त्वतः । (भाग० ११।३।२३) ॥४॥

शौचं तपस्तितिक्षाञ्च मौनं स्वाध्यायमार्जवम् ।
ब्रह्मचर्यमहिंसाञ्च समत्वं द्वन्द्वसंज्ञयोः ।।५।।

शौचमिति । शौचं मृज्जलाद्यैर्बाह्यम् । रागद्वेषादिराहित्यमान्तरम् । तप एकादश्युपवासादि स्वधर्मनिष्ठा वा । मौनम् अभाषणं मितभाषणं वा । स्वाध्यायो द्वादशाक्षरादिमन्त्रजपः । आर्जवं सरलता । ब्रह्मचर्यं यस्य यथायोग्यम् । गृहस्थानामृतौ स्वदारगमनम् ' अन्येषान्तु

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।

सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेवच ॥

इत्यष्टाङ्गमैथुनवर्जं ब्रह्मचर्यम् । अहिंसा द्रोहाद्यकरणम् । द्वन्द्वसंज्ञयार्मानापमानादिकयोः समत्वं तुल्यबुद्धित्वम् । (भाग० ११।३।२४) ॥५॥

सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषं येन केनचित् ॥६॥
श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।
मनो वाक् कर्म दण्डञ्च सत्यं शमदमावपि ॥७॥

सर्वत्रेति । सर्वभूतेषु आत्मन ईश्वरत्वेनानुवृत्त्या दर्शनम् । कैवल्यमेकाकिता । अनिकेततां स्थानाभिमानराहित्यम् । विविक्तचीरवसनं पूतवस्त्रखण्डपरिधानम् । यदृच्छालब्धेनालंबुद्धिः सन्तोषः । श्रद्धामिति भगवत्प्रतिपादके शास्त्रे श्रद्धाम् । अन्यप्रतिपादके चानिन्दामित्येकम् । दण्डो दुःसङ्कल्पपारुष्यचापलानां त्यागः । सत्यं मृषावादवर्जनम् । शमः विषयेभ्यो बुद्धेरुपरतिः । दमश्चक्षुरादीनाम् । चशब्दो भिन्नक्रमः । (भाग० ११।३।२५-२६) ॥६-७॥

श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ।
जन्मकर्मगुणानाञ्च तदर्थेऽखिलचेष्टितम् ॥८॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ।
दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम् ॥९॥

श्रवणमिति । हरेर्जन्मादीनां श्रवणादित्रयम् । तदर्थे हर्यर्थे सर्वचेष्टा । इष्टमिति भावे क्तः । वृत्तमाचारतः प्राप्तस्याचरणम् । षष्ठीविषये द्वितीया । इष्टादेर्दारादेश्च तादर्थ्यम् । परस्मै इन्द्रादये । निवेदनं समर्पणम् । यत्तस्यापि तादर्थ्यं शिक्षेत् । अत्राखिलचेष्टितशब्देन निर्देशात् । एकैकत्वं दारादीनां तादर्थ्यं शुश्रूषया । (भाग० ११।३।२७-२८) ॥८-९॥

एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ।
परिचर्याञ्चोभयत्र महत्सु नृषु साधुषु ॥१०॥

एवमिति । एवं यथा कृष्णे तथेत्यर्थः । कृष्ण आत्मा नाथ इति धीर्येषां

तेषु । सौहृदम् अनिमित्तं बन्धुत्वम् । मनुष्येष्विति जातिविशेषविवक्षार्थम् । किन्तदुभयं तदाह ' महत्स्विति । महान्त उत्कृष्टाः । साधवः सदाचाराः । उभयग्रहणमभेदेन परिचर्यार्थम् । (भाग० ११।३।२६) ॥१०॥

परस्परानुकथनं पावनं भगवद्यशः ।
मिथोरतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥११॥

परस्परेति । अनु अनुवृत्त्या विच्छेदेन कथनं शिक्षेत् । किम्भूतं कथनम्' भगद्यशः भगवतो यशो यस्मिन् अनुकथने । किमिति परस्परं तत्राह' मिथ इति। रतिर्भगवति इत्यर्थात् सिद्धम् । तुष्टिः सुखम् । निवृत्तिरित्यर्थसिद्धम् । तुष्टिः सुखम् । निवृत्तिस्तापापगम इति द्वयमात्मनः । एतत्त्रयं परस्परमनुकथनादेः स्यात् । नैकाकितयेति वक्तुं मिथःशब्दत्रयम् । (भाग० ११।३।३०) ॥११॥

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥१२॥

स्मरन्त इति । स्मरन्तः स्वयम् । (भाग० ११।३।३१) ॥१२॥

क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्
हसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥१३॥

अथ षट्त्रिंशवर्गानुष्ठानस्य फलमाह ' भक्त्येति । भक्तेरङ्गवर्गभजनम् । तथा भक्तिः प्रेम । उत्पन्नभक्तेश्चिह्नान्याह ' बिभ्रतीति । उत्पुलकां उद्भूतरोमाञ्चाम् । क्वचिदिति रुदन्ति आनन्दाश्रूणि विमुञ्चन्ति । नन्दन्ति सुखमनुभवन्ति । अलौकिकाः लोकव्यावृत्ताः । अजं विष्णुम् । अनुशीलयन्ति तल्लीलामभिनयन्ति । अतः परं विष्णुमेत्य साक्षात्कृत्य

तूष्णीं भवन्ति उपशाम्यन्ति। यतोनिर्वृताः समाप्तपरमानन्दाः। (भाग० ११।३।३२) ॥१३॥

इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया।
नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥१४॥

कुतः पुनरेषामञ्जस्त्वमित्यत आह' इतीति। तदुत्थया भागवत धर्मोत्थया' भक्तेरङ्गत्वे लिङ्गमितिभावः। प्रबुद्धो निमिम्। (भाग० ११।३।३३) ॥१४॥

त्रिंशद्वर्गः

सत्यं दया तपः शौचं तितिक्षेज्या[1] शमोदमः।
अहिंसा ब्रह्मचर्यञ्च त्यागः स्वाध्याय आर्जवम् ॥२५॥

त्रिंशद्वर्गमाह ' सत्यमिति। इज्या भगवदुद्देशेन हविस्त्यागः। त्यागः काम्यनिषिद्धकर्मणाम्। (भाग० ७।११।८) ॥१५॥

सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥१६॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ॥१७॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ॥१८॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति ॥१९॥

सन्तोष इति। समदृशः रिपुमित्रोदासीनेषु तुल्यबुद्धयः। ग्राम्येहा विषयार्थं चेष्टा। नृणां विपर्ययेहेक्षा स्वस्वार्थमतेः सुखार्थप्रयत्नस्य दुःखफलत्वावेक्षणम्। विमर्शनमात्मनोऽसङ्गोदासीनतयानुसन्धानम्। अन्नाद्यं भक्ष्यभोज्यादि। आदिशब्दात् फलमूलादेश्च। भूतेभ्यः श्वकाकातिथिजलचरादिभ्यो

1 भाग० ०क्षेचा।

गृहस्थाद्यै विभागः । यथार्हत इति । यस्य यत्संविभागेऽर्हता तथा तस्येत्यर्थः । तेषु भूतेषु । आत्मन ईश्वरत्वेन ज्ञानम् । विशेषतो मनुष्येषु ज्ञानाधिक्यात् । हे पाण्डव युधिष्ठिर ! अस्येत्यभिनयेन पुरस्थं श्रीकृष्णं निर्दिशति । महतां गतेर्गम्यस्य सेवा चित्तानुवृत्तिः । सा चास्य श्रुतिस्मृति-रूपज्ञानलङ्घनात् । इज्या पूजा । अवनतिः प्रणामः । दास्यं किङ्करत्वम् । सख्यम् ।

अहितात् प्रतिषेधश्च हिते चैव प्रवर्तनम् ।
व्यसने चापरित्यागस्त्रिविधं सखि-लक्षणम् ॥

इत्यत्रोक्तस्य सखिधर्मस्य भगवत्त्वेन भावनम् । अन्यानि तु स्वगतानि । आत्मसमर्पणं स्वशरीरेऽस्य स्वातन्त्र्यलक्षणसङ्गम् । येन धर्मेण साक्षा-द्धर्मान्तरानुष्ठानाव्यधानेन । शेषं प्रागवत् । नारदो युधिष्ठिरम् । (भाग० ७।११।८-१२) ॥१६-१८॥

हंसे गुरौ मयि भक्त्याऽनुवृत्त्या
वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या
जिज्ञासया तपसेहानिवृत्त्या ॥२०॥
मत्कर्मभिर्मत्कथया च नित्यं
मद्देवसङ्गाद् गुणकीर्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्रा
जिहासया देहगेहात्मबुद्धेः ॥२१॥
अध्यात्मयोगेन विविक्तसेवया
प्राणेन्द्रियात्माभिजयेन सध्र्यक् ।
सच्छ्रद्धया ब्रह्मचर्येण शश्व-
दसम्प्रमादेन यमेन वाचाम् ॥२२॥
सर्वत्र मद्भावविचक्षणेन
ज्ञानेन विज्ञानविराजितेन ।

योगेन धृत्युद्यमसत्त्वयुक्तो
लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम् ॥२३॥

षड्विंशतिवर्गमाह । हंसेत्यादि । अनुवृत्तिः परिचर्या । सा च भक्त्या तात्पर्येण । न तु यथाकथञ्चित् । हंसे गृहमार्जनादिका । गुरौ लब्धार्पणादिका । वितृष्णा दृष्टश्रुतविषये वैतृष्ण्यम् । द्वन्द्वं शीतोष्णादि । सर्वत्र ब्रह्मपदादिषु । व्यसनं कालभयम् । जिज्ञासा आत्मनः । तपः अयाचितादि । ईहानिवृत्तिः चेष्टात्यागः । मत्कर्मभिर्मदर्पितकर्मभिः । मत्कथा कथनमन्यं प्रति । अहं देवो येषां ते मद्देवा विष्णुभक्ताः । कीर्तनम् एकाकिना । निर्वैरमहिंसा । साम्यं शत्रुमित्रोदासीनेषु तुल्यबुद्धिता । उपशमो निरभिमानता । हे पुत्रा देहे गेहे चाहं ममेतिबुद्धेर्हानेच्छया । अध्यात्मयोगो मोक्षशास्त्राभ्यासः । विविक्तमेकान्तः । प्राणादीनामभिजयः क्रमात् प्राणायामप्रत्याहारधारणादिभिः । अत्र प्राणायामादिबहुत्वेऽप्यभिजयस्यैकत्वादेकत्वम् । सत्सु श्रद्धा सम्यग् बुद्धिः । ब्रह्मचर्यं प्राग्वत् । सम्प्रमादो भक्तिसाधनानामभावना । वाचंयमो मौनम् । सर्वत्र स्थिरचरेषु । मद्भावो मत्सत्ता विख्यायते दृश्यते येन तत्तथा । [1]सर्वं खल्विदं ब्रह्मेत्याद्युपनिषदुत्थो बोधो ज्ञानम् । अनुभवो विज्ञानम् । विराजितमुपबृंहितम् । योगो निरोधसमाधिः । धृतिर्धैर्यफलसिद्धौ विकल्पनाभावः । उद्यमोऽनलसत्वम् । सत्त्वं क्लेशसहनत्वम् । एतान्यधिकारिविशेषणत्वादुपाङ्गानि न त्वङ्गानि । अत एवैषां तृतीयया पञ्चम्या वा न निर्देशः । कुशलः प्रत्यहं विशेषं द्रष्टुं निपुणः । लिङ्गदेहं व्यपोहेन्मोक्तुं क्षमः । अहमहङ्कारः । ऋषभः पुत्रान् । (भाग० ५।५।१०-१३) ॥२०-२३॥

स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् ।
दैवाल्लब्धेन सन्तोष आत्मविच्चरणार्चनम् ॥२४॥
ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा ।
मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥२५॥

1 छान्दोग्योपनिषत् ३।१४।१

अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ।
ब्रह्मचर्यं तपःशौचं स्वाध्यायः पुरुषार्चनम् ॥२६॥
मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः ।
प्रत्याहारश्चेन्द्रियाणां विषयान् मनसा हृदि ॥२७॥
स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् ।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥२८॥
एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम् ।
बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ॥२९॥

पञ्चविंशवर्गमाह ' स्वधर्मेति । विधर्मो निषिद्धः परधर्मश्च । ग्राम्यधर्मः स्त्रीद्यूतादिसेवा । मेध्यं भिक्षाहविष्यादि । मितन्तु '

अर्धं सव्यञ्जनान्नस्य तृतीयमुदकस्य च ।
वायोः सञ्चरणार्थञ्च चतुर्थमवशेषयेत् ॥ इति ।

क्षेमं मशकाद्यनुपहतम् । स्तेयमविधिना द्रव्यादानम् । पुरुषो विष्णुः । स्थैर्यमचञ्चलत्वम् । प्राणजयः प्राणायामः । शनैर्न सहसा । आसनादिलक्षणां जयोपायश्च पातञ्जले[1] । हृदि मनोऽधिष्ठाने । प्रत्याहारः प्रत्यानयनम्[2] । धिष्ण्यानां प्रागुक्तानां हृदयपुण्डरीकादिस्थानानाम् । एकदेशे विशिष्टा प्राणधारणा कार्या । प्राणित्यस्मादिति प्राणश्चित्तम् । देशबन्धश्चित्तस्य धारणेति हि पातञ्जले[3] । एकस्मिन् देशे चित्तं धार्यमित्यर्थः । लीला स्मितावलोकादि । समाधानं ध्यातुर्ध्येयरूपेणावस्थानम् । एतैरिति । स्वधर्माचरणाद्यैः जितप्राणोर्जितचित्तः । अन्यैः कामादिभिः । दुष्टं सदसन्मार्गगमनम् । बुद्ध्या ज्ञानरूपेण सन्मार्गगमनबुद्ध्या । अतन्द्रितः अनलसः । कपिलो देवहूतिं प्रति । (भाग० ३।२८।२-७) ॥२४-२९॥

---

1 योगदर्शनम् २।४६-५१ सू: ।

2 स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः। योगदर्शनम् २।५४ सू: ।

3 योगदर्शनम् ३।१ सू: ।

मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम् ।
परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम् ॥३०॥

चतुर्विंशतिवर्गमाह ' मल्लिङ्गेति । मल्लिङ्गानि ये मद्भक्तास्तेषां दर्शनादित्रयम् । येषां दर्शनादहं स्फुरामीति ते तथा । यथाश्रुते च लिङ्गमद्भक्तविषयत्वेन दर्शनादेः षट्त्वाच्चतुर्विंशतित्वानुपपत्तिः । परिचर्या पुष्पगुम्फनादि । प्रह्वो नम्रता । (भाग० ११।११।३४) ॥३०॥

मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥३१॥

अनु अनुवृत्त्या । (भाग० ११।११।३५) ॥३१॥

मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ।
गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥३२॥

पर्व जन्माष्टम्यादि । (भाग० ११।११।३६) ॥३२॥

यात्राबलिविधानञ्च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥३३॥

यात्रा द्वारकादिगमनम् । बलिविधानं पुष्पोपहारादि । वार्षिकपर्वस्विति विशेषनिर्देशः । तत्र फलाधिक्यादित्यर्थः । तन्त्रं पञ्चरात्रम् । व्रतं देवतार्चनादिनियमः । (भाग० ११।११।३७) ॥३३॥

ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।
उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि ॥३४॥

मम प्रतिमास्थापने उद्यानादिकरणे च श्रद्धा 'उद्यमश्च । असामर्थ्ये तु संहत्य मिलित्वा । उद्यानं पुष्पाणाम् । उपवनन्तु फलानाम् । आक्रीडं जलादिक्रीडास्थानम् । (भाग० ११।११।३८) ॥३४॥

सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ।
गृहशुश्रूषणं मह्यं दासवद् यदमायया ॥३५॥

सम्मार्जनम् अवकरनिरसनम् । उपलेपो गोमयादिना । सेको जलसेचनम् । मण्डलवर्तनं चतुष्करङ्गमालिकादि वा एतैरेवाकपटेन गृहशुश्रूषणम् । (भाग० ११।११।३९) ॥३५॥

अमानित्वमदम्भित्वं कृतस्यापरिकीतनम् ।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥३६॥

मानो दर्पः । दम्भः परवञ्चनम् । यत्रापिशब्दस्ततोऽन्यत्र तात्पर्यम् ' यथा अश्नीयाद्विषमप्युग्रं ब्रह्मस्वन्तु न कर्हिचित् ' इत्यादौ । अतो दीपावलोकमपीत्यस्मै देवाय स्वयमन्येन वा दत्तं वस्तु देवोपभोगमाच्छिद्य नोपयुञ्जीतेत्यत्र तात्पर्यम् । प्रसादबुद्ध्या निवेदितं गृह्णीयात् । अन्यथा

निर्माल्यं शिरसा धार्यं नैवेद्यमुदरे हरेः ।
तयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः ।
उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ।

इत्यादिषु वाक्यविरोधः । दीपावलोकदोषपरिहारार्थं देवस्याग्रे वर्तिद्वयेन दीपः कार्यः । (भाग० ११।११।४०) ॥३६॥

यद् यदिष्टतमं लोके यच्चातिप्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥३७॥

सर्वलाभार्पणस्य फलमाह ' यद् यदिति । इष्टं धर्मसाधनम् । श्रीकृष्ण उद्धवम् । (भाग० ११।११।४१) ॥३७॥

मदर्चां संप्रतिष्ठाप्य मन्दिरं कारयेद् दृढम् ।
पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥३८॥

पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहम् ।
क्षेत्रापणपुरग्रामान् दत्त्वा मत्सार्ष्टितामियात् ॥३९॥

अर्चास्थापनादेः फलमाह ' मदर्चामिति । आदिशब्दात् पूजकः । नृत्य-यात्राप्रासादादीनां प्रवाहो निर्वाहः । पूजाद्याश्रितान् क्षेत्रादीन् कारयेत् । तत्र पूज्यतेऽनेनेति पूजा पुष्पाणि । यात्रा यत्र नानादेश्याः सञ्चितानि वस्तूनि विक्रेतुं प्रत्यब्दं मिलन्ति सा । उत्सवः पूजाहर्षः । क्षेत्रं केदारः । आपणो हट्टः । पुरं पञ्चशतग्राममुख्यम् । ग्रामः केवलशूद्रवासः । सार्ष्टिता समानप्रभावत्वम् । इयात् प्राप्नुयात् । (भाग० ११।२७।५०-५१) ॥३८-३९॥

प्रतिष्ठाय सार्वभौमं सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥४०॥

प्रतिष्ठा परकृते देवकुले जीर्णोद्धाररूपेण प्रतिमास्थापनम् । सद्म परप्रतिष्ठित-तत्प्रतिमायाः प्रासादमात्रकरणम् । ब्रह्मलोकं तदाधिपत्यं ब्रह्मत्वम् । त्रिभिः स्वकृतैः प्रतिमाप्रासादपूजादिभिः । मत्साम्यतां मामेव । भगवानुद्धवम् । (भाग० ११।२७।५२) ॥४०॥

विंशतिवर्गः ।

निषेवितानिमित्तेन स्वधर्मेण महीयसा ।
क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥४१॥

विंशतिवर्गमाह ' निषेवितेति । अनिमित्तो निष्कामः । स्वधर्मो वर्णाश्रम-धर्मः । महीयान् प्रथमकल्पानुष्ठितः । तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः[1] । तप उपवासादिकायिकं कर्म ' स्वाध्यायो मन्त्रजपो वाचिकम् ' ईश्वर-

---

1 योगदर्शनम् १।२३ सू: । तत्रैव २।१ सू: ।

प्रणिधानं विष्णुध्यानं मानसम्। तस्य त्रिविधस्य शस्तत्वं देशकालपुरुष-वशान्नातिहिंस्रत्वम्। शरीरपीडाकरस्य त्यागात्। उक्तञ्च पातञ्जलभाष्ये[1] तच्च चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यत इति। (भाग० ३।२६।१५) ॥४१॥

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः।
भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च ॥४२॥

मद्धिष्ण्यं शालग्रामादि। तस्य दर्शनादि। सत्त्वमास्तिक्यम्। असङ्गमो निःसङ्गत्वम्। (भाग० ३।२६।१६) ॥४२॥

महतां बहुमानेन दीनानामनुकम्पया।
मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥४३॥
आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे।
आर्जवेनार्यसङ्गेन निरहंक्रियया तथा ॥४४॥
मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः।
पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम् ॥४५॥

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। शौचसन्तोषतपःस्वाध्यायेश्वर-प्रणिधानानि नियमाः।[2] आध्यात्मिकं मोक्षशास्त्रम्।

मद्धर्मो विष्णुभक्तिः। आशयोऽन्तःकरणम्।

श्रुतमात्रा न तु वस्तुतो दृष्टा गुणा यस्मिन् तम् निर्गुणविषयं भवतीति भावः। कपिलः। (भाग० ३।२६॥१७-१९) ॥४३-४५॥

1 योगदर्शने २।१ सूत्रे वैयासिकं भाष्यम्।

2 योगदर्शनम् २।३०-३२ सूः।

एकोनविंशतिवर्गः।

सा श्रद्धया भगवद्धर्मचर्यया
जिज्ञासयाध्यात्मिकयोगनिष्ठया।
योगेश्वरोपासनया च नित्यं
पुण्यश्रवःकथया पुण्यया च ॥४६॥

एकोनविंशतिवर्गमाह सा श्रद्धयेति। अत्र प्रथमश्लोकोक्तं गृहस्थस्य द्वितीयश्लोकोक्तं वानप्रस्थस्य तृतीयश्लोकोक्तं यतेः ततः परं नैष्ठिकब्रह्मचारिणो विष्णुभक्तिवृद्धौ कारणमिति श्लोकचतुष्टयार्थः। भगवद्धर्मो वार्ताकुवर्जनादि। जिज्ञासा अध्यात्मशास्त्राभ्यासः। अध्यात्मयोगनिष्ठा तदर्थानुष्ठानम्। पुण्यश्रवःकथा विष्णुकथा। पुण्या विष्णुभक्तकथा। (भाग० ४।२२।२२) ॥४६॥

अर्थेन्द्रियारामसगोष्ठ्यतृष्णया
तत्सम्मतानामपरिग्रहेण च।
विविक्तरुच्या परितोष आत्मनि
विना हरेर्गुणपीयूषपानात् ॥४७॥

अर्थेन्द्रियारामा अर्थकामलुब्धास्तैः सहगोष्ठी समानसभत्वम् तत्र अतृष्णा तृष्णाया अप्यभावः किं पुनः सेवायाः। तत्सम्मताः स्रक्चन्दनादयः। विविक्तरुचिः विजनप्रीतिः। सा च आत्मनः परितोषे सति। आत्मनि स्वरूपे परितोषः। सुखान्तरानपेक्षत्वं विना विविक्तरुचेर्मिथ्याचारत्वात्। तदुक्तम्

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते[1] ॥ इति।

---

1 भगवद्गीता ३।६ श्लोकः।

स च परितोषो हरिकथां विना । हरिकथाकर्णनापेक्षा त्वस्त्येवेत्यर्थः । (भाग० ४।२२।२३) ॥४७॥

अहिंसया पारमहंस्यचर्यया
स्मृत्या मुकुन्दाचरिताग्र्यसीधुना ।
यमैरकामैर्नियमैश्चाप्यनिन्दया
निरीहया द्वन्द्वतितिक्षया च ॥४८॥

अहिंसयेति । पारमहंस्यं परमहंसधर्मः । अस्मृत्या वासनोच्छेदकेन । विष्णुकथामद्यपानेन । मद्यं हि स्मृतिभ्रंशहेतुः । पूर्वं केवलकथापानम् । अत्र तु शास्त्रद्वारेणेति वा । [1]यमनियमा व्याख्याताः । आनन्दा योगान्तरस्य । निरीहा योगक्षेमार्थ चेष्टाराहित्यम् । (भाग० ४।२२।२४) ॥४८॥

हरेर्मुहुस्तत्परकर्णपूर-
गुणाभिधानेन विजृम्भमाणया ।
भक्त्या ह्यसङ्गः सदसत्यनात्मनि
स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥४६॥

हरेरिति । तत्परकर्णपूरा विष्णुभक्ताः कर्णालङ्कारभूताः ' ये गुणा ऐश्वर्यादयस्तेषामभिधानम् । हरेर्गुणाभिधानेनेत्यसामर्थ्येऽप्यार्षत्वात् समासः । विजृम्भमाणयेति सर्वैस्तृतीयान्तैः सम्बध्यते । सदसति कार्यकारणरूपे । असङ्गोऽरतिश्चेति अनिष्टहानिरिष्टाप्तिश्चेति द्वयमुक्तम् ' सनत्कुमारः पृथुम् । (भाग० ४।२२।२५) ॥४६॥

अष्टादशवर्गः ।
मयि भावेन सत्येन मत्कथाश्रवणेन च ।
सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः ॥५०॥

1 योगदर्शनम् २।२८।३० सूः ।

ब्रह्मचर्येण मौनेन स्वधर्मेण महीयसा ।
यदृच्छयोपस्थितेन सन्तुष्टो मितभुङ्मुनिः ॥५१॥

विविक्तशरणः शान्तो मैत्रः करुण आत्मवान् ।
सानुबन्धे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम् ॥५२॥

ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ।
निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः ॥५३॥

अथ अष्टादशवर्गमाह । मयीति । मयि सत्यभावो निष्कामभजन-प्रवृत्तिः । सर्वभूतेषु विष्णुरधिष्ठातेति समत्वम् । अप्रसङ्गो निःसङ्गत्वम् । मुनि-र्मननशीलः । शरणम् आश्रयः । आत्मवान् जितमनाः । अनुबन्धः पुत्रादिः । असदाग्रहो ममाहम्भावः । दृष्टं प्रकृतिपुरुषयोस्तत्त्वं येन ज्ञानेन । बुद्ध्यवस्थानं जाग्रदादि । अन्यदर्शनं आत्मव्यतिरिक्तज्ञानम् । (भाग०,३।२७।६-१०) ॥५०-५३॥

उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् ।
मुक्तलिङ्गं सदाभासमसति प्रतिपद्यते ॥५४॥
सतो बन्धुमसच्चक्षुः सर्वानुस्यूतमद्वयम् ॥५५॥

उपलभ्येति । आत्मना जीवेन । आत्मानं परमात्मानम् । चक्षुषा इन्द्रियावच्छिन्नेन सूर्येण । अर्कं गगनस्थं सूर्यम् । आत्मदृग् जीवस्वरूपम् । विमृशन् प्रथमम् । मुक्तलिङ्गं लिङ्गशरीररहितम् । प्रतिपद्यते जानाति । ततोऽसति असत्ये प्रपञ्चे स्थितस्य सतः सत्यरूपं परमात्मन आभासकम् ।

ततस्तस्यैव सतो बन्धुर्योऽसौ सोऽहमिति ज्ञानम् । ततोऽसतः प्रपञ्चस्य चक्षुर्मिथ्यात्मप्रकाशकम् । तत् सर्वत्रात्मानुस्यूतं व्याप्य स्थितम् । ततोऽद्वयम् सोऽस्म्यहमेवेति ज्ञानम् । तदुक्तं शङ्कराचार्यैः योऽसौ सोऽहं सोऽस्म्यहमेवेति विदुर्यमिति । कपिलो देवहूतिम् । (भाग० ३।२७।१०-११) ॥५४-५५॥

पञ्चदशवर्गः ।

श्रद्धामृतकथायां मे शश्वन्मदनुकीतनम् ।
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥५६॥

आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥५७॥

अथ पञ्चदशवर्गमाह । श्रद्धेति । अनुकीर्तनं नामोच्चारणं । परिचर्या पुष्पचन्दनादिभिः । सर्वाङ्गैरष्टभिः । तथा च

दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥ (भाग० ११।१६।२० २१) ॥५६-५७॥

मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् ।
मय्यर्पणञ्च मनसः सर्वकामविवर्जनम् ॥५८॥

अङ्गचेष्टा सम्मार्जनोपलेपादि । ईरणम् उच्चारणम् । (भाग० ११।१६।२२) ॥५८॥

मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं मद्व्रतं तपः ॥५९॥

भोगो विषयार्जनम् । सुखमुपभोगः । इष्टादेश्च मदर्थत्वम् । (भाग० ११।१६।२३) ॥५६॥

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदनम्[1] ।
मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥६०॥

1 भाग० ०निवेदिनाम्

आत्मनिवेदनं ज्ञानम् । आत्मनि वेदनमित्यलुक् । तद्यथा स्यात्तथा भक्तिर्जायत इति क्रियाविशेषणम् । आत्मसमर्पणमिति व्याख्याने मय्यर्पणाच्च मनस इत्यनेन पौनरुक्त्यम् । भगवानुद्धवम् । (भाग० ११।१९।२४) ॥६०॥

त्रयोदशवर्गः ।

कुर्यात् सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ।
मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥६१॥

अथ त्रयोदशवर्गमाह । कुर्यादिति । स्मरन् मामेव । मनः प्रवृत्ति-निवृत्तिरूपम् । चित्तं स्वच्छत्वादिरूपम् । मद्धर्मेषु मद्धर्मानुष्ठातृषु महात्मसु मयि समाविष्टेषु मनोरतिः मनोग्रहणम् । मनःपूर्विका रतिरित्येवमर्थः । (भाग० ११।२९।९) ॥६१॥

देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ।
देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥६२॥

देशपूतावासेन देवादिषु ये मद्भक्तास्तच्चरितानि च पूजयेत् । श्रवणादिभिः । (भाग० ११।२९।१०) ॥६२॥

पृथक् सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ।
कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥६३॥
मामेव सर्वभूतेषु बहिरन्तरपावृतम् ।
ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥६४॥
इति सर्वाणि भूतानि मद्भावेन महाद्युते ।
सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥६५॥

सत्रेणान्यैर्मिलित्वा । पर्वणि शयनबोधनद्वादश्यादौ यात्रा महोत्सवाश्च । मह्यं मदर्थम् । विभूतयश्चामराद्याः । सर्वभूतेषु आत्मनि च मामात्मानम् अपावृतम्

अतिरोहितम् । बहिः कालरूपम् । अन्तरन्तर्यामिरूपम् । केवलं शुद्धं ज्ञानं प्रपञ्चस्याधिष्ठानमिति मन्यमानः । मद्भावेन मद्बुद्ध्या । सभाजनं सेवा । (भाग० ११।२६।११-१३) ॥६३-६५॥

ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः ॥६६॥

पुक्कसोऽन्त्यजविशेषः । ब्राह्मणो ब्राह्मण्यसहितः । ब्राह्मणादिष्वष्टसु द्वयोर्द्वयोः क्रमाज्जातिक्रियाद्रव्यगुणकृतं वैषम्यं ज्ञेयम् । विषयेष्वपि समं मत्स्वरूपं पश्यतीति समदृक् । (भाग० ११।२६।१४) ॥६६॥

विसृज्य स्मयमानान् स्वान् दृशं व्रीडाञ्च दैहिकीम् ।
प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम् ॥६७॥

स्मयमानान् स्वरुच्यैव । स्वान् दृशं अहं बुद्धिम् । अन्यां ममबुद्धिम् । चकारा-ल्लोकव्रीडाञ्च । (भाग० ११।२६।१६) ॥६७॥

यावत् सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥६८॥

एतदनुष्ठानस्यावधिमाह । यावदिति । नोपजायते न साक्षाद् भवति । (भाग० ११।२६।१७) ॥६८॥

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् ।
स्पर्धासूयातिरस्काराः साहङ्कारा वियन्ति हि ॥६९॥

उपासनायाः फलमाह । नरेष्विति । मद्भावो मत्सत्ता । नरशब्द उप-लक्षणम् । सर्वभूतेष्वित्यर्थः । स्पर्धाधिकगुणैः सह साम्येच्छा । असूया गुणेषु दोषारोपः । तिरस्कारो मानभङ्गः । अहङ्कारोऽनात्मनि आत्मबुद्धिः

गर्वो वा। वियन्ति विशेषाद् गच्छन्ति। संस्कारैः सह नश्यन्तीत्यर्थः। हि स्फुटम्। न स्तुतिमालम्। भगवानुद्धवम्। (भाग० ११।२६।१५) ॥६६॥

द्वादशवर्गः।

गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च।
सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥७०॥

अथ द्वादशवर्गमाह। गुरुशुश्रूषेति। भक्त्या तात्पर्येण शुश्रूषा। अर्पणं गुरावेव। साधवश्च भक्ताश्च। साधवः केवलस्वधर्मनिष्ठाः। ईश्वरः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषः[1]। तस्याराधानं सर्वकर्मार्पणम्। (भाग० ७।७।३०) ॥७०॥

श्रद्धया तत्कथायाञ्च कीर्तनैर्गुणकर्मणाम्।
तत्पदाम्बुरुहध्यानात्तल्लिङ्गेक्षार्हणादिभिः ॥७१॥

कथायां श्रद्धा श्रवणेनेत्यर्थः। गुणा ऐश्वर्यादयः। कर्माणि सृष्ट्यादीनि। लिङ्गमधिष्ठानम् प्रतिमादि। ईक्षा दर्शनम्। अर्हणं पूजा। न चादिशब्देनान्येषामप्युक्तत्वाद्द्वादशवर्गप्रतिज्ञाभङ्ग इति शक्यं वक्तुम्। इह स्वशब्दनिर्दिष्टैरेवाङ्गैर्वा समाप्तेर्विवक्षितत्वात्। (भाग० ७।७।३१) ॥७१॥

हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥७२॥

हरिरास्त इति मनसा कामैस्तत्तच्चित्तानुवर्तनैः साधु यथा स्यात्। (भाग० ७।७।३२) ॥७२॥

---

1 योगदर्शनम् १।२४ सू०।

एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ।
वासुदेवे भगवति यथा संलभते रतिम् ॥७३॥

एवं द्वादशवर्गानुष्ठानेन षड्वर्गो मनःषष्ठानीन्द्रियाणि । ईश्वरे फलार्पणसमर्थे । भगवति भजनीयसौन्दर्यादिगुणे । यया भक्त्या । (भाग० ७।७।३३) ॥७३॥

निशम्य कर्माणि गुणानतुल्यान्
वीर्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥७४॥

लब्धरतेश्चिह्नान्याह निशम्येति । निशम्य श्रुत्वा । कर्माणि सृष्ट्यादीनि । लीलावतारैः कृतानि लीलासाध्यानि । (भाग० ७।७।३४) ॥७४॥

यदा ग्रहग्रस्त इव क्वचिद्धस-
त्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥७५॥

आक्रन्दनं नारायणेत्यादि सातत्येन शब्दनम् । आत्मनि स्वरूपे मतिर्यस्य न तु लोके । अत एव गतत्रपः । (भाग० ७।७।३५) ॥७५॥

तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥७६॥

रतेः फलमाह । तदेति । बन्धनानि क्लेशकर्मविपाकाशयाः । तं विष्णुं भावयते प्राप्नोति इति तद्भावस्तद्विषय इत्यर्थः । प्राप्त्यर्थो भूश्चुरादावस्ति । स चासौ भावो मनोविकारः । तस्मादनुकृते आशयाकृती अर्थाद्विष्णोरेव येन पुंसा स तथा । आशयोऽन्तःकरणम् । आकृतिर्वेषो बर्हापीडादिः । विष्णुविषयेन भावेन विष्णोरिवास्य सुप्रसन्नं चेतो वेषश्च तथा स्यादित्यर्थः । बीजानि पुण्यपापानि । अनुशेरते अस्मिन्निति बीजानुशयो लिङ्गदेहम् । महीयान् साधनसहस्रैर्दुर्लभः । समेति सङ्गतो भवति । अधः अक्षजं इन्द्रियजं ज्ञानमस्य । तम वाङ्मनसगोचरम् । रूपं प्राप्नोतीत्यर्थः । प्रह्लादो बालान् । (भाग० ७।७।३६) ॥७६॥

एकादशवर्गः ।

स वै मनः कृष्णपदारविन्दयो-
र्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु
श्रुतिश्चकाराच्युतसत्कथोदये ॥७७॥

अथैकादशवर्गमाह । स वै इति । सः अम्बरीषः । अच्युतस्य सतां भक्तानां कथा । (भाग० ६।४।१८) ॥७७॥

मुकुन्दलिङ्गालयदर्शने दृशौ
तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम् ।
घ्राणञ्च तत्पादसरोजसौरभे
श्रीमत्तुलस्या रसनां तदर्पिते ॥७८॥

लिङ्गं प्रतिमा । आलयोऽधिष्ठानम् । चशब्दो भिन्नक्रमः तुलस्याश्च सौरभे । तत्पादसरोजेति । तत्पादकल्पितसरोजसौरभ इति ज्ञेयम् । रूपकपक्षेऽपि साम्यमात्रम् । न तु गन्धसद्भावः । तदर्पिते नैवेद्ये । (भाग० ६।४।१६) ॥७८॥

पादौ हरेः क्षेत्रपदानुसर्पणे
शिरो हृषीकेशपदाभिवन्दने।
कामञ्च दास्ये न तु कामकाम्यया
यथोत्तमःश्लोकजनाश्रया रतिः ॥७६॥

क्षेत्रं द्वारकादि। पदं विरजादि। काममभिलाषम्। दास्ये न तु स्त्र्यादिसेवायाम्। कामेन हि रतिः साध्या, सा चात्र विष्णुजनाश्रया। यथा येन दास्यकामेन। तत्र पायुवर्जानामिन्द्रियाणां शिरसश्च व्यापारैरेकादशाङ्गानि। शुकः। (भाग० ९।४।२०) ॥७६॥

दशवर्गः।

आयुर्हरति वै पुंसामुद्यन्नस्तञ्च यन्नसौ।
तस्यर्ते यत् क्षणो नीत उत्तमःश्लोकवार्तया ॥८०॥

एवमन्वयमुखेन प्राग्वर्गानुक्त्वा व्यतिरेकमुखेन दर्शयन्नाह, आयुरिति। उद्यन् उदयन्। अस्तं पश्चिमाद्रिञ्च यन् गच्छन्। असावभिनयेन सूर्यं दर्शयति। तस्यर्ते तस्यायुर्विना। यद् येन। हृतमपि तस्यायुः सफलत्वाद-हृतवदित्यर्थः। अत्र वार्तयेत्यन्यम्प्रति गुणाभिधानमेकमङ्गमित्यभिप्रेतम्। उत्तरत्र गाथोपगानमेकाकिनः। (भाग० २।३।१७) ॥८०॥

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत।
न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ॥८१॥

ननु कथमायुषो वैयर्थ्यं भोगसद्भावादित्यत आह, तरव इति। उत अहो। (भाग० २।३।१८) ॥८१॥

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥८२॥

विड्वराहो ग्राम्यशूकरः । श्वादिभिः सह संस्तुतस्तत् प्रस्तावे गृहीतनामा । (भाग० २।३।१९) ॥८२॥

बिले बतोरुक्रमविक्रमान् ये
न शृण्वतः कर्णपुटे नरस्य ।
जिह्वासती दार्दुरिकेव सूत !
न चोपगायत्युरुगायगाथाः ॥८३॥

बिलेति । बिले छिद्रे न त्विन्द्रिये । बत कष्टम् । न शृण्वत इति नर-विशेषणम् । अत्र कर्णपथोपेत इति न शृण्वतो ये इति च कथाश्रवणमुक्तम् । दर्दुरो मण्डूकः । चशब्दश्चेदर्थे । गाथाः कथाः । (भाग० २।३।२०) ॥८३॥

भारः परं पट्टकिरीटजुष्ट-
मप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां
हरेर्लसत्काञ्चनकङ्कणौ वा ॥८४॥

पट्टं पट्टवस्त्रम् । शवस्येमौ शावौ । वाशब्दो यद्यर्थे । (भाग० २।३।२१) ॥८४॥

बर्हायिते ते नयने नराणां
लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ
क्षेत्राणि नानुव्रजतो हरेर्यौ ॥८५॥

बर्हं मयूरपिच्छम् । द्रुमजन्म वृक्षमूलत्वम् । (भाग० २।३।२२) ॥८५॥

जीवञ्छवो भागवताङ्घ्रिरेणून्
न जातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः
श्वसञ्छवो यस्तु न वेद गन्धम् ॥८६॥

नाभिलभेत न स्पृशेत् । श्रीशब्दो नाम्नः पूजार्थः । विष्णोः पादौ एति गच्छति इति विष्णुपदी विष्णुचरणास्थेत्यर्थः । ईल कान्ताविति दीर्घोऽप्यस्ति अदादौ । (भाग० २।३।२३) ॥८६॥

तदश्मसारं हृदयं बतेदम्
यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो
नेत्रे जलं गात्ररुहेषु हर्षः ॥८७॥

अश्मसारं पाषाणवद् लोहवद्वा कठिनम् । विकृतं कथं लक्ष्यम् ? विक्रिया-योगात् । यदा विकारस्तदा अश्रूणि रोमहर्षश्च । शौनकः सूतम् । (भाग० २।३।२४) ॥८७॥

नववर्गः ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥८८॥

अथ नववर्गमाह । श्रवणमिति । पादसेवनं पादयोः सेवनम् नमन-मित्यर्थः । वन्दनं स्तुतिः । सख्यं प्राग्वत् । (भाग० ७।५।२३) ॥८८॥

इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥८९॥

नवलक्षणा नवाङ्गा । प्रह्लादः पितरम् । (भाग० ७।५।२४) ॥८९॥

सप्तवर्गः ।

अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना ।
तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम् ॥६०॥

सप्तवर्गमाह । अनिमित्तेति । अनिमित्तं निमित्तत्वाभावः निमित्तं प्रयोजकं यस्य तेन ।

[1]एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।
त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥

इत्युक्तेन । अमल आत्मा चित्तं यस्मात्तेन । शुद्धमन्त्रद्रव्यात्मकेनेत्यर्थः । श्रुतं कथाश्रवणम् तेन संभृता उपचिता । (भाग० ३।२७।२१) ॥६०॥

ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा ।
तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना ॥६१॥

दृष्टतत्त्वेन सत्वपुरुषान्यथाख्यातिरुपेण । वैराग्येण गुणसङ्गजनितराग-रूपमलापनुत्त्या । बलीयसा वशीकारसंज्ञालक्षणेन[2] । योगो ध्यानम् ।

योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु[3]

इति नानार्थात् । ध्यानमेव समाधिः । तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति[4] समाधिलक्षणम् । (भाग० ३।२७।२२) ॥६१॥

प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् ।
तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥६२॥

अत्र स्वधर्मादिभिः षड्भिः तीव्रया श्रुतसम्भृतया च भक्त्या दह्यमाना

1 भागवतम् १।५।३४ श्लो: ।
2 योगदर्शनम् १।२५ सू: ।
3 अमरकोषः ३।२२
4 योगदर्शनम् ३।३ सू: ।

प्रकृतिस्तिरोभवित्रीति प्रतिपत्तव्यम् । यथाश्रुतेस्तु स्वधर्मादिवद्भक्तेरप्यङ्ग-कोटिनिविष्टत्वानुपपत्तिः । प्रक्रान्तं चाङ्गित्वम् । भवित्रीति साधुकारिणि तृन् । यत्र न पुनराविर्भावः स साधुर्न तिरोभावः । यथा ह्यरणिरग्निमुत्पाद्य तत्तेजसा नश्यति । तथा प्रकृतिर्भक्तिमुत्पाद्य प्रकटीकृत्य तत्तेजसा नश्यतीत्यर्थः । कपिलः । (भाग० ३।२७।२३) ॥६२॥

षड्वर्गः ।

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दरशनेऽस्तु भवत्तनूनाम् ॥६३॥

षड्वर्गमाह । वाणीति । पादयोः स्मृत्यां मनः । शिरः प्रणामे । निवासजगद् जगन्निवासो यस्येति निवासशब्दस्य सप्तमीविशेषणे बहुव्रीहाविति[1] पूर्व निपातः । नलकूबरः श्रीकृष्णम् । (भाग० १०।१०।३८) ॥६३॥

पञ्चवर्गः ।

शृण्वतां गदतां शश्वदर्चतां त्वाभिवन्दताम् ।
नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम् ॥६४॥

पञ्चवर्गमाह । शृण्वतामिति । श्रुतदेवः श्रीकृष्णम् । (भाग० १०।८६।४६) ॥६४॥

चतुर्वर्गः ।

तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यशः ॥६५॥

---

1 पाणिनिः २।२।३५

चतुर्वर्गमाह ' तस्मादिति । यस्मात् सर्वधर्माणां विष्णुभक्तिः फलम् । सात्वतां सत्ववताम् । सच्छब्देन सत्वमुच्यते । सूतः शौनकम् । (भाग० (१।२।१४) ॥६५॥

त्रिवर्गः ।

तस्माद् भारत सर्वात्मा भगवानीश्वरो हरिः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥६६॥

त्रिवर्गमाह ' तस्मादिति । तस्माद् यस्मादन्येषां सदोषत्वम् । सर्वात्मत्वादात्मीयत्वम् । भगवत्त्वाद्रमणीयत्वम् । ईश्वरत्वाद्वरदत्वम् । श्रवणादिप्रवृत्तिहेतुः । अभयं मोक्षम् । शुको राजानम् । (भाग० २।१।५) ॥६६॥

तस्मात् सर्वात्मना राजन् हरिः सवत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥६७॥
पुनर्वचनं त्रिवर्गस्यान्तरङ्गतमत्वख्यापनार्थम् ।

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्त्यङ्गवर्गलक्षणं भेदाश्च ।
इति सप्तमोऽध्यायः ॥७॥

तस्मादिति । तस्माद् यस्माद् भक्तावेव वेदस्य तात्पर्यम् । सर्वात्मना सर्वावस्थेनापि सर्वदेशेषु सर्वकालेषु च । शुकः । (भाग० २।२।३६) ॥६७॥

ननु वर्गान्तराणि सकृदेवोक्तानि त्रिवर्गस्तु किमर्थं पुनरुच्यत इत्यत आह ' पुनर्वचनमिति । तमबर्थो ह्यतिशयः । स चान्यसव्यपेक्ष इत्यर्थः । इत्यर्थात पूर्वस्य वर्गनवकस्यान्तरङ्गतरत्वम् ' तत्पूर्वस्य त्वन्तरङ्गत्वमित्युक्तं भवति ॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्त्यङ्गवर्गलक्षणं भेदाश्च ।
समाप्तोऽयं सप्तमोऽध्यायः ॥७॥

अष्टमोऽध्यायः

अथ विष्णुश्रवणम् ।

को नाम तृप्येद्रसवित् कथायां
महत्तमैकान्तपरायणस्य ।
नान्तं गुणानामगुणस्य जग्मु-
र्योगेश्वरा ये भवपाद्ममुख्याः ॥१॥

एवं भक्त्यङ्गान्युक्त्वा तेषु सर्वशः स्तोतव्येषु प्राधान्यात्त्रिवर्गमेव स्तौति । तेष्वपि श्रवणमाहात्म्यमाह । अथेति । को नामेति । महत्तम एकान्तेन नियमेन परायणं परम आश्रयो यस्य स तथा । महत्तमैः कथ्यमानः प्रत्यक्ष इव भवतीति भावः । अन्तं निश्चयः । इदं रूपमीदृशं रूपमित्थंचमत्करोतीत्यादि । अगुणस्य गुणसुखाधिकस्वरूपसुखलुब्धत्वादगृहीतगुणस्य स्वरूपसुखमेव गुणेष्वभि-व्यक्तमन्यान् सुखयति । अभिव्यक्तितारतम्यात् सुखतारतम्यम् । भवो रुद्रः । पाद्मो ब्रह्मा । मुख्यशब्दात् सनकादयः । योगस्य समाधेः । ईश्वरा वशीकृतसमाधयः । समाधिबलात् कलितसकलपदार्था अपि विष्णुगुणान्न कलयन्तीत्यर्थः । (भाग० १।१८।१४) ॥१॥

तन्नो भवान् वै भगवत्प्रधानो
महत्तमैकान्तपरायणस्य ।
हरेरुदारं चरितं विशुद्धं
शुश्रूषतान्नो वितनोतु विद्वन् ॥२॥

तदिति । भगवत्प्रधान इति बहुव्रीहिः । महत्तमेति तत्पुरुषः । विशुद्धं कर्मान्तरासंकीर्णम् । शौनकः सूतम् । (भाग० १।१८।१५) ॥२॥

को नाम लोके पुरुषार्थसारवित्-
पुराकथानां भगवत्कथासुधाम् ।
आपीय कर्णाञ्जलिभिर्भवापहा-
महो विरज्येत विना नरेतरम् ॥३॥

को नामेति । पुराकथानां मध्ये । नरेतरं पशुम् । मैत्रेयो विदुरम् । (भाग० ३।१३।५०) ॥३॥

निवृत्ततर्षैरुपगीयमाना-
द्भवौषधाच्छ्रोत्रमनोभिरामात् ।
क उत्तमःश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात् ॥४॥

तर्षो विषयेच्छा । अनुवादादन्यैः क्रियमानादित्यर्थः । निवृत्ततर्षादिभिस्त्रिभिर्मुक्तमुमुक्षुसकामा नात्र विरज्यन्त इत्युक्तम् । पशुघ्नो हिंसानिरतः । राजा शुकम् । (भाग० १०।१।४) ॥४॥

कस्तृप्नुयात्तीर्थपदोऽभिधानात्
सत्रेषु वः सूरिभिरीड्यमानात् ।
यः कर्णनाडीं पुरुषस्य यातो
भवप्रदां गेहरतिं छिनत्ति ॥५॥

कस्तृप्नुयादिति । तीर्थपादो विष्णुः । सत्रेषु पुराणेषु । विष्णुमहिम्नः साकल्येन वक्तुमशक्यत्वात् पुराणानां सूचनारूपेण सूत्रत्वम् । कर्णनाडीं कर्णमूलम् । विदुरो मैत्रेयम् । (भाग० ३।५।११) ॥५॥

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ।
शुद्धिकामो न शृणुयाद् यशः कलिमलापहम् ॥६॥

को वेति। एते हि श्लोकाः शुश्रूषोर्वचसा। श्लोकः कीर्तिः। ईड्यं स्तुत्यम्। (भाग० १।१।१६) ॥६॥

वयन्तु न वितृप्याम उत्तमःश्लोकविक्रमे।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥७॥

वयन्त्विति। यद् ये विक्रमाः। स्वादु स्वादु स्वादवः स्वादवः। उभयत्र सुपां सुलुक्पूर्वसवर्णेति[1] सुलुक्। पदे पदे क्षणे क्षणे। शौनकः सूतम्। (भाग० १।१।१९) ॥७॥

श्रुतस्य पुंसां सुचिरश्रमस्य
नन्वञ्जसा सूरिभिरीड़ितोऽर्थः।
तत्तद्गुणानुश्रवणं मुकुन्द-
पादारविन्दं हृदयेषु येषाम् ॥८॥

श्रुतस्येति। मुकुन्दपादारविन्दं येषां हृदयेषु तत् तेभ्यः। तस्य मुकुन्दस्य गुणानुश्रवणं श्रुतश्रमस्य फलम्। विदुरो मैत्रेयम्। (भाग० ३।१३।४) ॥८॥

पिबन्ति ये भगवत आत्मनः सतां
कथामृतं श्रवणपुटेषु संभृतम्।
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥९॥

पिबन्तीति। सतामात्मनः सद्भिरात्मत्वेन ज्ञातस्य। शुको राजानम्। (भाग० २।२।३७) ॥९॥

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र-
मात्मप्रसाद उभयत्र[2] गुणेष्वसङ्गः।

---

1 पाणिनिः ७।१।३९

2 उत यत्रेति स्वामिसम्मतः पाठः।

कैवल्यसम्मतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥१०॥

ज्ञानमिति। हरिकथासु को न निर्वृतः को वा रतिं न कुर्यात्। यद् यस्मात् तास्वेव ज्ञानादयो गुणाः। आ इति स्मरणे। भागवतसङ्गं शुकः स्मरति। प्रतिनिवृत्तं यत्रोदितं तत्रैव लीनं गुणोर्मिचक्रं महदादिपरम्परा येन ज्ञानेन तत्तथा। आत्मप्रसादः शुद्धसत्त्वात्मकत्वम्। उभयत्र गुणेष्वसङ्ग इहामुत्र भोगविरागः। कैवल्यमित्येव सम्मतः पन्थाः फलसाधनत्वेऽपि फलरूपत्वात् शर्करा-दिव्यञ्जनवत्। शुकः। (भाग० २।३।१२) ॥१०॥

तस्मिन्महन्मुखरिता मधुभिच्चरित्र-
पीयूषशेषसरितः परितः श्रवन्ति।
ता ये पिबन्त्यवितृषो नृप गाढकर्णै-
स्तान्न स्पृशन्त्यशनतृड् भयशोकमोहाः ॥११॥

तस्मिन्निति। तस्मिन् भागवतसदसि महद्भिर्मुखरिता वाचालीकृताः स्वयमेवात्मानं यथा प्रकाशयन्ति तथोच्चारिताः। महन्मनोह्लादपूरणस्य तदवस्थत्वाच्छेशत्वम्। परितः सर्वान् श्रोतॄन् प्रति। अवितृषः विविधतृष्णारहिताः तदेकाभिलाषा इत्यर्थः। अशनं क्षुत्। भयं जरामरणयोरिति षड्मयः।

[1]मनसः शोकमोहौ च प्राणस्य च तृषा क्षुधा।
जरामृत्यू शरीरस्य षड्भिर्रहितः शिवः॥

इति वचनात्। नारदः प्राचीनबर्हिषम्। (भाग० ४।२९।४०) ॥११॥

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम्।
मद्वार्तायातयामानां न बन्धाय गृहा मताः ॥१२॥

गृहेति। आवेशः स्थितिः। कुशलं विहितम्। वार्ता या श्रुता तया यातो नीतः यामः प्रहरो यैः। भगवान् प्रचेतसः। (भाग० ४।३०।१९) ॥१२॥

कुतोऽशिवं त्वच्चरणाम्बुजासवं
महन्मनस्तोमुखनिःसृतं क्वचित् ।
पिबन्ति ये कर्णपुटैरलं प्रभो
देहंभृतां देहकृदस्मृतिच्छिदम् ॥१३॥

कुत इति । आसवः पुष्परसः कीर्तिश्च । महतां मनस्तोमुखान्निःसृतम् । मनस्त इति प्रथमार्थे तसिः ततः समासः । मनःशुद्ध्या महद्भिर्वर्णितमित्यर्थः । क्वचित् कदाचित् । देहंभृतामित्यार्षो नुमागमः । संसारापादिका या अस्मृतिः स्वरूपाज्ञानम् । कुरुक्षेत्रे मिलिताः सुहृदः श्रीकृष्णम् । (भाग० १०।८३।३) ॥१३॥

विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः
पादावनेजसरितः शमलानि हन्तुम् ।
आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गै-
स्तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति ॥१४॥

विभ्व्य इति । विभ्व्यः प्रगल्भाः । अमृतं सुधा । उदवहा नद्यः । सरितो गङ्गात्रयम् । अत एव त्रिलोक्या इत्युक्तम् । शमलानि पापानि । अनुश्रूयत इत्यानुश्रवं कथातीर्थम् श्रुतिभिः श्रवणावृत्त्या । अङ्घ्रिजं गङ्गाङ्गसङ्गैः स्नानादिभिः । शुचौ सीदन्तीति शुचिषदः । उपस्पर्श आचमनम् । सामीप्येन सेवा च । तीर्थद्वयोपस्पर्शसाध्यस्य शुचिषत्त्वस्य सिद्धवन्निर्देशः । कार्यकारणयोः पौर्वापर्यरूपातिशयोक्तिरियम् । ये उपस्पृशन्ति ते शुचयः स्युरित्यर्थः । ब्रह्माद्याः श्रीकृष्णम् । (भाग० ११।६।१६) ॥१४॥

यस्तूत्तमःश्लोकगुणानुवादः
सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ।
तमेव नित्यं शृणुयादभीक्ष्णं
कृष्णेऽमलां भक्तिमभीप्समानः ॥१५॥

यस्त्विति। अमङ्गलघ्नत्वेन गीयते। प्रतिवाक्यं सातत्यार्थं शब्दत्रयं गानश्रवणाभीप्सानां प्रकर्षार्थम्। शुकः। (भाग० १२।३।१५) ॥१५॥

ये तु त्वदीयचरणाम्बुजकोशगन्धं
जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम्।
भक्त्या गृहीतचरणः परया च तेषां
नापैषि नाथ हृदयाम्बुरुहात् स्वपुंसाम्॥१६॥

ये त्विति। गन्धः कीर्तिरामोदश्च। कोषो भाण्डारागारम्। कुड्मल-पक्षे हि गन्धाभावः। श्रुतिर्वेदः। चरणग्रहणं कीर्त्यैकदेशस्यैव श्रुतिगोच-रत्वं न सर्वकीर्तेरिति विज्ञापनार्थम्। भक्त्या प्रणयपररसनया। नापैषि नापयासि। ये च कीर्तिश्रवणनिष्ठास्तेषां मनो न त्यजसीत्यर्थः। ब्रह्मा विष्णुम्। (भाग० ३।६।५) ॥१६॥

इत्थं परस्य निजधर्मरिरक्षयात्त-
लीलातनोस्तदनुरूपविडम्बनानि।
कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन्॥१७॥

इति विष्णुश्रवणम्।

श्रवणस्य माहात्म्यविषयदिशमुक्त्वा उपसंहरति। इत्थमिति। परो निराकारः। रिरक्षा रक्षितुमिच्छा। आत्तमनिट्त्वं। तस्यानुरूपविडम्ब-नानि अनुरूपाणि। तत्स्वरूपमाहात्म्यपर्यालोचने त्वसदृशानीत्यर्थः। जगत्सृष्ट्यादिकर्तुर्हि कंसादिकीटनिरसने कियत् कौतुकम्। कर्म पापम्। कषणं हिंसा। श्रूयाद्भवानिति राज्ञ आशीः। अनुवृत्तिं भक्तिम्। शुकः। (भाग० १०।६०।४६) ॥१७॥

अथ विष्णुकीर्तनम् ।

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥१८॥

श्रवणं स्तुत्वा कीर्तनं स्तौत्ययमिति । अयमजामिलः । निर्वेशः प्रायश्चित्तम् । (भाग० ६।२।७) ॥१८॥

एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् ।
यदा नारायणायेति जगाद चतुरक्षरम् ॥१९॥
स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥२०॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥२१॥

एतेनेति । अघोनः मघवच्छब्दवद्रूपम् । यदा यस्मिन्नेव काले । एतेनैव कालेन । निमेषत्रयमात्रेण । किं द्वादशाब्देन । यतो नाम व्याहरणान्मद्विषया मतिर्भवति । (भाग० ६।२।८-१०) ॥१९-२१॥

न निष्कृतैरुदितैर्ब्रह्मवादिभि-
स्तथा विशुध्यत्यघवान् व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतै-
स्तदुत्तमःश्लोकगुणोपलम्भकम् ॥२२॥

तदितरैः प्रायश्चित्तैस्तुल्यं पापक्षयमात्रफलत्वात् इति चेन्न तत्राह । न निष्कृतैरिति । निष्कृतं प्रायश्चित्तम् । पदग्रहणं सुसंस्कृतेषु नामसु शक्त्यतिशयार्थम् । यत् पुनरुत्तमःश्लोकगुणोपलम्भकं व्याहर्तुं विष्णुगुणज्ञानं

करोति। तदितरेभ्योऽधिकम्। पुनः पापप्रवृत्तिनिवारणात्। (भाग० ६।२।६-११) ॥२०-२२॥

नैकान्तिकं तद्धि कृतेऽपि निष्कृते
मनः पुनर्धावति चेदसत्पथे।
तत्कर्मनिर्हारमभीप्सतां हरे-
र्गुणानुवादः खलु सत्त्वभावनः ॥२३॥

नैकान्तिकमिति। तस्मात्तत् प्रायश्चित्तं नैकान्तिकं नावश्यकम्। हि यस्मात्। असत्पथे धावति भुक्त्यर्थं काम्यं कर्म करोति। तत् तस्मात्। निर्हारम् अत्यन्तनाशम्। गुणानुवादः विष्णोर्गुणाननुवृत्त्या नैरन्तर्येण वादयति। यन्नामव्याहरणं तत्तेभ्योऽधिकम्। काम्यकर्मप्रवृत्तिनिवारणात्। सत्त्वं भावयति विशुद्धोर्जितसत्त्वं स्वन्तःकरणं करोति। (भाग० ६।२।१२) ॥२३॥

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥२४॥

ननु अजामिलेन पुत्रनाम गृहीतं न तु विष्णुनामेति चेत्तत्राह। साङ्केत्यमिति। साङ्केत्यमन्यत्र पुत्रादौ सङ्केतितम्। पारिहास्यं विष्णुरसीति परिहासेनारोपितम्। स्तोभं गीतालापपरिपूरणार्थं गृहीतम्। हेलनं किं विष्णुनेति निन्दार्थम्। विष्णोरिदं नामेति ज्ञानञ्चेत्। तात्पर्यं विनापि फलप्रदमित्यर्थः। (भाग० ६।२।१४) ॥२४॥

पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः।
हरिरित्यवशेनाह पुमान्नार्हति यातनाः ॥२५॥

यद्यपि विष्णुर्नामैव पुत्रनाम ज्ञातं तथापि सम्भ्रमादज्ञातमिति चेत्तत्राह।

पतित इति। अवशेन सङ्कल्पं विना व्यथावेगाद्यैर्निर्गता वर्णास्ते दैवाद् विष्णुनामरूपा जाता इत्यर्थः। तथापि यातनां नार्हति। पापक्षयात् कीर्तनं हि तत्र निष्पन्नम्। श्रवणन्तु निष्पन्नमेवान्यकीर्तितनामवत्। यस्यां त्ववस्थायां सङ्कल्पं विना कीर्तयति न च तच्छृणोति तस्यां न पापक्षयः। अतिप्रसङ्गात्। अकारो हि प्रसिद्धं विष्णुनाम। तद् यथाकथञ्चिद् येन कीर्तितं श्रुतं स्मृतं वा तस्य कोऽपि नास्ति। तस्मादिदं विष्णुनाम तच्च मया कीर्तितं श्रुतं स्मृतञ्चेति यस्य ज्ञानं तस्यैव पापक्षय इत्यङ्गीकर्तव्यम्। विष्णुदूता यमदूतान्। (भाग० ६।२।१५) ॥२५॥

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।
ततः सद्यो विमुच्येत यद् बिभेति स्वयम्भयम् ॥२६॥

आपन्न इति। गृणन् कीर्तयन्। ऋषयः सूतम्। (१।१।१४) ॥२६॥

न यद्वचश्चित्रपदं हरेर्यशो
जगत्पवित्रं प्रगृणीत कर्हिचित्।
तद्वायसं तीर्थमुशन्ति मानसा
न यत्र हंसा [1]विरमन्त्युशिक्क्षयाः ॥२७॥

यदित्यादि। वचो वाक्यम्। चित्राणि पदानि यत्र तत्तथा। जगत् पवित्रं यस्मात् तत्तथा। कर्हिचिदुशन्ति मन्यन्ते। मानसा हंसा ब्रह्ममनसि भवाः सनकादयः। विरमन्ति विशेषाद्रमन्ते। उशिक् उत्तमः क्षयो निवासो येषां ते तथा। काकतीर्थपक्षे मानससरोवरस्थाः। (भाग० १।५।१०) ॥२७॥

तद्वाग्विसर्गो जनताघविप्लवो
यस्मिन् प्रतिश्लोकमबद्धवत्यपि।
नामान्यनन्तस्य यशोऽङ्कितानि यत्
शृण्वन्ति गायन्ति गृणन्ति साधवः ॥२८॥

---

1 भाग० निरमन्त्यु०

विष्णुमहिम्ना शून्यस्य वाक्यस्य निन्दितत्वात् तत्सहितं स्तौति' तद्वागिति। वाग्विसर्गो वाक्यप्रयोगः। जनता जनसमूहस्तस्या अघं पापं तस्य विप्लवो विनाशहेतुः ' कोऽसौ ' यस्मिन्ननन्तस्य नामानि। अवद्धं दुष्टं पदम्। यद् यस्मात्। तद्वाग्विसर्गं साधवः वक्तरि सति शृण्वन्ति ' श्रोतरि सति गृणन्ति। उभयाभावे स्वयं गायन्ति। (भाग० १।५।११) ॥२८॥

इदं हि पुंसस्तपसः श्रुतस्य वा
स्विष्टस्य सूक्तस्य च बुद्धदत्तयोः।
अविच्युतोऽर्थः कविभिर्निरूपितो
यदुत्तमःश्लोकगुणानुवर्णनम् ॥२६॥

इदमिति। सर्वस्य सत्कर्मणो विष्णुभजनं फलमिति श्लोकार्थः। सूक्तं सदुपदेशः। तस्य ग्रहणं श्रुतम्। तस्यानुध्यानं स्विष्टम्। दत्तं तपश्च। अविच्युतः अविनाशी। नारदो व्यासम्। (भाग० १।५।२२) ॥२६॥

प्रायेण मुनयो राजन् निवृत्ता विधिसेधतः।
नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥३०॥

प्रायेणेति। नैर्गुण्यं परं ब्रह्म। शुकः। (भाग० २।१।७) ॥३०॥

यन्नाम श्रुतमनुकीर्तयेदकस्मात्
दार्तो वा यदि पतितः प्रलम्भनाद्वा।
हन्त्यंहः सपदि नृणामशेषमन्यं
कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥३ ॥

यन्नामेति। यस्य नाम श्रुतं सन्नृणाम् अंहः पापं हन्ति। यश्चानुकीर्तयेत् तस्यापि। आर्तो रोगी। प्रलम्भनं परिहासः ' ततः। शेषादनन्तात् अन्यं कं मुमुक्षुराश्रयेत्। शुकः। (भाग० ५।२५।११) ॥३१॥

एतन्निर्विद्यमानानामिच्छतामकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥३२॥

एतदिति । योगिनः समाहिताः । शुकः । (भाग० २।१।११) ॥३२॥

पतितः स्खलितश्चार्तः क्षुत्त्वा वा विवशो ब्रुवन्[1] ।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥३३॥

पतित इति । क्षुत्त्वा क्षुतं कृत्वा (भाग० १२।१२।४७) ॥३३॥

संकीर्त्यमानो भगवाननन्तः
श्रुतानुभावो व्यसनं [2]स्वपुंसाम् ।
[3]आविश्य चित्तं विधुनोत्यशेषं
यथा तमोऽर्कोऽभ्रमिवातिवातः ॥३४॥

संकीर्त्यमान इति । अनुभावो महिमा । व्यसनं मलम् । तच्च द्वेधा मायिकं कार्यञ्च । तत्रोभयोरपि निवर्तनीयताविवक्षया क्रमात्तमोभ्रयोरुपादानम् । सूतः । (भाग० १२।१२।४८) ॥३४॥

मृषागिरस्ता ह्यसतीरसत्कथा
न कथ्यते यद्भगवानधोक्षजः ।
तदेव सत्यं तदु हैव मङ्गलं
तदेव पुण्यं भगवद्गुणोदयम् ॥३५॥

मृषेति । मृषा असत्याः वाच्यस्य मिथ्याभूतत्वात् । असतीः अमङ्गलाः । असत्कथा अपुण्यरूपाः । यद् याभिः । उ अहो । ह प्रसिद्धम् । भगवतां श्रीमतां गुणानामुदयो यस्मात्तत्तथा । (भाग० १२।१२।४९) ॥३५॥

तदेव रम्यं रुचिरं नवं नवं
तदेव शश्वन्मनसो महोत्सवम् ।
तदेव शोकार्णवशोषणं नृणां
यदुत्तमःश्लोकयशोऽनुगीयते ॥३६॥

---

1 भाग० गृणन् । 2 भाग० हि पुंसाम् । 3 भाग० प्रविश्य ।

कास्तर्हि समीच्य इत्याह ' तदेवेति । रुचिरं प्रीतिबर्धिनम् । तदेव रम्यं आयतिसुन्दरम् ' अतो नवं नवम् । शश्वदापद्यनापदि च ' शोकशोषकं महोत्सवश्च । यत् यस्मिन् । सूतः शौनकादीन् । (भाग० १२।१२।५०) ॥३६॥

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्तनादेव कृष्णस्य मुक्तबन्धः[1] परं व्रजेत् ॥३७॥

कलेरिति । परं वैकुण्ठं शुकः । (भाग० १२।३।५१) ॥३७॥

यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान् ।
विमुक्तकर्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥३८॥

यदिति । आतुरः सरोगः । कर्म पापम् । उत्तमा गतिर्मोक्षः । न यक्ष्यन्ति न पूजयन्ति । शुको राजानम् । (भाग० १२।३।४४) ॥३८॥

इत्थं हरेर्भगवतो रुचिरावतार-
वीर्याणि बालचरितानि च शन्तमानि ।
अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो
भक्तिं परां परमहंसगतौ लभेत ॥३९॥

उपसंहरति ' इत्थमिति । रुचिरेति । प्रौढचेष्टितानामुक्तिः । शन्तमानि सुखात्मकानि । श्रुतानि प्रश्रुतानि । चकारद्वयमुभयत्र प्राधान्यार्थम् । परां प्रेमात्मिकाम् । शुको राजानम् । (भाग० ११।३१।२८) ॥३९॥

श्रीवोपदेवकृते मुक्ताफले विष्णुकीर्तनमहिमा ।

इत्यष्टमोऽध्यायः ॥८॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुकीर्तनमहिमा ।

समाप्तोऽयमष्टमोऽध्यायः ॥८॥

---

1 भाग० सङ्गः ।

नवमोऽध्यायः

अथ विष्णुस्मरणम् ।

तस्मिन् प्रविष्टेऽसुरकूटकर्मजा
माया विनेशुर्महिना महीयसः ।
स्वप्नो यथा हि प्रतिबोध आगते
हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥१॥

तस्मिन् विष्णौ । कूटकर्म मायाप्रदर्शनम् । महिना माहात्म्येन । हि शब्दो भिन्नक्रमः । हरिस्मृतिर्हीत्यर्थान्तरन्यासः । शुको राजानम् । (भाग० ८।१०।५५) ॥१॥

एतावान् सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ।
जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥२॥

एतावानिति । सांख्यं प्रकृतिपुरुषविवेकः । योगश्चित्तवृत्तिनिरोधः । स्वधर्मपरिनिष्ठा नित्यनैमित्तिकानुष्ठानम् । एभिस्त्रिभिरेतावान् परो जन्मलाभः जन्मनः साफल्यं यदन्ते नारायणस्मृतिः । शुको राजानम् । (भाग० २।१।६) ॥२॥

यशःश्रियामेव परिश्रमः परो
वर्णाश्रमाचारतपःश्रुतादिषु ।
अविस्मृतिः श्रीधरपादपद्मयो-
र्गुणानुवादश्रवणादरादिभिः ॥३॥

यश इति । यशसां श्रीणाञ्च सम्बन्धिषु यशोनिमित्तेषु श्रीनिमित्तेषु

च आचारादिषु । परः केवलः । परिश्रमः क्लेश एव ' न तु फलम् । तद् भगवत्पादयोरविस्मृतिः । सा च गुणानुवादादिभिः । (भाग० १२।१२।५४) ॥३॥

अविस्मृतिः कृष्णपदारविन्दयोः
क्षिणोत्यभद्राणि [1]च शन्तनोति[1] ।
सत्त्वस्य शुद्धिं परमात्मभक्तिं
ज्ञानञ्च विज्ञानविरागयुक्तम् ॥४॥

ननु किमविस्मृत्येति तत्राह ' अविस्मृतिरिति । क्षिणोति हिनस्ति । अभद्राणि दुर्वासनाः । शं सुखम् । सत्त्वशुद्धिर्नीरजकता । ततो भगवति प्रेम ' ततोऽन्यत्र विरागः । ततः परोक्षबोधः । ततः साक्षात्कार इत्यर्थः । सूतः शौनकम् । (भाग० १२।१२।५५) ॥४॥

विद्यातपःप्राणनिरोधमैत्री-
तीर्थाभिषेकव्रतदानजप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा
यथा हृदिस्थे भगवत्यनन्ते ॥५॥

विद्या वैराजोपासना । तपो वैश्वानराद्युपासना । प्राणनिरोधः प्राणायामः । जप्यं प्रणवादिर्नान्यत् । (भाग० १२।३।४८) ॥५॥

तस्मात् सर्वात्मना राजन् हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो यासि पराङ्गतिम् ॥६॥

तस्माद् यस्मात् । ततो हरिः स्मरणात् । पुरुषः पराङ्गतिं याति । शुको राजानम् । (भाग० १२।३।४६) ॥६॥

1...1 भाग० शमं तनोति ।

म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ।
आत्मभावं नयत्यङ्ग सर्वात्मा सर्वसम्भवः[1] ॥७॥

म्रियमाणैरिति । आत्मभावं स्वरूपप्राप्तिम् । सर्वात्मना सुलभत्वम् । सर्वात्मत्वात् सर्वसम्भवत्वात् । भक्तस्य विष्णुविवर्तत्वात् सद्भावापत्तिः । शुको-राजानम् । (भाग० १२।३।५०) ॥७॥

श्रीवोपदेवकृते मुक्ताफले विष्णुस्मरणम् ।
इति नवमोऽध्यायः ॥९॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुस्मरणम् ।
समाप्तोऽयं नवमोऽध्यायः ॥९॥

---

1 क्वचित् भागवते सर्वसंश्रयः ।

दशमोऽध्यायः

अथ विष्णुश्रवणकीर्तने ।

एकान्तलाभं वचसो नु पुंसां
सुश्लोकमौलेर्गुणवादमाहुः ।
श्रुतेश्च विद्वद्भिरुपाकृतायां
कथासुधायामुपसम्प्रयोगम् ॥१॥

एवं प्रत्येकं श्रवणादिभिः स्तुत्वा व्यतिषङ्गेण स्तोतुमाह । एकेति । नु अहो । उपकृता निरूपिता । मैत्रेयो विदुरम् । (भाग० ३।६।३६) ॥१॥

शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ।
नातिदीर्घेण कालेन भगवान् विशते हृदि ॥२॥

शृण्वत इति । नातिदीर्घोऽत्यल्पः । ब्रह्मा नारदम् । (भाग० २।८।४) ॥२॥

यथा यथात्मा परिमृज्यतेऽसौ
मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति तत्त्वसूक्ष्मं[1]
चक्षुर्यथैवाञ्जनसंप्रयुक्तम् ॥३॥

यथेति । तत्त्वेषु प्रकृत्यादिषु सूक्ष्मं पुरुषाख्यम् । श्रीभगवानुद्धवम् । (भाग० ११।१४।२६) ॥३॥

एतन्मुहुःकीर्तयतोऽनुशृण्वतो
न रिष्यते जातु समुद्यमः क्वचित् ।
यदुत्तमःश्लोकगुणानुवर्णनं
समस्तसंसारपरिश्रमापहम् ॥४॥

---

1 भाग० वस्तुसूक्ष्मं ।

एतदिति। एतद्विष्णुयशः। न रिष्यते न नश्यति। यत् यस्मादनुवर्णनमिति। पक्षे द्विर्णिजन्तम्। तथा च सति अन्यस्मिन् वक्तरि स्वस्य श्रवणम्। स्वार्थणिजन्तपक्षे तु कीर्तनमिति द्वयमपि स्तुतम्। शुको राजानम्। (भाग० ८।१२।४६) ॥४॥

अथ विष्णुस्मरण कीर्तने।

वयन्त्विह महायोगिन् भ्रमन्तः कर्मवर्त्मसु।
त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥५॥

वयन्त्विहेति। त्वद्वार्तया अनुसंहितया कीर्तितया वा। अन्यथास्येह पाठश्चिन्त्यः। तावकैर्भक्तैः सह तरिष्यामः। (भाग० ११।६।४८) ॥५॥

स्मरन्तः कीर्तयन्तस्ते कृतानि गदितानि च।
गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडम्बनम् ॥६॥

स्मरन्त इति। तस्मिन्नुत्तमं हास्यम्। क्ष्वेलिः परिहासः। द्वन्द्वैकत्वान्नपुंसकत्वम्। उद्धवः श्रीकृष्णम्। (भाग० ११।६।४६) ॥६॥

अथ विष्णुश्रवणकीर्तनस्मरणानि।

अशेषसंक्लेशशमं विधत्ते
गुणानुवादश्रवणं मुरारेः।
किंवा पुनस्तच्चरणारविन्द-
परागसेवारतिरात्मलब्धा ॥७॥

अशेषेति। अशेषसंक्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाः। अनुवादः कीर्तनम्। सेवा मनसः सन्निधानम्। तत्र रतिः प्रीतिः। आत्मलब्धा स्वाभाविकी। मैत्रेयो विदुरम्। (भाग० ३।७।१४) ॥७॥

अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः ।
शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥८॥

अयातेति । तस्य स्वायम्भुवस्य । यातयामा उपभुक्ताः तद्विपरीता अयातयामाः । पुनः पुनरुपभुज्यमानाप्यपूर्ववदुपभोग्येत्यर्थः । यावद्भिर्यामैर्मन्वन्तरं समाप्तं तावन्तो यामाः । विष्णुकथासम्बन्धादुत्तरोत्तरं रमणीया जाता इत्यर्थः । कुर्वतः स्ववाक्यैर्ब्रुवतः । मैत्रेयः । (भाग० ३।२२।३५) ॥८॥

श्रवणात् कीर्तनाद्ध्यानात् पूयन्तेऽन्तेवसायिनः ।
तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥९॥

श्रवणादिति । अन्तेवसायिनोऽन्त्यजाः । ब्रह्ममयो ब्रह्मरूपः । ईक्षा दर्शनम् । अभिमर्शः स्पर्शः । तौ विद्येते येषां ते तथा । नारदः श्रीकृष्णम् । (भाग० १०।७०।४३) ॥९॥

मर्त्यस्तया ननु समेधितया[1] मुकुन्द-
श्रीमत्कथाश्रवणकीर्तनचिन्तयैति ।
तद्धाम दुस्तरकृतान्तजवापवर्गं
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥१०॥

मर्त्य इति । तया ब्रह्मसभादौ प्रसिद्धया । तद्धाम वैष्णवं स्थानम् । कृतान्तस्य जवो वेगः । अपवर्जनं निवृत्तिर्यस्मिन् तत् । अकालकलितमित्यर्थः । यदर्था मद्धामाभिलाषाः । शुकः । (भाग० १०।९०।५०) ॥१०॥

---

1 क्वचित् भागवते ०स्तयानुसवमेधितया ।

यानीह विश्वविलयोद्भववृत्तिहेतुः
कर्माण्यनन्यविषयाणि हरिश्चकार ।
यस्त्वङ्ग गायति शृणोत्यनुमोदते वा
भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥११॥

यानीति । वृत्तिः स्थितिः । अनन्यविषयाणि अनन्यसाध्यानि । गानं कीर्तनम् । अनुमोदनं मानसस्वीकारः । स च स्मरणपूर्वकः । शुकः । (भाग० १०।६९।४५) ॥११॥

तस्यावितुः स्थिरचरेशितुरङ्घ्रिमूलं
यत्स्थं न कर्मगुणकालरुजः[1] स्पृशन्ति ।
यद्वै स्तुवन्ति निनमन्ति [2]जपन्त्यभीक्ष्णं
ध्यायन्ति वेदहृदया मुनयस्तदाप्त्यै ॥१२॥

तस्येति । अवितुः रक्षकस्य । ईशितुः स्रष्टुः संहर्तुश्च । अङ्घ्रिमूलम् ' तदुत्तरतृतीयश्लोकस्थेन भजामीत्यनेनान्वयः । यत्स्थं यत्र स्थितं । कर्म पुण्यपापे । गुणा रजःप्रभृतयः । कालो मृत्युः ' त एव विकारापादकत्वाद् रुजो रोगाः । एते स्पृशन्त्यपि न ' दूरे बाधवार्ताः । स्तुतिर्वाचा गुणकीर्तनम् । जपो मनसा ' जप हृदुच्चार इति धातुसूत्रात् । निनमन्ति नितरां नमन्ति । उपसर्गयोगादयमर्थः ।

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते

इत्युपसर्गवृत्तेः । वेदो हृदये येषां ते तथा । तदाप्त्यै विष्णुप्राप्तये । मार्कण्डेयो नारायणम् । (भाग० १२।८।४२) ॥१२॥

मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः ।
वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥१३॥

मन इति । अभिधायिनीरभिधायिन्यः । तेषु नामसु प्रह्वणं नम्रता । सा च कीर्तनस्य पृथगुक्तत्वात् श्रवणादरेणेत्यर्थसिद्धम् । आदिशब्दात् तालस्वरादिः । (भाग० १०।४७।६६) ॥१३॥

1 गुणकालरजः इति स्वामिसम्मतः पाठः । 2 भाग० यजन्ति ।

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ।
मङ्गलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥१४॥

कर्मभिरिति । मनसो वृत्तय इत्येव सिद्धे सति न इति पुनर्वचनं त्रिवर्गमध्येऽपि स्मरणस्यान्तरङ्गतां वक्तुम् । एतान्येव हि शास्त्रेषु श्रवणमनननिदिध्यासनशब्दैरुच्यन्ते । नन्दादय उद्धवम् । (भाग० १०।४७।६७) ॥१४॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्त्यङ्गवर्गप्रकरणम् ।
इति दशमोऽध्यायः ॥१०॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्त्यङ्गवर्गप्रकरणम् ।
समाप्तोऽयं दशमोऽध्यायः ॥१०॥

एकादशोऽध्यायः

अथ विष्णुभक्तप्रकरणम् ।

तत्र विष्णुभक्तस्य लक्षणं भेदाश्च ।

सकृन्मनः कृष्णपदारविन्दयो-
निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥१॥

एवमियता प्रबन्धेन विष्णुं पञ्चात्मकमित्यस्य[1] पादत्रयं विविच्य शिष्टं व्याख्यातुमिदमारभ्यते । अथेति । तत्रापि नागृहीतविशेषणा बुद्धिर्विशेष्ये चोपजायते । विशेषणमुपसंक्रामतीति न्यायात् सामान्यपरिहारेण विशेषप्रतिपत्त्यसम्भवाद् भक्तसामान्यलक्षणमवतारयितुमाह । तत्रेति । सकृदिति । सकृदित्यादिष्वपिशब्दः प्रत्येकं सम्बध्यते । सकृदपि किं पुनरभ्यासेन । मनः संशयात्मकमन्तःकरणं किं पुनर्निश्चयात्मिका बुद्धिः । पदारविन्दयोरपि किं पुनः सर्वमूर्तौ निवेशितम् । बलादपि किं पुनः स्वतो निविष्टम् । तद्गुणेष्वपि रागि किं पुनस्तत्स्वरूपे । यैरिहेति सामान्यवाचिभ्यां सर्वनामभ्यां मनोनिवेशने जातिदेशविशेषानपेक्ष्येति गम्यते । बलादपि यैर्निवेशितं ते भक्ता इति शेषः । तेषां फलमाह । नेति । चकाराद् यमश्च पाशभृतन् । पाशग्रहणमन्यस्यापि करालदंष्ट्रत्वादेर्भीषणत्वस्योपलक्षणम । यममपि न पश्यन्ति किं पुनर्निरयम् । स्वप्नेऽपि किं पुनः प्रत्यक्षेण । न पश्यन्ति किं पुनस्तर्जनादि । कुत एतत् । हि यस्मात् चीर्णनिष्कृता आचरितप्रायश्चित्ताः । पापोपप्लुतानां हि यमदर्शनादि । भक्त्या च सर्वपापक्षय इत्यसकृदुक्तम् । ततश्च भगवन्निविष्टचित्तो भक्त इति लक्षणार्थः । शुकः (भाग० ६।१।१९) ॥१॥

---

1 मुक्ताफलम् १।१ श्लो: ।

स नवधा भक्तः। भक्तिरसस्यैव हास्य-शृङ्गार-करुण-रौद्र-भयानक-बीभत्स-शान्ता-द्भुत-वीररूपेणानुभवात्।

इति मुक्ताफले भक्तानां लक्षणं भेदाश्च ॥

एवं भक्तसामान्यलक्षणमुक्त्वा तद्विशेषमाह ' स नवधा भक्तः। नवविधत्वे हेतुमाह ' भक्तीति। भक्तिर्विहिताविहिता च। सैव परां प्रकर्षरेखामापन्ना रसः। यदाहुः

भावा एवातिसम्पन्नाः प्रयान्ति रसतामभी

इति। भक्तिरसानुभवाच्च भक्तः। यथा तृप्त्यनुभवात् तृप्त इत्युच्यते। स चानुभवो नवधा हास्यादिभक्तिभेदेन। हास्यादय एव हि भगवति प्रयुज्यमानाः

तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्[1]

इति भक्तिलक्षणाक्रान्तत्वाद् भक्तिरसपदवीमासादयन्तीति भावः। हास्यादिलक्षणन्तु वक्ष्यते। ते चामी नवापि सुखदुःख-मोहात्मकत्रैगुण्यव्यतिकरोद्भवाः। तथाहि प्रथमे त्रयो रजोमूलाः। मध्यास्तु तमोमूलाः। चरमे सत्त्वमूला इति। हास्यादयो हि रजःप्रभृतीनां विकार इत्युक्तमेकादशस्य पञ्चविंशाध्याये। तत्रापि प्रथमेषु त्रिषु क्रमात् सत्त्वसंमिश्रं। तमःसंमिश्रं सत्त्वतमःसंमिश्रञ्च रजोमूलम्। मध्येषु रजोमिश्रं सत्त्वमिश्रं रजःसत्त्वमिश्रञ्च तमः। चरमेषु तमोमिश्रं रजस्तमोमिश्रञ्च सत्त्वम्। हेयाभिधान-क्रमेण चैषां रौद्रादीनां तामसत्वेनामङ्गलत्वात् प्रथममनभिधानम्। ननु तथापि कामिनः स्पृहणीयत्वेन सर्वप्राणिनामत्यन्तपरिचितत्वात् शृङ्गारो नायको रस इति नाट्याचार्यप्रसिद्धेः शृङ्गं प्राधान्यमियर्ति प्राप्नोतीति व्युत्पत्तेश्च रसेषु शृङ्गारस्य प्राधान्यमिति गम्यते। ततश्च तस्यैव धुरि निवेशनमुचितम्। किमिति हास्यरसोऽभिनिवेशितः। सत्यम्। किन्तु नात्र कैवल्यपरे शास्त्रे भक्ति-

---

1 भाग० ७।१।३१ श्लो:।

परः शृङ्गारः प्रधानमिति द्योतयितुमाचार्येण नैष प्रथममुक्तः। एवं सति कस्मिन्नपि प्रथममभिधातव्ये हास्यरसस्याल्पपरिकरत्वात् स एवोक्तः। स्थायिभावादयश्चैषां भरतादावुक्ताः। तथाहि

हासो रतिः शोको रोषो भीर्जुगुप्सा शमः स्मयः।
उत्साहश्च क्रमादेषु स्थायिभावा रसेष्वमी ॥

तत्र वाग्वेषादिवैकृतैश्चेतोविकाशो हासः। परस्परमास्थाबन्धो रतिः। इष्टनाशादिप्रभवं चित्तस्य वैधुर्यं शोकः। प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोधः। रौद्रशक्त्यादिजनितं स्त्रीनीचप्रकृतिकं चित्तस्य वैक्लव्यं भयम्। दोषदर्शनादिभिः पदार्थानां गर्हणा जुगुप्सा। पदार्थेषु तृष्णाक्षयः शमः। तेष्वेव लोकसीमातिक्रमस्य दर्शनात् चित्तस्य विस्मृतिर्विस्मयः। कार्यारम्भेषु संरम्भः स्थेयानुत्तमप्रकृतिरुत्साहः।

तथा

सितः श्यामः कपोतश्च रक्तः कृष्णश्च नीलकः।
विशदः पीतगौरौ चेत्येषु वर्णाः क्रमादमी ॥

तदुपयोगस्तु चित्ते ध्याने च ध्याता च ते मुखरोगं निर्हरन्तीत्यभिनवगुप्तपादाः[1]।

प्रथमौ मन्मथयमौ रुद्रकालौ यथाक्रमम्।
महाकालाजितौ ब्रह्म महेन्द्रास्तेषु देवताः ॥

एवमेवंविधहास्यादिनवकभङ्ग्या भक्तिरसोऽनुभूयते। ननु कथं भक्ते रसत्वं रसलक्षणाभावात्। तत्र दशरूपकादौ[2]

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायिभावो रसः स्मृतः ॥

एतद्विवृणवते। वक्ष्यमाणस्वभावैर्विभावादिभिः काव्योपात्तैरभिनयोपदर्शि-

---

1 नाट्यशास्त्रटीका (६।४७) द्रष्टव्या।

2 दशरूपकम् ४।१।

तैर्वा श्रोतृप्रेक्षकाणामन्तर्विपरिवर्तमानो रत्यादिस्थायी स्वादगोचरतां निर्भरानन्द-संविदात्मतां नीयमानो रसः। तेन रसिकाः सामाजिकाः। काव्यन्तु तथाविधा-नन्दसंविदुन्मीलनहेतुत्वेन रसवत्। आयुर्घृतमितिवत्। विभावादि-लक्षणन्तु

कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।
विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः[1] ॥

विभावा द्वेधा। केचिदालम्बनरूपाः। यथा शृङ्गारे गोप्यो गोविन्दश्च। केचिदुद्दीपकाः। यथात्रैव चन्द्रतापादयः। अनुभावास्तु कटाक्षादयः।

पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः।
सत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम् ॥

ते च स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू।
अश्रु वैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन्निष्क्रियां गतः ॥
प्रलयो नष्टसंज्ञत्वं शेषाः सुव्यक्तलक्षणाः।
विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ॥
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ।

ते च निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्ता-
त्रासेर्ष्यामर्षगर्वाः स्मृतिमरणमदाः सुप्तिनिद्राविबोधाः।
व्रीडापस्मारमोहाः सुमतिरलसता वेगतर्कावहित्था
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च ॥[2]
विशुद्धैरविशुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥[3]

---

1 काव्यप्रकाशः ४।२७।२८। 2 दशरूपकम् ४।४-८।
3 दशरूपकम् ४।३६।

व्यासादिभिर्वर्णितस्य विष्णोर्विष्णुभक्तानां वा चरित्रस्य नवरसात्मकस्य श्रवणादिना जनितश्चमत्कारो भक्तिरसः।

एवंविधविभावादिसंयोगाद्रसो निष्पद्यते। तस्य च मुख्यया वृत्त्या रामादावनुकार्ये वृत्तिर्नटरूपबलादित्येकः पक्षः। अनुकर्तर्येवेति द्वितीयः। सामाजिकेष्विति तृतीयः। रससंविद उभयतोदत्तपादत्वादनुकर्तरि सामाजिकेषु चेति चतुर्थः। स च रसः कार्य इति केचित्। ज्ञाप्य इत्येके। भोग्य इत्यन्ये। व्यङ्ग्य इत्यपरे। सुधीभिस्तु तत्रैवानुसन्धेयाः। ग्रन्थगौरवभयान्नात्र प्रतन्यते। तस्माद्विभावादिरससामग्रीविरहान्न भक्तेः रसत्वम्। अत एवायमन्यैरेवं भक्तावपि वाच्यमिति वदद्भिः प्रत्यादिष्टः। अत उत्तरं पठति व्यासादिभिरिति। वर्णितस्य चरित्रस्य। विष्णुभक्ता गोप्यादयः। श्रवणादिनेत्यादिशब्दाद्दर्शनकीर्तनस्मरणाभिनयश्चमत्कारः। सामाजिकानां हि यस्मादेवंसामग्रीको भक्तिरसस्तस्मादनपह्नवनीय इत्यर्थः। तत्रैषा सामग्री। केनाप्युपायेन मनोनिवेशः स्थायी। चरित्रश्रवणादय उद्दीपनविभावाः। विष्णुभक्ताश्चालम्बनम्। अनुभावास्तु स्तम्भादयो वक्ष्यमाणा यथायोग्यं धृत्यादिव्यभिचारिणश्च। उपायस्तु रतिहास्यादिः। कविभिर्वर्णितस्येत्यनेन महाकविप्रबन्धसमर्प्यमाणेष्वेव रसव्यवहारो नान्यत्रेत्युक्तम्। एवमेवैतदनुकार्येषु हि जानकीरामभद्रादिषु रत्यादिमात्रम्, न तु रसत्वम्, तस्य लोकोत्तरचमत्काररूपत्वात्। चमत्कारश्च यद्यपि शृङ्गारादौ क्वचिदस्ति तथापि भयानकादावनुपलम्भान्न तत्र रसव्यवहारः। अत एव तानि चेन्नाट्यकाव्ययोरित्यादिविशेषणानि[1]। अभिनयैरुपदर्श्यमानादपि सन्दर्भैः समर्प्यमाणो रसोऽतिस्वदते। अत एवोक्तम्

कविवागभिनेयश्च तदुपायो द्विधेष्यते।

वस्तुशक्तिमहिम्ना तु प्रथमोऽत्र विशिष्यते॥ इति।

यत्त्वभिनवगुप्तहेमचन्द्राभ्यामेवं भक्तावपि वाच्यमित्युक्तं तदसत्, रसत्वस्य दर्शितत्वात्। सामग्रीसद्भावेऽपि प्रत्याख्यानमरोचकतामात्रशरणम्। न च सङ्गच्छमानोऽप्ययमसर्वविषयत्वाद्रसत्वाच्च्यवतामिति चोद्यम्, तथा

1 प्रागुद्धृता काव्यप्रकाशोक्तिरनुसन्धेया।

सति सर्वरसोच्छेदापातात्। तथा हि श्रोत्रियजरन्मीमांसकादयो हि नाट्य-मण्डपान्तरेऽपि चमत्काराभावान्मौलिकप्राया एव। एवं प्रशान्तब्रह्मचारि-प्रभृतयः शृङ्गाररसास्वादे बहिरङ्गाः। गाढरागाणाञ्च शान्तरसचर्वणानभिज्ञत्वम्। अननुभूतशोकस्पर्शानां च करुणरसास्वादावसरे पाषाणप्रख्यत्वम्। तस्मात् सवासनस्यैव रसचर्वणेऽपि सर्वथा निस्तूषं भक्तिरसदर्शनम्। ननु तथाप्यल्प-मिदमुच्यते ' स नवधेति। सन्त्येव हि रसान्तराण्यपि भोजराजादिभि-र्दर्शितानि।[1] तथाहि स्नेहस्थायिभावः प्रेयान् ' यथा

यदेव रोचते मह्यं तदेव कुरुते प्रिया।
इति वेत्ति न जानामि तत् प्रियं यत् करोति सा॥

अत्र वत्सलप्रकृतेर्धीरललितनायकस्य प्रियालम्बनविभावो विषयसौन्दर्याद्युद्दीपन-विभावो मोहमतिधृतिस्मृत्यादिव्यभिचारी स्नेहः प्रेयानिति प्रतीयते। तथा मतिस्थायिभाव उदात्तो यथा

साधारणो निरातङ्कः कन्यामन्योऽपि याचते।
किं पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः॥

अत्र हि रामस्योदात्तप्रकृतेः सीतेयं मम स्वीकारयोग्येत्येवंरूपेण प्रवृत्ता मतिः रावणप्रार्थनालक्ष्मणप्रोत्साहनाभ्यामुद्दीप्यमाना जायमानचिन्तावितर्कव्रीडावहित्थ-स्मृत्यादिभिः कालोचितोत्तरानुमीयमानैश्च विवेकचातुर्यधैर्यौदार्यादिभिः संसृज्य-मानोदात्तरसरूपेण निष्पद्यते। गर्वस्थायिभाव उद्धतः ' यथा

धृतायुधो यावदहं तावदन्यैः किमायुधैः।
यद्वा न सिद्धमस्त्रेण मम तत् केन सेत्स्यति॥[2] इति।

मैवम्। मौलिकस्य स्थायिन एवात्र सद्भावात् स्नेहादयो हि व्यभिचारिषु तैरेव पठिताः गर्वः स्नेहो धृतिर्व्रीडेत्यादिना[3]। व्यभिचारिणः स्थायिनश्चेति तु मम माता बन्ध्येतिवद् विप्रतिषिद्धे वचसी। एवमप्युच्यमाने व्यभिचारि-संख्यया रससंख्यापत्तिः स्यात्। अत एवेदमस्पृष्टं भरतादिभिः। एतेन गर्व-

---

1 सरस्वतीकण्ठाभरणम् (५।१६) द्रष्टव्यम्। 2 वेणीसंहारम् ३।४६।
3 सरस्वतीकण्ठाभरणम् ५।१६।

स्थायिभावो लौल्यनामापरो रस इत्यपि प्रत्युक्तम् । तस्माद् युक्तमुक्तमाचार्येण स नवधेति ।

तत्र हास्यरसे गोप्यः । स च त्रेधा ।

वत्सान् मुञ्चन् क्वचिदसमये क्रोशसञ्जातहास-
स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः ।
मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भाण्डं भिनत्ति
द्रव्यालाभे स्वगृहकुपितो यात्युपक्रोश्य तोकान् ॥२॥

भक्तिरस एव रसस्यादिरूपेण नवधानुभूयत इत्युक्तम् । तत्र निदर्शनानि ब्रुवाणो हासस्थायिभावे विकृतवेषालङ्कारधाष्ट्र्यलौल्यकुहकासत्प्रलापव्यङ्ग-दर्शनदोषोदाहरणादिविभावे नासावष्टम्भकपोलस्यन्दनदृष्टिव्याक्रोशाकुञ्चनस्वेदा-स्यरागपार्श्वग्रहणाद्यनुभावेऽपि अवहित्थालस्यतन्द्रात्रपास्वप्नादिसञ्चारिणि हास्य-रसे गोप्यो भक्ता इत्याह 'तत्रेति । स च त्रेधा ' उत्तममध्यमाधमेषु स्मितादिभेदात् । यदाह भरतः[1]

ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥
आकुञ्चिताक्षिगण्डं यत् श्वसनं मधुरं तथा ।
कालागतं सास्यरागं तद्वै विहसितं भवेत् ॥
अस्थानहसितं यत्तु साश्रुनेत्रं तथैव च ।
उत्कम्पितांसकशिरस्तच्चापहसितं भवेत् ॥

तत्रापि स्त्रीनीचप्रकृतावेष भूयिष्ठं दृश्यते रस[2] इति भरत-वचनाद् यशोदादिषु तमाह 'वत्सानिति । क्रोशो मा मेत्याक्रोशो । स्तेयं चौर्यलभ्यं न तु दत्तं दधिपयश्च । योगैरुपायैः । मर्कान् मर्कटान् । भोक्ष्यन् भोक्ष्यमाणः सन् । उपक्रोश्य रोदयित्वा तोकान् बालान् । (भाग० १०।८।२९) ॥२॥

---

1 नाट्यशास्त्रम् ६।६५,६८,७५ । 2 नाट्यशास्त्रम् ६।६० ।

हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यै-
श्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वित् ।
ध्वान्तागारे धृतमणिगणं स्वाङ्गमर्थप्रदीपं
काले गोप्यो यरहि गृहकृत्येषु सुव्यग्रचित्ताः ॥३॥

हस्तेति । विधिरुपायः । अन्तर्निहितस्य नवनीतादेः । वयुने ज्ञाने सति । अर्थप्रदीपम् अर्थप्रकाशकम् । स्वाङ्गं रचयति । यरहीति रेफ-हकारयोर्विश्लेषश्छन्दोऽनुरोधात् । (भाग० १०।८।३०) ॥३॥

एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ
स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ।
इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभि-
र्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ॥४॥

एवमिति । स कृष्णः । उशति कमनीये वस्तुनि । वास्तुर्वेश्मभूः । विरचितकृतिः कृतकार्यः । सुप्रतीकः शोभनावयवः' नैश्चल्यलक्षणसभ्यत्वनाख्यात् । सभये भयविलोले नयने यस्मिन् तस्मिन् श्रीमति भगवन्मुखे तदालोकिनीभिः । व्याख्यातोऽर्थो वत्समोचनादिर्यस्यै सा यशोदा । उपालब्धुं तर्जितुम् । अत्र यशोदाया उत्तमप्रकृतिकत्वात् उत्तमहास्यम् । प्रहसितमुखी । अत एव प्रकर्षार्थः प्रशब्दादेव । आलम्बनं वत्समोचनादिः । धार्ष्ट्यं विभावः । अनुभावो यशोदाया रसाभिव्यक्तिः । सञ्चारिणस्तूक्ताः । (भाग० १०।८।३१) ॥४॥

कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम् ।
शृण्वत्याः किल तन्मातुरिति होचुः समागताः ॥५॥

कृष्णस्येति श्लोको वक्तृकथनार्थः । गोप्यो यशोदाम् । (भाग० १०।८।२८) ॥५॥

गोपकन्याः ।

तस्य तत् क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ।
व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः ॥६॥

इति मुक्ताफले हास्यरसः ॥

मध्यमहास्यमाह । तस्येति । तस्य श्रीकृष्णस्य । तद् वस्त्रादानरूपं क्ष्वेलनं परिहासचेष्टा । व्रीडिता नग्नत्वात् । न निर्ययुर्जलाशयात् । अत्र दैव आलम्बनम् । क्ष्वेलनं विभावः । अन्योन्यप्रेमलक्षणमनुभावः । व्रीडा सञ्चारी । न चात्र शृङ्गार एव हास्याङ्गभूतो वेति वाच्यम् । अद्यापि तासां कौमारानपगमात् । शृङ्गारो हि युवप्रकृतिः । अत एवाचार्येण गोपकन्या इत्युक्तम् । तासाञ्च यशोदापेक्षया मध्यमत्वेन हास्यमध्यमत्वम् । तृतीयं स्वयं स्वसंज्ञेयम् । शुकः । (भाग० १०।२२।१२) ॥६॥

हेमाद्रिविरचितायां कैवल्यदीपिकायां हास्यरसः ॥

शृङ्गाररसो द्विविधः । सम्भोगो विप्रलम्भश्च । तत्र सम्भोगशृङ्गारे कौरवेन्द्रपुरस्त्रियः ।

स वै किलायं पुरुषः पुरातनो
य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे
निमीलितात्मन् निशि सुप्तशक्तिषु ॥७॥

अथ रतिस्थायिनमुज्ज्वलवेशात्मकमुत्तमयुवप्रकृतिकं स्त्रीपुंसहेतुकं माल्यर्तुशैलपुरहर्म्यनदीचन्द्रोपवनदीर्घिकाजलक्रीडादिश्रूयमाणानुभूयमानविभावं जुगुप्सालस्यौग्र्यसञ्चारिणं दीर्घापाङ्गस्मितायनुभावं शृङ्गारं सप्रभेदमाह[1] । शृङ्गारेति । स्त्रीपुंसयोः सम्बन्धतया भोगः सम्भोगः । स च सम्बन्धश्चतुर्धा । परस्परदर्शन-स्पर्शन-संजल्प-सम्प्रयोगभेदात् । भेदान्तराणां तत्रैवान्तर्भावः । तथा हि कुसुमावचयो दर्शने । चुम्बनालिङ्गनकेशग्रहादयो हि स्पर्शने । चन्द्रोदयवर्णनादयस्तु संजल्पे । संसक्ततयापानं संस्पर्शने । एव-

1 हेमचन्द्रकृतं काव्यानुशासनं (२४०) द्रष्टव्यम् ।

मत्तजलक्रीडादीनाम्। सम्प्रयोगस्य तु स्पर्शरूपत्वेऽपि प्राधान्यात् पार्थक्यम्। विप्रकर्षेण लम्भः प्राप्तिर्विप्रलम्भः। स च विप्रकर्षश्चतुर्धेति वक्ष्यते। तत्रापि सम्भोगपूर्वको विप्रलम्भ इति सम्प्रयोगस्य प्रागुक्तिः। स च सुखमयधृतिस्मृतिमतिहर्षादिसञ्चारी रोमाञ्चस्वेदकम्पाश्रुमेखलास्खलनश्वसितसाध्वसकेशबन्धनवस्त्रसंयमनवस्त्राभरणमाल्यादिसम्यङ् निवेशनविचित्रेक्षणगुणवर्णनचाटुप्रभृतिवाचिककायिकव्यापारानुभावः[1]। विभावास्तु प्रागुक्ताः। तत्र नायकप्रयुक्तादपि सम्भोगादनुरागप्राचुर्येण नायिकाप्रयुक्त एव प्रकृष्यत इति तं दर्शयन् दर्शनसम्भोगमवतारयति। तत्रेति। कौरवेन्द्रपुरं हस्तिनापुरम्।

स वै इत्यादि। वैशब्दः स्मरणे। किलशब्दस्तूत्प्रेक्षायाम्। उत्प्रेक्षा च दुर्निरूप्यत्वात्। य एकोऽद्वितीयः पुरुषः सोऽयं कृष्णः पुरातनः आद्यः। कदा एकः। आत्मन्यविशेषे भेदहेतूपाधिरहिते स्वरूपे। तदपि कदा? अग्रे गुणेभ्यः गुणस्वीकारात् पूर्वम्। तथा निशि गुणत्यागानन्तरम्। कदा गुणत्यागः? जगदित्यादि। प्रपञ्चाकारेण दर्शितमात्मानं यदा न दर्शयति। तथा सुप्तशक्तिषु चिच्छक्त्यादयः शक्तयो यदा सुप्ता भवन्ति। आत्मन्नित्यत्र[1] सुपां सुलुक् पूर्वसवर्णेति[2] सप्तम्या लुक्। (भाग० १।१०।२१) ॥७॥

स एव भूयो निजवीर्यचोदितां
स्वजीवमायां प्रकृतिं सिसृक्षतीम्।
अनामरूपात्मनि रूपनामनी
विधित्समानोऽनुससार शास्त्रकृत् ॥८॥

निराकारमुक्त्वा साकारं निरूपयति। स एवेति। स एव निराकार एव। प्रकृतिमनुससार अधिष्ठितवान्। भूयः सृष्टिप्रवाहस्यानादित्वात्। निजवीर्यचोदितां कालप्रेरिताम्। अत एव स्वजीवमायां सिसृक्षतीं स्वस्मिन्नीश्वरे जीवमायाम् असत्यं जीवरूपत्वं स्रष्टुमिच्छन्तीम्। अरूपस्य रूपाणि अनाम्नो नामानि। सञ्चित्यानुससार। तानि चान्ये जानन्त्विति। शास्त्रकृत्। शास्त्रं वेदः। (भाग० १।१०।२२) ॥८॥

---

1 हेमचन्द्रकृतं काव्यानुशासनं (२४०) द्रष्टव्यम्। 2 पाणिनिः ७।१।३९ सू:।

स वा अयं यत्पदमत्र सूरयो
जितेन्द्रिया निर्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना
नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥६॥

दुर्लभस्य सुलभतां निरूपयन्ति स वा अयमिति । यत्तुरीयपदं समाधौ सूरयः पश्यन्ति सोऽयम् । भक्त्या उत्कलितः अमलश्च यः आत्मा तेन । अलातमनि । जितमातरिश्वन इति व्यत्ययात् प्रथमार्थे द्वितीया । ननु अहो । एष कृष्णः सत्त्वं प्रत्यक्षत्वं परिमार्ष्टुं नाशयितुमर्हति । देशान्तरगमनेनाप्रत्यक्षो मा भूत् सदैवास्मद्दृग्गोचरो भूयादिति भावः । एतदेव दर्शनसम्भोगद्योतकम् । न चात्र परमार्थनिरूपणादेः प्रशान्त इति मन्तव्यम् । भगवति सकामत्वेन तासां तृष्णाक्षयरूपशमस्याभावात् । अत एव नन्वेष सत्त्वमित्यत्र व्याख्यान्तरं नाद्रियते । रतिरेव स्थायीत्युत्तरश्लोकेषु सुव्यक्तम् । नापि

णिहुयरमणम्मि लोयणवहम्मि पडिए गुरूण मज्झम्मि ।
सयलपरिहारहियया वणगमणं वेव महइ वहू ॥

इत्यादौ सकलपरिहारवनगमनयोः शान्तानुभावयोरिवालाक्षित्वप्रतिपादनस्य शान्तविभावत्वेन श्रृङ्गारविरुद्धत्वात् प्रतिकूलविभावादिग्रहलक्षणो रसदोषः प्रसज्यत इति चोद्यम् । रत्युत्कर्षभङ्गादिदोषत्वं मुख्यार्थ इति दोषः प्रसज्यत इति वचनात् । सा चात्र भगवद्गुणानुवादेन पुष्यतीति न दोषत्वम् । पुरुषान्तरालम्बनत्वे तु विभावादिप्रातिकूल्यं दोष एव वा । यथा

प्रसादे वर्तस्व प्रकटय मुदं सन्त्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥

इत्यत्र गतः कालहरिण इत्यनित्यताप्रकाशनं शान्तानुभावः । (भाग० १।१०।२३) ॥६॥

स वा अयं सख्यनुगीतसत्कथो
वेदेषु गुह्येषु च वेदवादिभिः ।
य एक ईशो जगदात्मलीलया
सृजत्यवत्यत्ति न तत्र सज्जते ॥१०॥

उत्तमःश्लोकत्वं निरूपयति स इति। यो वेदवादिभिरनुगीतसत्कथः सोऽयम्। गुह्येषु वेदान्तेषु। वेदवादिभिः वेदवेदान्तरहस्यप्रतिपादनकुशलैरित्यर्थः। कोऽसौ सत्कथः? य एक ईशः। आत्मलीलया जगत्सृष्ट्यादि करोति। न च तत्र सज्जते इत्येवंरूपः। (भाग० १।१०।२४) ॥१०॥

यदा ह्यधर्मेण तमोधियो नृपा
जीवन्ति तत्रैष हि सत्त्वतः किल ।
धत्ते भगं सत्यमृतं दयां यशो
भवाय रूपाणि दधद् युगे युगे ॥११॥

अवताररूपं निरूपयति यदेति। सत्त्वतः कृष्णः। रूपाणि दधत् जगदादीनि धत्ते। भगं भजनीयत्वम्। सत्यं सत्यप्रतिज्ञत्वम्। ऋतं सत्योपदेशकत्वम्। दयां भक्तानुकम्पाम्। यशोऽद्भुतकर्मत्वम्। भवाय स्थित्यै। (भाग० १।१०।२५) ॥११॥

अहो अलं श्लाघ्यतमं यदोः कुल-
महो अलं पुण्यतमं मधोर्वनम् ।
यदेषु पुंसामृषभः श्रियः पतिः
स्वजन्मना चङ्क्रमणेन चाञ्चति ॥१२॥

कृष्णसङ्गमस्पृहां निरूपयन्ति अहो इत्यादि। अहो आश्चर्यम्। अलम् अत्यर्थम्। मधोर्वनं मथुरा। यत् कुलं वनञ्च स्वजन्मचंक्रमणाभ्याम् अञ्चति गच्छति। पूजयति मानयति च। पुंसामृषभः श्रियः पतिः श्लाघ्यां स्त्रीणां स्पृहणीयं चिरललितश्लोकम्। (भाग० १।१०।२६ ॥१२॥

अहो बत स्वर्यशसस्तिरस्करी
कुशस्थली पुण्ययशस्करी भुवः।
पश्यन्ति नित्यं यदनुग्रहेषितं
स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥१३॥

अहो इति। अहो वत अहो आश्चर्यम्। कुशस्थली द्वारका। यच्छब्दाभ्यां स एव। स्मितयुक्तः अवलोको यस्य तम्। स्वपतिं कृष्णम् ' स एव हि स्वस्यात्मनः पतिः ' अन्यो देहस्य। यदुकुलादीनि धन्यानि। न त्वत्रान्यस्य कस्यचित् कुलमेतत् परं वा यदीदृशेन नायकरत्नेनालङ्कृतमिति भावातिशयः। (भाग० १।१०।२७) ॥१३॥

नूनं व्रतस्नानहुतादिनेश्वरः
समर्चितो ह्यस्य गृहीतपाणिभिः।
पिबन्ति याः सख्यधरामृतं मुहु-
र्व्रजस्त्रियः सम्मुमुहुर्यदाशया[1] ॥१४॥

स्पर्शसम्भोगमाह ' नूनमित्यादि। नूनंशब्दो वितर्के। कृष्णस्य गृहीतपाणिभिः पत्नीभिः ईश्वरोऽर्चितः। पूर्वजन्मसु अयमिति वाच्यम्। ईश्वरोक्तिर्लोकदृष्ट्या। यस्याधरामृतस्याशया अभिलाषेण व्रजस्त्रियः संमुमुहुः। व्रजस्त्रीणां पुरस्त्रीत्वात् स्वधर्मत्यागात् सम्मोहाख्यनवमस्मरदशोत्पत्तेश्च पुरुषोत्कर्षः। (भाग० १।१०।२८) ॥१४॥

या वीर्यशुल्केन हृताः स्वयंवरे
प्रमथ्य चैद्यप्रमुखान् [2]विशुष्मिणः।
प्रद्युम्नसाम्बाम्बसुतादयोऽपरा
याश्चाहृता भौमवधे सहस्रशः ॥१५॥

या इति। विशुष्मिणो बलिष्ठान्। प्रदुम्नसुता रुक्मिणी। साम्बसुता

1 भाग० ०दाशया:।　　　　2 भाग० हि शुष्मिणः।

जाम्बवती । आम्बसुता नाग्नजिती । भौमो नरकासुरः । सहस्रशः । सहस्रं यावत् षोडश । (भाग० १।१०।२९) ॥१५॥

एताः परं स्त्रीत्वमपास्तपेशलं
निरस्तशौचं बत साधु कुर्वते ।
यासां गृहात् पुष्करलोचनः पति-
र्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥१६॥

एता इति । एताः परं केवलम् । स्त्रीत्वं । साधु कुर्वते । पेशलं प्रियंवदत्वम् । शौचं शुचित्वम् । आहृतिभिः पारिजातादि-प्रियवस्तूनामाहरणैः । हृदि स्पृशन्नुत्कण्ठां जनयन् । न च पुरस्त्रीणां सकामत्वेऽपि भगवतो निरपेक्षत्वेन परस्परानुभावात् रसाभासानुवादात् रसाभासोऽयमिति वाच्यम् ।

एवंविधा वदन्तीनां स गिरः पुरयोषिताम् ।
निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः[1] ॥

इत्युत्तरत्र भगवतोऽपि स्वभावत्वानुवादात् । सूतः शौनकम् । (भाग० १।१०।३०) ॥१६॥

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता
ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ।
भेजुर्मुदाविरतमेधितयानुराग-
हासावलोकनवसङ्गमजल्पलज्जाः ॥१७॥

इत्थमिति । पदवीं मार्गम् । एधितया भजनेन । अनुरागेण हासावलोकनवसङ्गमाच्च जल्पलज्जा यासां तास्तथा । सङ्गमः सन्निधानम् । (भाग० १०।५९।४४) ॥१७॥

---

1 भाग० १।१०।३१ श्लो० ।

प्रत्युद्गमासनवरार्हणपादशौच-
ताम्बूलविश्रमणवीजनगन्धमाल्यैः ।
केशप्रसारशयनस्नपनोपहार्यै-
र्दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥१८॥

भजनमेवाह । प्रत्युद्गमः प्रत्युत्थानम् । आसनं स्वासने उपवेशनम् । अर्हणमुपायनम् । पादयोः शौचं प्रक्षालनम् । विश्रम्यतेऽनेनेति विश्रमणम् । प्रसारः प्रसाधनम् । स्वयं पचनं परिवेषणञ्च । दासीनां शतानि सन्ति यासाम् । स्मशब्दो वाक्यपूरणार्थः । (भाग० १०।५६।४५) ॥१८॥

मनांसि तासामरविन्दलोचनः
प्रगल्भलीलाहसितावलोकनः[1] ।
जहार मत्तद्विरदेन्द्रविक्रमो
दृशां ददच्छ्रीरमणात्मनोत्सवम् ॥१९॥

स्पर्शनान्तरत्वादनन्तरं सम्प्रयोगमाह । मनांसीति । तासां मथुरास्त्रीणाम् । प्रगल्भा प्रौढा । लीला विदग्धचेष्टा । विक्रमो गमनं गतिः शक्तिर्वा । दृशां दृष्टीनाम् । श्रीरमणात्मना लक्ष्मीमुपभुञ्जानेन शरीरेण । उत्सवं प्रीतिम् । (भाग० १०।४१।२७) ॥१९॥

दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं
तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ।
आनन्दमूर्तिमुपगुह्य दृशात्मलब्धं
हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥२०॥

दृष्ट्वेति । मुहुः श्रुतं वारं वारं श्रुतम् । श्रीकृष्णं दृष्ट्वा अनुद्रुतचेतसः

1 भाग० ०हसितावलोकैः ।

गच्छन्तं श्रीकृष्णं चित्तेनानुगच्छन्त्यः। तत् किमभ्युपहता एव नेत्याह ' तदिति। तत् तथाविधं भावावबोधनक्षमं यत् प्रेक्षणमुत्कृष्टञ्च स्मितं तदेव निर्वापकत्वात् सुधा तयोक्षणं सेचनं तेन लब्धमानाः कृतस्वीकाराः। उपगूहनम् आलिङ्गनम्। तत् किं प्रकाशमेव नेत्याह ' दृशा आत्मना बुद्धया लब्धं प्राप्तम्। एव-मादावन्तर्बहिरिह प्रयोज्यमित्यादि कामतन्त्रानुसारेण बाह्यान्तरमुक्त्वा आधिं जहुरित्यान्तरमाह ' आधिं तदप्राप्तिदुःखम्। अनन्तं चिरं सञ्चितम्। यद्वा अनन्तं यथा स्यात् तथा जहुः। अत्रैव सात्त्विकानुभावमाह ' हृष्यत्त्व च इति ' प्रगल्भलीलादय उद्दीपनविभावाः। सञ्चारिणः स्वयमूह्याः। स एव भगवता पुरस्त्रीबुद्धिकामिनीनां संश्लेषरूपः कविना मानसः सम्प्रयोग उक्तः। शारीरस्तु पशुधर्मत्वेन ग्राम्यत्वात् एतत्प्रकर्षत्वात् विशिष्टदेवताविषयत्वेन वर्णनीयत्वाच्च नोक्तः। रत्यादिशब्दवाच्यत्वेनाचारुत्वात् हृष्यत्त्वच इत्यनुभव-द्वारैवोक्तः। हे अरिन्दम परीक्षित्! अरयोऽत्र कामादयः षड् वर्ण्यमानाः। श्रृङ्गारनिर्भरचित्तो मा भूदयमित्युचितं सम्बोधनम्। शुकः। (भाग० १०।४१।२८) ॥२०॥

पुण्या बत व्रजभुवो यदयं नृलिङ्ग-
गूढः पुराणपुरुषो वनचित्रमाल्यः।
गाः पालयन् सहबलः क्वणयंश्च वेणुं
विक्रीडयाञ्चति गिरित्ररमार्चिताङ्घ्रिः ॥२१॥

दीर्घसम्प्रयोगस्य स्पृहया तं प्राप्तवतीर्गोपीः स्तुवन्ति पुण्या इत्यादि। बत विस्मये। पुण्याः पुण्याधिकाः। व्रजभुवो गोप्यः। नृलिङ्गेन मर्त्यमूर्त्या गूढः। गूढतामेवाह ' वनचित्रेति। त्रिभिर्वनमाल्यैश्चित्र इत्यर्थः। यद् यासु गोपीषु अञ्चति गच्छति उपभुङ्क्ते। विक्रीडया विविध-क्रीडया। विचित्रैः कामकरणैरित्यर्थः। गिरित्रो रुद्रः। रमा लक्ष्मीः। अनेन सकामविचित्रैः कामैरयमेव सेव्य इत्युक्तम्। (भाग० १०।४४।१३) ॥२१॥

गोप्यस्तपः किमचरन् यदमुष्य रूपं
लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुराप-
मेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥२२॥

आस्तामनेन सह सम्प्रयोगो दर्शनमप्यस्य दुर्लभमित्याहुर्गोप्य इति । यद् यस्मात् अमुष्य पुरुषरत्नस्य लावण्यसारम् अशेषलावण्येन गृहीतसारात्मकम् । लावण्यरूपयोरभेदप्रतिपत्तिः सामानाधिकरण्ये व्यङ्ग्या । अत एव असमोर्ध्वम् अविद्यमानतुल्याधिकम् । तच्च स्वभावसिद्धम् न तु केनचित् कर्त्रा निर्मितम् । अनुसवाभिनवं सर्वक्षणमपि दर्शनेन नवं नवम् । अकृततपोभिरेकान्तधाम दुर्लभमव्यभिचारि स्थानम् । ऐश्वरः ऐश्वर्यम् । एतेन दुर्भगत्वदुर्विधत्वदुर्बलत्वानि भर्तुर्दोषाः स्त्रीणां वैराग्यहेतवोऽत्र न सन्ति इत्युक्तम् । (भाग० १०।४४।१४) ॥२२॥

या दोहनेऽवहनने मथनोपलेप-
प्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ ।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो
धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥२३॥

या इति । या एनं दोहनादौ गायन्ति चकारात् पश्यन्ति । अवहनने कण्डने । प्रेङ्खेङ्खनं हिन्दोलनम् । मार्जनम् अवकरनिरासः । (भाग० १०।४४।१५) ॥२३॥

प्रातर्व्रजाद्व्रजत आविशतश्च सायं
गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ।

निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः
पश्यन्ति सस्मितमुखं सदयावलोकम् ॥२४॥

प्रातरिति । आविशतः आगच्छतः । निर्गम्य गृहद्वारि स्थित्वेत्यर्थः । शुकः । (भाग० १०।४४।१६) ॥२४॥

गोप्य ऊचुः

मैवं विभोऽर्हति भवान् गदितुं नृशंसं
सन्त्यज्य सर्वविषयांस्तव पादमूलम् ।
भक्ता भजस्व दुरवग्रह मा त्यजास्मान्
देवो यथादिपुरुषो भजते मुमुक्षून् ॥२५॥

संजल्पसम्भोगमाह ' गोप्य इति । हे विभो स्वामिन् ! एवं तद्-यात मा चिरं घोषमित्येवं रूपम्[1] । नृशंसं कठिनम् । भक्ता भजनं कर्तुमारब्धाः । आदि-कर्मणि क्तः कर्तरि च[2] । दुरवग्रह दुराराध्य । यद्यपि वयं तव अननुरूपा-स्तथापि सर्वस्वत्यागेन भजतः सर्वस्यापि स्वीकार एव सत्पुरुषधर्म इति दृष्टान्ते व्यङ्ग्यम् । (भाग० १०।२६।३१) ॥२५॥

यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग
स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥२६॥

ननु किं मद्भजनेन भर्तुः शुश्रूषणमित्युक्तम् । स्वधर्म एवाद्रियतामिति चेत्तत्राहुः ' यत् पत्येति । हे अङ्ग ! पत्याद्यनुवृत्तिः स्त्रीणां निजधर्म इति यत् त्वयोक्तं तत् त्वय्येवास्तु ' न तु प्राकृते पत्यादौ । किल यस्मात् ' त्वं प्रेष्ठः ' नान्यवत् प्रियमात्रत्वम् । तनुभृतां प्रेष्ठो नान्यवद् द्वित्राणाम् । बन्धुः सुहृत् ।

---

1 भाग० १०।२६।२२ 2 पाणिनिः ३।४।७१

आत्मेति। त्वद्भजनादपत्यभजनमेव भविष्यति। आत्मैव हि यदपत्यरूपः। त्वञ्च सर्वात्मा। न चैवं विशेषात् पत्यादिभजनमेव कार्यमिति वाच्यम्। त्वं हि धर्मवित् यथास्थितं धर्मं वेत्सि। उपदेशपदो गुरुः। यथाज्ञानं कथयसीत्यर्थः। ईशः कर्तुमकर्तुं च योग्यः फलदाने क्षम इत्यर्थः। पत्यादयस्त्वेवंरूपाः। तस्माल्लाघवेनैव फलसिद्धौ किं गौरवेण इत्यर्थः। (भाग० १०।२९।३२) ॥२६॥

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्
नित्य प्रिये पतिसुतादिभिरार्तिदैः किम्।
तन्नः प्रसीद वरदेश्वर मास्म छिन्द्या
आशां भृतां त्वयि चिरादरविन्दनेत्र ॥२७॥

किञ्चातोऽपि त्वद्भजनमेव श्रेय इत्याहुः। कुर्वन्तीति। कुशला दीर्घदर्शिनः। स्वे बन्धौ स्वादिभिस्त्रिभिः सप्तम्यन्तैः पत्यादयस्त्रय उक्ताः। हे नित्य त्वं नित्यः। पत्यादयस्तु अनित्यत्वादार्तिदाः। ततस्तैः किम्। नो किमपि इत्यर्थः। तत्तस्मादन्यभजनस्य सदोषत्वात् त्वद्भजनस्य सुगमत्वाच्च। आशामङ्गसङ्गस्पृहाम्। चिरात् आ शरीरग्रहणात्। अरविन्दनेत्रत्वात् आशा। वरदेश्वरत्वेऽप्यस्मदाशाच्छेदनमकीर्तिकरमिति भावः। एवमपि गमनादेशे गन्तुमपि न शक्यत इत्याहुः। (भाग० १०।२९।३३) ॥२७॥

चित्तं सुखेन भवतापहृतं गृहेषु
यन्निर्विशत्युत करावपि गृह्यकृत्ये।
पादौ पदं न चलतस्तव पादमूलाद्
यामः कथं व्रजमथो करवाम किं वा ॥२८॥

चित्तमित्यादि। सुखेन सुखरूपेण। निर्विशति व्याप्रियते। उत अहो यौ करौ निर्विशतः तावपि हृतौ। आस्तां तावद् गृहगमनवार्ता।

गृहप्राप्तिरप्यशक्या इत्याहुः। अतः कथं यामः। अतो न यामश्चेत् किं करवाम तव स्वीकारं विनेति भावः। करवामेति संप्रश्ने लोट्। तस्मादयमस्मत्-प्रणयो मान्य इत्याहुः। (भाग० १०।२६।३४) ॥२८॥

सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निम्।
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥२६॥

सिञ्चेति। अङ्ग अहो। अमृतं सुधा। पूरकः प्रवाहः। हृच्छयाग्निं कामाग्निम्। हासादिभिरिन्धनैरुद्दीपितम्। कलं मधुरम्। अधरसुधां पाययस्वेत्यर्थः। नो चेन्न सिञ्चसि चेत् तत्राहुः। उपयुक्तं दग्धम्। शाब्य(?)मात्रं तवावशेदयति। वयन्तु तत्पादसन्निकृष्टा भविष्याम एवेत्यर्थः। (भाग० १०।२६।३५) ॥२६॥

यर्ह्यम्बुजाक्ष तव पादतलं रमाया
दत्तक्षणं क्वचिदरण्यजनप्रियस्य।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग
स्थातुं त्वयाभिरमिता बत पारयामः ॥३०॥

तथाप्यज्ञानरक्तेषु जनेषु प्रसङ्गोऽनुचित इव तत्राहुः' यर्हीति। दत्तक्षणं दत्तावसरम्। क्वचित् कस्मिन्नपि संकेतस्थाने। अस्प्राक्ष्म स्पृष्टवत्यः। त्वत्तो-ऽन्यं न जानीम इत्यर्थे कृतदिव्याः। अरण्यजन इत्यात्मानं निर्दिशन्ति। एतेन रमारमणस्यापि ते स्वानुरागमवेद्येदमस्माभिर्दिव्यं कृतं न स्वरुचि-मात्रेणेत्युक्तम्। तत्प्रभृति अन्येषां पतीनां समक्षं स्थातुमपि न पारयामः न शक्नुमः किं पुना रन्तुम्। अञ्जसा स्वारस्येन बलादुपभुञ्जते ते। बत निश्चितम्। अतस्त्वय्येवानुराग इत्यर्थः। (भाग० १०।२६।३६) ॥३०॥

श्रीर्यत् पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ।
यस्याः स्ववीक्षण [1]उतान्यसुरप्रयास
स्तद्वद्वयश्च तव पादरजः प्रपन्नाः ॥३१॥

आस्तामङ्गसङ्गस्तत्पादशुश्रूषणामप्यनुमन्यस्वेत्याहुः श्रीरिति । यत् यस्मात् श्रीरपि पादरज एव चकमे । वक्षसि स्थानं लब्ध्वापि । किम्भूतं रजः भृत्यैर्जुष्टम् । तथा तुलस्याः सम्बन्ध्यपि । किल प्रसिद्धौ । यस्याः श्रियः । उतेत्यप्यर्थे । अन्ये ब्रह्मादयः । प्रयासः तपःक्लेशः । तद्वत् श्रीवत् । वक्षसि स्थितापि श्रीः भृत्योपभुक्तं सपत्नीसम्बन्ध्यपि पादरज एव चकमे—इत्यतिशयः । (भाग० १०।२९।३७) ॥३१॥

तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं
प्राप्ता विसृज्य वसतीस्तदुपासनाशाः ।
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकाम-
तप्तात्मनां पुरुषभूषण देहि दास्यम् ॥३२॥

तन्न इति । तत् तस्मात् श्रियापि काम्यमानत्वात् । हे वृजिनार्दन दुःखनाशक । वसतीर्गृहान् । तव सुन्दराभ्यां स्मितनिरीक्षणाभ्यां यस्तीव्रः कामः तेन तप्तचित्तानामस्माकम् । (भाग० १०।२९।३८) ॥३२॥

वीक्ष्यालकावृतमुखं तव कुण्डलश्री-
गण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताभयञ्च भुजदण्डयुगं विलोक्य
वक्षः श्रियैकरमणञ्च भवाम दास्यः ॥३३॥

ननु सन्त्यव पुरुषान्तराणीति किं ममैव प्रार्थनयेति चेत्तत्राहुः वीक्ष्येति । अलकाश्चूर्णकेशाः । कुण्डलश्रीश्च गण्डस्थलञ्चाधरसुधा-चेति द्वन्द्वैक्यम् । हसितावलोकश्च । श्रिया एकरमणम् । आर्षोऽवर्णागमः सन्धिर्वा । अन्यान-

1 स्ववीक्षणकृते इति स्वामिसम्मतः पाठः ।

पेत्वं वच्चः श्रीप्रलोभकमित्येकशब्दार्थः। भवाम इत्याशिषि लोट्। (भाग० १०।२६।३६)॥३३॥

का स्त्र्यङ्ग ते कलपदामृतवेणुगीत[1]-
सम्मोहितार्यचरितान्न चलेत्त्रिलोक्याम्।
त्रैलोक्यसौभगमिदञ्च निरीक्ष्य रूपं
यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥३४॥

तथापि परपुरुषप्रसङ्गाच्च सन्मार्गातिक्रमोऽनुचित इति चेत्तत्राहुः' का स्त्रीति। कलैर्मधुरैः पदैरमृतं सुधाभूतं यद् वेणुगीतं तेन सम्मोहिता उत्पन्नसम्मोहाख्यनवमस्मरदशाः। त्रैलोक्यस्य सौभगं सौभाग्यं जनप्रियत्वं यस्मिन् रूपे। यत् यस्मात् वेणुगीताद्रूपाद्वा गवादयः पुलकान्यबिभ्रन् नितरां धृतवन्तः। द्विजाः पक्षिणः। अयोग्येष्वपीति मंत्तु भावाविर्भावात् का कथा अस्माकम्। स्मरवैवश्यादिदं चेष्टितं स्यादिति भावः। (भाग० १०।२६।४०)॥३४॥

व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो
देवो यथादिपुरुषः सुरलोकगोप्ता।
तन्नो निधेहि करपङ्कजमार्तबन्धो
तप्तस्तनेषु च शिरःसु च किङ्करीणाम् ॥३५॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तप्रकरणं नाम॥
इत्येकादशोऽध्यायः॥११॥

व्यक्तमिति। व्यक्तं स्पष्टम्। भयं परहेतुकम्। आर्तिर्मनःपीडा। अभेदेऽपि देवो यथेति भेदोपमया सम्मोहितत्वं विवृतम्। तत् तस्मात्। शब्दद्वयमुभयत्र प्राधान्यद्योतनार्थम्। गोप्यः श्रीकृष्णम्। (भाग० १०।२६।४१)॥३५॥

इति श्रीहेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तप्रकरणम्॥
समाप्तोऽयमेकादशोऽध्यायः॥११॥

---

1 कलपदायतमूर्च्छितेन इति स्वामिसम्मतः पाठः।

द्वादशोऽध्यायः

विप्रलम्भशृङ्गारे गोप्यः ।

अक्षण्वतां फलमिदं न परं विदामः
सख्यः पशूननुविवेशयतोर्वयस्यैः ।
वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं
यैर्वा[1] निपीतमनुरक्तकटाक्षमोक्षम् ॥१॥

एवं चतुर्भेदं सम्भोगशृङ्गारमुक्त्वा विप्रलम्भमाह ' विप्रलम्भेति । स चतुर्धा पूर्वानुराग-मान-प्रवास-वैचित्त्यभेदात् । तल्लक्षणान्तु

प्रागसङ्गतयोर्यूनोरभिलाषः प्रवर्तते ।
सङ्कल्परमणीयोऽनुरागः स प्राच्य उच्यते ॥
अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् ।
अतो हेतोरहेतोश्च यूनोर्मानमुदञ्चति ॥
देशान्तरादिभिर्यूनोर्व्यवधानं चिराय यत् ।
नवेऽनुरागे प्रौढे वा प्रवासः सोऽभिधीयते ॥[2]

यत्र तु सन्निकर्षेऽपि प्रियः प्रिया वा विभ्रमवशात् स्वरूपमपि विस्मरति स वैचित्त्यविप्रलम्भः । स च प्राग्भ्यस्त्रिभ्यो भिन्न एव तल्लक्षणाभावात् । न चायं नास्त्येव इहैव वक्ष्यमाणत्वात् ' अयि प्रिये इत्यारभ्य मुनिर्यथात्मानमित्येतत्पर्यन्तं नैषधचरितेऽपि नवमसर्गे[3] नलभैमीसंवादेऽस्यैव प्रपञ्चितत्वाच्च । यत्तु भोज-रुद्रटाभ्यां[4] स्त्रियाः पुरुषस्य वा पञ्चत्वेऽन्य-

1 यैर्वा इति स्वामिसम्मतः पाठः ।
2 सरस्वतीकण्ठाभरणम् (५।४८-४९) द्रष्टव्यम् ।
3 १०३-१२१ श्लोकाः । 4 सरस्वतीकण्ठाभरणम् ५।५० । काव्यालङ्कारः १४।३४ ।

तस्मिन् दुःखायमाने करुणाख्यमस्य भेदान्तरत्वमभ्युपगम्यते तदसत्। तस्य शोकस्थायित्वेन करुणाख्यपृथग्भूतरसत्वात्। केवलं स्त्रीपुरुषालम्बनत्वेन विप्रलम्भभ्रममात्रम्। अन्यथा प्रेयसोऽपि भेदान्तरत्वमभ्युपगम्यते। यत्तु मम्मटेन[1] मेघदूतकाव्यमालोक्य शापहेतुरित्यभेदान्तरत्वमुक्तं तदप्यसत् तस्य प्रवासान्तर्गतत्वात्। अन्यथोत्तमर्णराजवन्नियन्त्रितादिनिमित्ते भेदानन्त्यं स्यात्। अत एव हेमचन्द्रादिभिरेतन्नादृतम्[2]। तस्मादुक्तभेदा एव युक्ताः। न च विप्रलम्भो दुःखरूपत्वात् नोच्यतामिति वाच्यम्। सम्भोगपोषकत्वादस्य। यदाह राजा

न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान् रागो विवर्धते ॥[3]

अत्र च शङ्कौत्सुक्यमदग्लानिनिद्रासुप्तप्रबोधचिन्तासूयाश्रमनिर्वेदमरणोन्माद-जडताव्याधिस्वप्नापस्मारादयः सञ्चारिणः। सन्तापजागरकार्कश्यप्रलापक्षामता-नेत्रवचोवक्रतादीनसञ्चरणानुकारकृतिलेखनवाचनस्वभावनिह्नववार्ताप्रश्नस्नेहनिर्वेदसा-त्त्विकानुभवनशीलसेवनमरणोद्यमसन्देशादयोऽनुभावाः। तत्र पूर्वानुरागे [विप्र-लम्भ्यशृङ्गारः] द्वेधा दैवपारवश्ययोरप्राप्तिहेतुत्वात्।

तत्र दैवहेतुकं तावदाह 'अक्षण्वतामिति। हे सख्यः। यैः व्रजेश-सुतयो रामकृष्णयोः वक्त्रमक्षिभिर्निपीतम्। तेषामक्षण्वतां विशालदृष्टीनामिदं पानमेव केवलं फलं न परं नान्यत्। छन्दस्यपि दृश्यत[4] इत्यक्ष्णोऽनङ्। नलोपः। अनो नुडिति[5] नत्वे च अक्षण्वतामिति रूपम्। अनु अनुक्रमेण अनुवेणुना रूपानुरूपेण वेणुना जुष्टं सेवितम्। अनुरक्तानां सानुरागाणां कटाक्षाणां मोक्षो विसर्जनं यस्मिन् वक्त्रे तत्तथा। (भाग० १०।२१।७) ॥१॥

---

1 मम्मटप्रणीतकाव्यप्रकाशः ४।२७। 2 हेमचन्द्र प्रणीतकाव्यानुशासनम् २ अः
3 भोजराजकृतसरस्वतीकण्ठाभरणम् ५।५२। 4 पाणिनि: ७।१।७६।
5 पाणिनि: ८।२।१६।

चूतप्रवालबर्हस्तवकोत्पलाब्ज-
मालानुपृक्तपरिधानविचित्रवेषौ ।
मध्ये विरेजतुरलं पशुपालगोष्ठ्यां
रङ्गे यथा नटवरौ क्व च गायमानौ ॥२॥

चूतेति । चूतस्य प्रबालाः पल्लवाः । बर्हं मयूरपिच्छम् । स्तवकः पुष्पगुच्छः । उत्पलं रात्रिविकाशि । अब्जं दिनविकाशि । तेषां मालाभिः अनुपृक्तं संपृक्तं यत् परिधानं तेन विचित्रो वेषो ययोस्तौ तथा । गोष्ठी मण्डली । (भाग० १०।२१।८) ॥२॥

गोप्यः किमाचरदयं कुशलं स्म वेणु-
र्दामोदराधरसुधामपि गोपिकानाम् ।
भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो
हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः ॥३॥

गोप्य इति । अयि । गोपिकानां गोपिकासम्बन्धिनीनामपि गोपीभिर्भोग्यामित्यर्थः । स्वयं स्वातन्त्र्येणैव । यस्य वेणोः पिबतोऽवशिष्टं रसं ह्रदिन्यो यमुनाद्यास्तरवोऽपि भुञ्जते । हृष्यत्त्वच उद्भिन्नवल्कलत्वात् । अश्रु मुमुचुः क्षरत्क्षीरत्वात् । आर्या रसिकाः । आभ्यामनुभावाभ्यां तरुकर्तृकं पानं सम्भाव्यत इत्यर्थः । (भाग० १०।२१।९) ॥३॥

वृन्दावनं सखि भुवो वितनोति कीर्तिं
यद्देवकीसुतपदाम्बुजलब्धलक्ष्मि ।
गोविन्दवेणुमनु मत्तमयूरनृत्यं
प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्त्वम् ॥४॥

वृन्दावनमिति । यद् यस्माद् गोविन्दस्य निर्वेदस्य वेणुम् अर्थाद् वाद्यमानम्

अनु लक्षीकृत्य मत्तमयूरनृत्यं भवति। वेणुध्वनिं श्रुत्वा मयूरा स्तनितबुद्ध्या नृत्यन्तीत्यर्थः। प्रेक्ष्येषु दर्शनीयेषु अद्रेर्गोवर्धनस्य सानुषु। अवरतानि वेणुगीत-श्रवणार्थं निभृतीभूतानि ' अन्यानि मयूरेभ्यः ' समस्तानि सत्त्वानि मृगादीनि यस्मिन् वृन्दावने तत्तथा। (भाग० १०।२१।१०) ॥४॥

धन्याः स्म मूढमतयोऽपि हरिण्य एता
या नन्दनन्दनमुपात्तविचित्रवेषम्।
आकर्ण्य वेणुरणितं सह कृष्णसाराः
पूजां दधुर्विरचितां प्रणयावलोकैः ॥५॥

धन्याः स्मेति। मूढमतयस्तिर्यक्त्वात्। वेणुः रणितो वादितो येन तम्। नन्दनन्दनस्य वेणुगीतमाकर्ण्येति वक्तव्ये नन्दनन्दनमाकर्ण्येति लोकोक्त्युक्तम्। यथैवं गायन्नाकर्णितो भवद्भिरित्युच्यते। प्रणयावलोकैः प्रीत्युत्फुल्लैर्नयननीलोत्पलैरित्यर्थः। (भाग० १०।२१।११) ॥५॥

कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं
श्रुत्वा च तत्क्वणितवेणुविविक्तगीतम्।
देव्यो विमानगतयः स्मरनुन्नसारा
भ्रश्यत्प्रसूनकवरा मुमुहुर्विनीव्यः ॥६॥

कृष्णमिति। वनितानामनुरागजननसमर्थानां स्त्रीणामुत्सवो याभ्यां ते रूपशीले स्वरूपाचरणे यस्य तम्। तेन श्रीकृष्णेन क्वणितस्य वादितस्य वेणोर्विविक्तमसङ्कीर्णरागं गीतम्। देव्यो देवस्त्रियः। स्मरेण नुन्नः प्रेषितः सारो धैर्यं यासां ताः। भ्रश्यत्प्रसूनानि कवराणि केशपाशा यासां तास्तथा। विनीव्यो विस्रस्तवस्त्राः। मुमुहुर्मोहाख्यां स्मरदशामीयुः। (भाग० १०।२१।१२) ॥६॥

गावश्च कृष्णमुखनिर्गतवेणुगीत-
पीयूषमुत्तम्भितकर्णपुटैः पिबन्त्यः ।
शावाः स्नुतस्तनपयःकवलाः स्म तस्थु-
र्गोविन्दमात्मनि दृशाश्रुकलाः स्पृशन्त्यः ॥७॥

गावश्चेति । उत्तम्भितम् ऊर्ध्वीकृतम् । चशब्दो भिन्नक्रमः । शावाश्च । शावा वत्साः । स्नुतः क्षरितः अर्थात् मुखात् । स्तनस्य पयसः कवलो ग्रासो येषां ते तथा । ते च पिबन्तस्तस्थुरिति विपरिणामः । गोविन्दम् आत्मन्यन्तःकरणे स्पृशन्त्यः । दृशा अश्रुकला आनन्दाश्रूणि स्पृशन्ति । वत्सपक्षे विपरिणामः । तस्थुरित्यनेन क्रियान्तरविरहात् ताटस्थ्यात् स्तम्भ उक्तः । (भाग० १०।२१।१३) ॥७॥

प्रायो बताम्ब मुनयो विहगा वनेऽस्मिन्
कृष्णेक्षितं तदुदितं कलवेणुगीतम् ।
आरुह्य ये द्रुमभुजान् रुचिरप्रवालान्
शृण्वन्ति मीलितदृशो विगतान्यवाचः[1] ॥८॥

प्राय इति । प्राय उत्प्रेक्षायाम् । बत अहो । ये मुनयस्ते विहगत्वमापन्ना इवेत्यर्थः । कृष्णेनेक्षितं गीतं शास्त्रस्य मध्ये स्वप्रज्ञया कृष्णेनैव दृष्टमित्यर्थः । तेनैवोक्तञ्च यत् कलं मधुरं वेणुगीतम् । भुजाः शाखाः । विगता अन्येषां वाचो येभ्यः । वेणुगीतं विना अन्यवाचां श्रवणं नास्तीत्यर्थः । (भाग० १०।२१।१४) ॥८॥

नद्यस्तदा तदुपधार्य मुकुन्दगीत-
मावर्तलक्षितमनोभवभग्नवेगाः ।

1 विहगा मुनयो वनेऽस्मिन् इति शृण्वन्त्यामीलितदृशो इति च स्वामिसम्मतपाठौ ।

आलिङ्गनस्थगितमूर्मिभुजैर्मुरारे-
र्गृह्णन्ति पादयुगलं कमलोपहाराः ॥ ६ ॥

नद्य इति। तत् अद्भुतम्। मनोभवेन कृष्णविषयया रत्या भग्नो वेगो यासां ताः। स च आवर्तेन जलमध्यभ्रमणेन लक्षितः। भगवत्युदितगाढभावत्वात् तत्रैव भ्रमन्त्योऽतः परतो गन्तुं न शक्नुवन्तीत्यर्थः। प्रवाहमध्ये आलिङ्गनेन स्थगितं संवृतं तीरे ऊर्मिभुजैर्गृह्णन्ति। सोऽयमयोग्येष्वपि सरिदादिषु भावसमारोपो रसाभास इत्युच्यते। यदाहुस्तदाभासा अनौचित्यप्रवर्तिता[1] इति। (भाग० १०।२१।१५) ॥६॥

दृष्ट्वातपे व्रजपशून् सह रामगोपैः
सञ्चारयन्तमनुवेणुमुदीरयन्तम्।
प्रेमप्रवृद्ध उदितः कुसुमावलीभिः
सख्युर्व्यधात् स्ववपुषाम्बुद आतपत्रम् ॥ १० ॥

दृष्ट्वेति। प्रवृद्धे आतपे स्वेन वपुषा आतपत्रम्। कुसुमावलीभिश्च प्रेमहर्षं व्यधात्। सख्युः श्रीकृष्णस्य। मेघोदये कुसुमस्त्रंसनस्य तत्कर्तृकतां सम्भाव्येदमुक्तम्। (भाग० १०।२१।१६) ॥१०॥

पुण्याः[2] पुलिन्द्य उरुगायपदाब्जराग-
श्रीकुङ्कुमेन दयितास्तनमण्डितेन।
तद्दर्शनस्मररुजस्तृणरूषितेन
लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ ११॥

पुण्या इति। पुलिन्द्यो भिल्लस्त्रियः। पुण्याः सुकृताधिकाः। उरुगायस्य विष्णोः पदाब्जरागेण चरणलौहित्येन श्रीः शोभा तदात्मकं यत् कुङ्कुमं

1 मम्मटप्रणीतकाव्यप्रकाशे ४।२६। 2 भाग० पूर्णाः

शोभातिशयः । सामानाधिकरण्ये व्यङ्ग्यम् । तथा दयिताया लक्ष्म्याः स्तनाभ्यां मण्डितेन । तृणेषु रूषितेन विच्छुरितेन । तस्य श्रीकृष्णस्य दर्शनेन स्मररुक् कामपीडा यासां तास्तथा । आननेषु कुचेषु च लिम्पन्त्यः लेपनं कुर्वन्त्यः । तदा तस्मिन् श्रीकृष्णे आधिम् अप्राप्तिदुःखम् । लक्ष्मीस्तनाभ्यां भगवत् पादयोः संक्रान्तेन तत्तृणलग्नेन कुङ्कुमेन तदाधिं शमयन्तीत्यर्थः । अतः पुण्याधिकाः । (भाग० १०।२१।१७) ॥११॥

हन्तायमद्रिरबला हरिदासवर्यो
यद्रामकृष्णचरणस्परशप्रमोदः ।
मानं तनोति सह गोगणयोस्तयोर्यत्
पानीयसूयवसकन्दरकन्दमूलैः ॥ १२ ॥

हन्तेति । हन्त अबलाः । अयं गोवर्धनः । यद् यस्मात् रामकृष्णचरणस्य स्पर्शेन तृणाङ्कुरोद्गमव्याजात् रोमहर्षो यस्य स तथा । मानं पूजाम् । सू सुष्ठु । यवसं तृणम् । कन्दरो दरी । (भाग० १०।२१।१८) ॥१२॥

गा गोपकैरनुवनं नयतोरुदार-
वेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ।
अस्पन्दनं गतिमतां पुलकस्तरूणां
निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ १३ ॥

गा इति । कलानि मधुराणि पदानि येषु वेणुस्वनेषु तैस्तनुभृत्सु मध्ये गतिमताम् अस्पन्दनम् अकिञ्चिच्चलनम् । अगतिमतां तरूणां तु पुलक इति चित्रम् । येन दोहकेन दोहनकाले गावः पश्चात्पादयोर्नियम्यन्ते स निर्योगपाशः । तेन कृतं तल्लक्षणं चिह्नं किणरूपं ययोस्तौ तथा । (भाग०, १०।२१।१९) ॥१३॥

एवंविधा भगवतो या वृन्दावनचारिणः ।
वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ १४ ॥

पूर्वानुरागेण भजतः फलमाह ' एवमिति । अयञ्च पूर्वानुराग एव अद्यापि तासां भगवता साकम् अङ्गसङ्गाभावात् । स हि दर्शितोऽष्टाविंशेऽध्याये । अत एवात्र

तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् ।
काश्चित् परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥[1]

इत्युक्तम् । गोप्यो मिथः । (भाग० १०।२१।२०) ॥१४॥

अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ १५ ॥

पारवश्यहेतुकमाह ' अन्तर्गृहेति । अलब्धो विनिर्गमो याभिः । तद्भावना भर्तृभावना । (भाग० १०।२९।९) ॥१५॥

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ।
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥१६॥

बलवद्ध्यानाच्च तासां मुक्तिरासीदित्याह ' दुःसहेति । दुःसहेन प्रेष्ठस्य विरहेण यस्तीव्रतापो दुःखं तेन धुतं क्षीणम् अशुभं पापं यासां तास्तथा । ध्याने प्राप्तो योऽच्युताश्लेषस्तेन या निर्वृतिः सुखं तेन क्षीणं मङ्गलं पुण्यं यासां तास्तथा । पुण्यपापक्षये हि कैवल्यम् । तत्र सुखोपभोगेन पुण्यक्षयः । (भाग० १०।२९।१०) ॥१६॥

तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥१७॥

तमिति । तं कृष्णमेव । जार उपपतिः । ताः सङ्गताः प्राप्ताः । ताद्रूप्यमापन्ना इत्यर्थः । गुणमयं लिङ्गदेहम् । बन्धनं पुण्यापुण्यम् । शुकः । (भाग० १०।२९।११) ॥१७॥

1 भागवते १०।२१।२ श्लोकः ।

गत्यानुरागस्मितविभ्रमेक्षितै-
र्मनोरमालापविहारविभ्रमैः ।
आक्षिप्तचित्ताः प्रमदा रमापते-
स्ता स्ता विचेष्टा जगृहुस्तदात्मिकाः ॥१८॥

अथ मानविप्रलम्भः । स च प्रणयेर्ष्याभ्यां द्वेधा । अत्र प्रेमपूर्वको वशीकारः प्रणयः । तद्भङ्गे मानः । स च स्त्रियाः पुंस उभयोर्वा । तत्र भेदान्तराणि स्वयमूह्यानि । पुंविषयन्तु प्रणयमानमत्राह । गत्येत्यादि । अनुरागेण यत् स्मितं विभ्रमेक्षितानि चञ्चलावलोकनानि । आलापो गोष्ठी । विहारो जलक्रीडादिः । विभ्रमः श्रृङ्गारचेष्टा । तैराक्षिप्तम् आकृष्टम् । (भाग० १०।३०।२) ॥१८॥

गतिस्मितप्रेक्षणभाषणादिषु
प्रियाः प्रियस्य प्रतिरूढमूर्तयः ।
असावहन्त्वित्यबलास्तदात्मिका
न्यवेदिषुः कृष्णविहारविभ्रमाः ॥१९॥

गतीति । गत्यादिषु प्रियस्य प्रतिरूढा अनुकृता मूर्तिर्याभिस्ताः । हे अबलाः । असौ कृष्णोऽहमिति न्यवेदिषुः परस्परं निवेदयामासुरित्यर्थः । यतः कृष्णविहारे विभ्रमो यासां तास्तथा । चित्तवृत्त्यनवस्थानं श्रृङ्गाराद्विभ्रमो मतः । (१०।३०।३) ॥१९॥

गायन्त्य उच्चैरमुमेव संहता
विचिक्युरुन्मत्तकवद्वनाद्वनम् ।
पप्रच्छुराकाशवदन्तरं बहि-
र्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥२०॥

विभ्रममेवाह । गायन्त्य इति । अमुं कृष्णम् । संहता मिलिताः । वनाद्वनं वने वने । विचिक्युः अन्वेषयामासुः । अन्तरमन्तः । शुकः । (भाग० १०।३०।४) ॥२०॥

जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावका-
स्त्वयि धृतासवस्त्वां विचिन्वते ॥२१॥

उन्मत्तवदित्युक्तम् । तमेव विचित्रप्रलापादिहेतुमुन्मादं प्रपञ्चयति ' जयतीति । एषु श्लोकेषु च कुतूहलदृष्टिना वर्णनिर्वाहचित्रं दर्शितम् । तत्राद्य-वृत्ते प्रथमपादयोर्द्वितीयमक्षरं यकारः । ते जन्मनाऽधिकं जयति । हि यस्मात् । इन्दिरा लक्ष्मीः । प्रागत्र लक्ष्म्या विरलः प्रचारः ' त्वज्जन्मनः प्रभृति त्वधिक इत्यर्थः । एवं प्रशस्य स्वगतं विज्ञापयति ' दयितेति । दृश्यतां त्वया । तावकाः तावकीनाः । त्वयि धृतासव इत्यनेन त्वद्विचर्यावधिकं प्राण-धारणमित्युक्तम् । (भाग० १०।३१।१) ॥२१॥

शरदुदाशये साधुजातसत्-
सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका
वरद निघ्नतो नेह किं वधः ॥२२॥

शरदि उदाशयो जलाधारः । तस्मिन् साधुजातं यत् सत् प्रशस्तं सरसिजं तस्य उदरश्रियं गर्भशोभां मुष्णाति अपहरति या दृक् तया । सुरतनाथ सम्भोगस्वामिन् ! दृष्ट्यैव सम्भोगदासीत्यर्थः । अशुल्कदासिकाः निर्मूल्यदासीः । अस्मान्निघ्नतस्तादृग् दानाभावादित्यर्थः । वध इति वधजन्यं पापम् ' तत्साधनत्वात्तच्छब्दः आयुर्घृतमितिवत् । अत्र पादचतुस्केऽपि द्वितीय-मक्षरं रेफः । (भाग० १०।३१।२) ॥२२॥

विषजलाप्ययाद् व्यालराक्षसाद्
वर्षमारुताद् वैद्युतानलात् ।
वृषमयात्मजाद् विश्वतो भयाद्
ऋषभ ते वयं रक्षिता मुहुः ॥२३॥

सदा त्वातुराकस्मिकमुपेक्षणं तव नोचितमित्याहुः । विषेति । विषरूपात् कालिन्दीजलाद् योऽप्ययो नाशः । व्यालः अघासुरः । राक्षसः प्रलम्बः । वर्षात् इन्द्रकोपात् संवर्तकोपद्रवः । मारुतो वात्यारूपस्तृणावर्तः । वैद्युतोऽनलः अग्न्युत्पातः । वृषोऽरिष्टः । मयात्मजो व्योमः । किं बहुना विश्वतः सर्वस्माद् भयाद् भयहेतोः । हे ऋषभ सर्वश्रेष्ठ ! ते त्वया । अत्र पादत्रये प्रथमं वकारः । द्वितीयं षकारश्चतुर्थेऽपि । (भाग० १०।३१।३) ॥२३॥

न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥२४॥

ननु सर्वेषामस्माकं तुल्यत्वात् कः कं रक्षतीति चेत्तत्राहुः । न खल्विति । अखिलदेहिनामन्तरात्मनो जीवान् पश्यतीति तथा परमात्मा इत्यर्थः । विखनसा ब्रह्मणा । उदेयिवान् उदितोऽसि । सात्वतां यदूनाम् । अत्र पादचतुष्केऽपि द्वितीयो वर्णः खकारः । पालकत्वाद् अस्मानपि पाहीत्यर्थः । (भाग० १०।३१।४) ॥२४॥

विरचिताभयं वृष्णिधुर्य ते
चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्तकामदं
शिरसि धेहि नः श्रीकरग्रहम् ॥२५॥

विरचितेति । संसारभयात्त्वच्चरणं प्राप्तानां कृताभयं करकमलं नः शिरसि धेहि । श्रियाः करं गृह्णातीति तत्तथा । अत्र पादचतुष्केऽपि द्वितीयो रेफः । (भाग० १०।३१।५) ॥२५॥

व्रजजनार्तिहन् वीर योषितां
निजजनस्मयध्वंसनस्मित: ।

भज सखे भवत्किङ्करीः स्म नो
जलरुहाननं चारु दर्शय ॥२६॥

व्रजेति। भो वीर! योषितां मध्ये ये निजजनास्त्वत्परिग्रहाः स्त्रियस्तेषां स्मयः प्राणप्रिया वयमिति दर्पः, तस्य ध्वंसनं स्मितं यस्य, स तथा। भवत्किङ्करीरस्मान् भज। अत्र पादचतुष्केऽपि द्वितीयो जकारः। (भाग० १०।३१।६) ॥२६॥

प्रणतदेहिनां पापकर्षणं
तृणचरानुगं श्रीनिकेतनम्।
फणिफणार्पितं ते पदाम्बुजं
कृणु कुचेषु नः कृन्धि हृच्छयम् ॥२७॥

प्रणतेति। तृणचरा गावः। निकेतनमाश्रयः। फणी शेषः कालीयश्च। कृणु कुरु अर्पय। कृन्धि छिन्धि। हृच्छयं कामम्। अत्र द्वितीयो णकारः। (भाग० १०।३१।७) ॥२७॥

मधुरया गिरा वल्गुवाक्यया
बुधमनोज्ञया पुष्करेक्षण।
विधिकरीरिमा वीर मुह्यती-
रधरसीधुनाप्याययस्व नः ॥२८॥

मधुरयेति। वल्गूनि वाक्यानि यस्याम्। बुधमनोज्ञया विदग्धहृदयहारिण्या। विधिकरीः आज्ञाकरीः। न भवतीभ्यो ममान्या प्रियतमास्ति इत्येवंरूपया मृषा वाचा विमोहिता इत्यर्थः। अधरसीधुना अधरामृतेन। अत्र धकारो द्वितीयः। (भाग० १०।३१।८) ॥२८॥

तव कथामृतं तप्तजीवनं
कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं
भुवि गृणन्ति ते भूरिदा जनाः ॥२९॥

तवेति । आततं बहु । भूरिदाः स्थूलदातारः । ते गृणन्ति । अत्र द्वितीयो वकारः । पादचतुष्कस्य दलद्वये च क्रमात् तकार-ककार-शकार-भकाराः । (भाग० १०।३१।६) ।।२६।। ।

प्रहसितं प्रियप्रेमवीक्षितं[1]
विहरणञ्च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः
कुहक नो मनः क्षोभयन्ति हि ।।३०।।

प्रहसितेति । ध्यानमङ्गलं चिन्त्यमानं सुखावहमित्यर्थः । रहसि संविदः एकान्ते प्रतिश्रुतानि । हृदिस्पृशो हृदयङ्गमाः । कुहक कपटिन् । अन्यथोक्तमन्यथा करोतीति कुहकत्वम् । अत्र हकारो द्वितीयः । (भाग० १०।३१।१०) ।।३०।।

चलसि यद् व्रजाच्चारयन् पशून्
नलिनसुन्दरं नाथ ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः
कलिलतां मनः कान्त गच्छति ।।३१।।

चलसीति । नलिनसुन्दरं कमलवत् कोमलम् । शिलैः कणिशखण्डैः । कलिलताम् अधैर्यम् । अत्र लकारो द्वितीयः । (भाग० १०।३१।११) ।।३१।।

दिनपरिक्षये नीलकुन्तलै-
र्वनरुहाननं बिभ्रदावृतम् ।
धनरजस्वलं दर्शयन् मुहु-
र्मनसि नः स्मरं वीर यच्छसि ।।३२।।

दिनेति । कुन्तलैरावृतम् । धनरजो बिभ्रत् स्वलं सुष्ठु भूषणम् । कीदृशं वनरुहाननं कमलवन्मुखं दर्शयन् स्मरं यच्छसि । धनं गोधनम् । भामादिवत् पूर्वपदलोपः । अत्र नकारो द्वितीयः । (भाग० १०।३१।१२) ।।३२।।

---

1 क्वचित् भागवते वीक्षणम् ।

प्रणतकामदं पद्मजार्चितं
धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमञ्च ते
रमण नः स्तनेष्वर्पयाधिहन् ॥३३॥

प्रणतेति । पद्मजो ब्रह्मा लक्ष्मीर्वा । पद्मजेत्यत्र जनसनेति विट्[1] । विड्वनोरिति[2] आत्वम् । शन्तमं सुखतमम् । तेन त्वदीयानामस्माकम् । अत्राद्यपादयोर्दलद्वये क्रमात् पकारधकारौ अन्त्ययोस्तृतीयवर्णो णकारः । (भाग० १०।३१।१३) ॥३३॥

सुरतवर्धनं शोकनाशनं
स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां
वितर वीर नस्तेऽधरामृतम् ॥३४॥

सुरतेति । स्वरितः षड्जादिस्वरयुक्तः । इतररागा अधरामृतादन्येऽभिलाषाः । अत्र पूर्वार्धे द्वितीयो रेफः । उत्तरार्धे तृतीयः । (भाग० १०।३१।१४) ॥३४॥

अटति यद्भवानह्वि काननं
त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखञ्च ते
जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥३५॥

यद् यदा । त्रुटिः त्रसरेणुत्रयोपलक्षितः कालः । अपश्यताम् अस्मदादीनाम् । उदीक्षताम् [पुनरुदीक्षमाणानामपि] । पक्ष्मकृद् निमेषकर्ता । जडो नीरसत्वात । अत्र प्रथमपादद्वये आद्यदलयोरकारः । अन्त्ययोस्तकारः । पादचतुष्के द्वितीयमक्षरं टवर्गः । (भाग० १०।३१।१५) ॥३५॥

---

1 पाणिनिः ३।२।६७   2 पाणिनिः ६।४।४१

पतिसुतान्वयभ्रातृबान्धवा-
नतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः
कितव योषितः कस्त्यजेन्निशि ॥३६॥

पतीति । अन्वयः कुलम् । अतिविलङ्घ्य अतिक्रम्य । ते अन्ति तव समीपम् । गतयो गानभेदाः । हे कितव धूर्त ! अत्र द्वितीयस्तकारः । (भाग० १०।३१।१६) ॥३६॥

व्रजवनौकसां व्यक्तिरङ्ग ते
वृजिनहन्त्र्यलं विश्वमङ्गलम् ।
त्यज मनाक् च नस्त्वत्स्पृहात्मनां ।
स्वजनहृद्रुजां यन्निषूदनम् ॥३७॥

व्रजेति । व्यक्तिः शरीरम् । वृजिनहन्त्री दुःखशमनी । त्वत्स्पृहाया-मात्मनो यासां तास्तथा । स्वजनहृद्रुजां हृदयरोगाणां निषूदनं शमकं यत् आलिङ्गनादि तद् मनाग् अल्पमपि त्यज मुञ्च देहीत्यर्थः । स्वजनविशेषणेन त्वदधीनं हृदयरोगशमनमित्युक्तम् । अत्राद्यपादयोर्दलद्वय आदिर्वकारः । अन्त्य-पादयोर्जकारो द्वितीयः । जयतीत्यत आरभ्य एतत्पर्यन्तम् एकादशाक्षराया जातेः षट्शतोत्तरचतुःषष्ठिभेदः । (भाग० १०।३१।१८) ॥३७॥

रहसि संविदं हृच्छयोदयं
प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरःश्रियो वीक्ष्य धाम ते
मुहुरतिस्पृहा मुह्यते मनः ॥३८॥

रहसीति । स्पष्टम् । हृच्छयस्योदय उत्पत्तिर्यस्मात् प्रहसिताननात् । अतिस्पृहया । अत्र द्वितीयो हकारः । (भाग० १०।३१।१७) ॥३८॥

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।

तेनाटवीं नयसि[1] तद्व्यथते न किं स्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥३९॥

यदिति। यत्ते सुजातमतिकोमलम्। भीताः कर्कशस्तनस्पर्शात् मास्य सौकुमार्यं भाङ्क्षीदिति भयम्। तेन चरणाम्बुरुहेण। अटवीम् अरण्यम्। यद् यदा। नयसि गच्छसि। नयोपगताविति यकारान्तोऽप्यस्ति। यत्तदोर्नित्यसम्बन्धात्' तदास्माकं बुद्धिर्भ्रमति। किमिति' कूर्पादिभिः सूक्ष्मोपलादिभिः किं स्विन्न व्यथते। किं स्विदिति वितर्के। भवान् आयुर्यासां तास्तथा। गोप्यः श्रीकृष्णम्। (भाग० १०।३१।१९) ॥३९॥

वामबाहुकृतवामकपोलो
वल्गितभ्रूरधरार्पितवेणुम्।
कोमलाङ्गुलिभिराश्रितमार्गं
गोप्य ईरयति यत्र मुकुन्दः ॥४०॥

अथ द्वाविंशत्या श्लोकैः प्रवासमाह' वामबाहुरिति। अत्र चैकादशयुगलानां प्राग्वच्च वर्णत्रिवर्गनिर्वाहः। प्रवासत्वे तु

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः।
कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान्[2] ॥

इति गमकम्। इदं चरणभ्रमणैर्लक्षितं स्वागताख्यं छन्दः। वामबाहौ कृतो निहितो वामः कपोलो येन। वल्गिते किञ्चिदुच्चलिते भ्रुवौ यस्य स तथा। कोमलाभिरङ्गुलिभिराश्रिताः स्पृष्टा मार्गाः षड्जादिस्वरव्यञ्जकानि स्थानानि यस्मिन् वेणौ तम्। यत्र यदा। ईरयति वादयति। हे गोप्यः। अत्राद्यपादयोर्विकार आदिः कृत इति चित्रम्। (भाग० १०।३५।२) ॥४०॥

व्योमयानवनिताः सहसिद्धै-
र्विस्मितास्तदुपधार्य सलज्जाः।

---

1 तेनाटवीमटसीति स्वामिसम्मत पाठः। 2 भागवतं १०।३५।१ श्लोकः।

काममार्गणसमर्पितचित्ताः
कश्मलं ययुरपस्मृतनीव्यः ॥४१॥

व्योमेति । तदा व्योमयानवनिताः खेचरस्त्रियः । तद्वेणुवादनम् । कामस्य मार्गणाः सम्मोहनादयः पञ्च शरास्तेषु समर्पितं तद्वशीभूतं चित्तं यासाम् । कश्मलं मोहः । अपस्मृता शिथिलीभूता नीवी यासां ताः । अत एव वेणुगीतोद्दीपितस्वभावस्य नीवीश्लथत्वेन प्रकटितत्वात् सलज्जाः । अत्राद्ययोर्वकारः। अन्त्ययोः ककारः । (भाग० १०।३५।३) ॥४१॥

हन्त चित्रमबलाः शृणुतेदं
हारहास उरसिस्थिरविद्युत् ।
नन्दसूनुरयमार्तजनानां
नर्मदो यर्हि कूजितवेणुः ॥४२॥

हन्तेति । हन्त चित्रम् । हे अबलाः ! हारवद् विशदो हासो यस्य । विशदा द्युत् द्युतिर्यस्याः सा विद्युल्लक्ष्मीः उरसि स्थिता यस्य । अ-मूर्ध-मस्तकात् स्वाङ्गादकामे [1]इत्यलुक् । नर्म कौतुकम् । यर्हि यदा । कूजितवेणुः वेणुं कूजयति । अत्राद्ययोर्हकारः । अन्त्ययोर्नकारः । (भाग० १०।३५।४) ॥४२॥

वृन्दशो व्रजवृषा मृगगावो
वेणुवाद्यहृतचेतस आरात् ।
दन्तदष्टकवला धृतकर्णा
निद्रिता लिखितचित्रमिवासन् ॥४३॥

वृन्दश इति । वाद्यं वादनम् । भावे कृत्यः । आराद् निकटे । दन्तैर्दष्टा न तु निगीर्णाः कवला यैः । धृतकर्णा वेणुगीते दत्तावधानाः । निद्रिता इति तारकादित्वादितच्[2] । निद्रितानामपि किञ्चिच्चलनमुपलभ्यते । अत्र तु

1 पाणिनिः ६।३।१२ ।　　　2 पाणिनिः ५।२।३६ ।

तदपि नास्तीति वक्तुमुपमान्तरं लिखितग्रहणम्। स्मितं भ्रमनिवृत्त्यर्थम्। अलाद्ययोर्वैकारः। (भाग० १०।३५।५) ॥४३॥

बर्हिणस्तवकधातुपलाशै-
र्बद्धमल्लपरिबर्हविडम्बः।
कर्हिचित् सबल आलि सगोपै-
र्गाः समाह्वयति यत्र मुकुन्दः ॥४४॥

बर्हिण इति। बर्हिणो मयूरा विद्यन्ते स्वामितया येषां तानि बर्हिणानि मयूरपिच्छानि। अर्शआदित्वादच्[1]। स्तवकाः पुष्पगुच्छाः। धातुर्मनः-शिलादि। पलाशं पत्रम्। तैः। बद्धो रचितः मल्लपरिबर्हाणां मल्लोपकरणानां विडम्बोऽनुकारो येन। कर्हिचित् कदाचित्। एवं विचित्रमित्यर्थः। आलि। वयस्यैः। बलो बलभद्रः। अलाद्ययोर्वैकारः। (भाग० १०।३५।६) ॥४४॥

तर्हि भग्नगतयः सरितो वै
तत्पदाम्बुजरजोऽनिलनीतम्।
स्पृहयतीर्वयमिवाबहुपुण्याः
प्रेमवेपितभुजाः स्तिमितापः ॥४५॥

तर्हीति। तर्हि तदानीम्। भग्नगतयः सञ्जातजाड्यसञ्चारिभावत्वात्। तस्य मुकुन्दस्य। अनिलेन दूतीभूतेन नीतं प्रापितम्। वैशब्द उत्प्रेक्षायाम्। निष्कारणा नदीवृत्तिः सकारणत्वेनोत्प्रेक्ष्यते। उत्प्रेक्षायाञ्च भगवतः सरिताञ्च भर्तृत्वपत्नीत्वयोः संव्यवहारमारोप्य व्यङ्ग्यः। स्पृहयतीः स्पृहयन्त्यः। रजः स्पृहयतीरिति द्वितीयानिर्देशो रजस ईप्सिततमत्वविवक्षया। अन्यथा हि स्पृहे-रीप्सित[2] इति सम्प्रदानत्वे चतुर्थ्या भाव्यम्। अबहुपुण्या वयमिवेति। यथा वयं तत्पादरजः स्पृहयामो न तु प्राप्नुमः। अबहुपुण्यत्वात् तथैता इति।

1 पाणिनिः ५।२।१२७ वार्तिकम्। 2 पाणिनिः २।३।१३ वार्तिकम्।

स्पृहामात्रे स्वदृष्टान्तो न त्वप्राप्तौ। नदीभिरपि बहुशः प्राप्तत्वात्। गोपीभिरपि बहुशः प्राप्तत्वेऽपि क्षणं विप्रलम्भासहत्वादप्राप्तबुद्धिः। प्रेम्णा वेपिता विनम्रीभूता भुजोर्मिरूपा यासां ताः। स्तिमिता निश्चलाः। आभ्यां कम्पस्तम्भौ श्रृङ्गारानुभावावुक्तौ। अत्राद्ययोस्तकारः। (भाग० १०।३५।७) ॥४५॥

अनुचरैः समनुवर्णितवीर्य
आदिपूरुष इवाचलभूतिः।
वनचरो गिरितटेषु चरन्ती-
र्वेणुनाह्वयति गाः स यदा हि ॥४६॥

अनुचरैरिति। भूतिरैश्वर्यम्। स कृष्णः। अत्राद्ययोरवर्णः' अन्त्ययोर्वः। (भाव: १०।३५।८) ॥४६॥

वनलतास्तरव आत्मनि विष्णुं
व्यञ्जयन्त्य इव पुष्पफलाढ्याः।
प्रणतभारविटपा मधुधाराः
प्रेमहृष्टतनवो ववृषुः स्म ॥४७॥

चिरमनुशीलनपराणां स्वस्मिन् अभिव्यक्तिमाह' वनलतेति। भारेण प्रणताः प्रणतभारास्ते विटपा येषाम्। मधुधाराः क्षीरधाराः। मिषादानन्दाश्रूणीत्यर्थः। हृष्टतनव उद्भिन्नत्वच्कत्वात्। अत्राद्ययोर्वकारः। (भाग० १०।३५।९) ॥४७॥

दर्शनीयतिलको वनमाला-
दिव्यगन्धतुलसीमधुमत्तैः।
अलिकुलैरलघु गीतमभीष्ट-
माद्रियन् यर्हि सन्धितवेणुः ॥४८॥

दर्शनीयेति। वनमालायां या दिव्यगन्धा तुलसी तस्या मधुना परिमलेन मत्तैर्भ्रमरैः। अलघु दीर्घं यद् गीतम् तद् आद्रियन् तस्यादरं कुर्वन्। यर्हि यदा' सन्धितः अधरेण कृतसन्धानो वेणुर्येन स तथा। अत्राद्ययोर्दः। (भाग० १०।३५।१०) ॥४८॥

सरसि सारसहंसविहङ्गा-
श्चारुगीतहृतचेतस [1]आरात् ।
हरिमुपासत ते यतचित्ता
हन्त मीलितदृशो धृतमौनाः ॥४६॥

सरसीति । हन्त हे सखि ! अन्त्ययोर्हः । (भाग० १०।३५।११) ॥४६॥

सहबलः स्रगवतंसविलासः
सानुषु क्षितिभृतो व्रजदेव्यः ।
हर्षयन् यर्हि वेणुरवेण
जातहर्ष उपरम्भति विश्वम् ॥५०॥

सहेति । स्रगवतंसाभ्यां मालाकर्णपूराभ्यां विलासः शोभा यस्य स तथा । हे व्रजदेव्यः । वेणुरवेण विश्वं हर्षयन् जातहर्षो यर्हि स्वयमुपरम्भति आनन्देन स्वयं शब्दं करोति । आद्ययोः सः । (भाग० १०।३५।१२) ॥५०॥

महदतिक्रमणशङ्कितचेता
मन्दमन्दमनु गर्जति मेघः ।
सुहृदमभ्यवर्षत् सुमनोभि-
श्छायया च विदधत्प्रतपत्रम् ॥५१॥

महदिति । महच्छब्देनास्य शब्दस्तिरस्कृतो मा भूत् इति शङ्का । अतो मन्दं मन्दं गर्जति । अनु तच्छब्दितानन्तरम् । सुहृदं कृष्णम् । सुमनोभिः पुष्पैः । प्रतपत्रम् छत्रं । आद्ययोर्मः । (भाग० १०।३५।१३) ॥५१॥

विविधगोपचरणेषु विदग्धो
वेणुवाद्य उरुधा निजशिक्षाः ।
तव सुतः सति यदाधरबिम्बे
दत्तवेणुरनयत् स्वरजातीः ॥५२॥

---

1 भाग० एत्य

विविधेति । चरणं चर्या क्रीडेत्यर्थः । वाद्यं वादनम् । उरुधा बहुधा । हे सति यशोदे ! तव सुतो यदा स्वरजातीः षड्जादिप्रभेदाननयद् उद्भावितवान् । निजा स्वप्रज्ञोत्प्रेक्षिता शिक्षा संप्रदायो यासु स्वरजातिषु । आद्ययोर्वः । (भाग० १०।३५।१४) ॥५२॥

सवनशस्तदुपधार्य सुरेशाः
शक्रशर्वपरमेष्ठिपुरोगाः ।
कवय आनतकन्धरचित्ताः
कश्मलं ययुरनिश्चिततत्त्वाः ॥५३॥

सवनश इति । उपधार्य अनुसन्दधत् । तत्तथाविधं गीतम् । शर्वो रुद्रः । आनता कन्धरा चित्तञ्च येषाम् । चित्तपूर्वकं प्रणेमुरित्यर्थः । कश्मलं मोहः । कस्य स्वरस्यायं प्रभेदो गीयत इति निश्चयाभावान्मोहः । अन्त्ययोः कः । (भाग० १०।३५।१५) ॥५३॥

निजपदाब्जदलैर्ध्वजवज्र-
नीरजाङ्कुशविचित्रललामैः ।
व्रजभुवः शमयन् खुरतोदं
वर्ष्मधुर्यगतिरीरितवेणुः ॥५४॥

निजेति । दलैरवयवैः । नीरजं पद्मम् । ध्वजादयो विचित्राणि ललामानि चिह्नानि येषाम् । खुरतोदं खुरव्यथाम् । वर्ष्मणा देहेन । धुर्यः श्रेष्ठो गज इति यावत् तद्वद्गतिर्यस्य स तथा । आद्ययोर्नः । अन्त्ययोर्वः । (भाग० १०।३५।१६) ॥५४॥

व्रजति तेन वयं सविलास-
वीक्षणार्पितमनोभववेगाः ।

कुजगतिङ्गमिता न विदामः

कश्मलेन कबरं वसनं वा ॥५५॥

व्रजतीति । यद् व्रजति तेनेत्यर्थः । सविलासं सशोभं यद्वीक्षणम् तेनार्पितो मनोभववेगो यासाम् । कुजगतिं गमिताः द्रुमवज्जडीभूताः । कबरं केशपाशम् । आद्ययोर्वः । अन्त्ययोः कः । (भाग० १०।३५।१७) ॥५५॥

मणिधरः क्वचिदागणयन् गा

मालया दयितगन्धतुलस्याः ।

प्रणयिनोऽनुचरस्य कदांसे

प्रक्षिपन् भुजमगायत यत्र ॥५६॥

मणीति । मणयः काचघटितादयः । दयितो गन्धो यस्यास्तुलस्याः । तस्या मालया विशिष्टः । प्रणयिनः प्रियस्य । कदा कर्ह्यपि । आद्ययोर्मः । अन्त्ययोः प्रशब्दः । (भाग० १०।३५।१८) ॥५६॥

क्वणितवेणुरववञ्चितचित्ताः

कृष्णमन्वसत कृष्णगृहिण्यः ।

गुणगणार्णमनुगत्य हरिण्यो

गोपिका इव विमुक्तगृहाशाः ॥५७॥

क्वणितेति । कृष्णं अन्वसत अनुगता आसन् । कृष्णस्य मृगस्य हरेश्च गृहिण्यः । गुणगणस्य अर्णमर्णवम् । गोपिका इव हरिण्यो विरहपाण्डुराः । आद्ययोः कः । अन्त्ययोर्गः । (भाग० १०।३५।१९) ॥५७॥

कुन्ददामकृतकौतुकवेषो

गोपगोधनवृतो यमुनायाम् ।

नन्दसूनुरनघे तव वत्सो
नर्मदः प्रणयिनां विजहार ॥५८॥
मन्दवायुरुपवात्यनुकूलं
मानयन् मलयजस्पर्शेन ।
वन्दिनस्तमुपदेवगणा ये
वाद्यगीतबलिभिः परिवव्रुः ॥५९॥

कुन्देति । दाम माला । हे अनवद्ये यशोदे ! यदा विजहार तदा मलयजस्य चन्दनस्य स्पर्शेन विशिष्टो वायुरुप समीपे वाति । उपदेवा विद्याधरादयः । वाद्यादिभिर्विशिष्टाः । प्रथमे अन्त्ययोर्नकारः । द्वितीये आद्ययोर्मः । अन्त्ययोर्वयोरैक्याद्वः । (भाग० १०।३५।२०'२१) ॥५८'५९॥

वत्सलो व्रजगवां यदगध्रो
वन्द्यमानचरणः पथि वृद्धैः ।
कृत्स्नगोधनमुपोह्य दिनान्ते
गीतवेणुरनुगेडितकीर्तिः ॥६०॥
उत्सवं श्रमरुचापि दृशीना
मुन्नयन् खुररजश्छुरितस्रक् ।
दित्सयैति सुहृदाशिष एष
देवकी जठरभूरुडुराजः ॥६१॥

वत्सल इति । यत् यदा एष सुहृद् आशिषो दित्सया एति तदा खुररजसा छुरितस्रग् भवति । अगो गोवर्धनः । उपोह्य निवर्त्य । श्रमरुचा श्रमशोभयाऽपि दृशीनाम् उत्सवम् उन्नयन् प्रापयन् । उडुराजश्चन्द्रमाः । प्रथम आद्ययोर्वः द्वितीय आद्ययोरुकारः । अन्त्ययोर्दः ।

मदविघूर्णितेति श्लोकद्वयं बलभद्रविषयत्वादत्र नोक्तम् । गोप्यो मिथः । (भाग० १०।३५।२२'२३) ॥६०'६१॥

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥६२॥

एवमल्पव्यवधानं प्रवासमुक्त्वा बहुव्यवधानमाह ' मधुप कितवेति । हे मधुप ! कितवबन्धो धूर्तसम्बन्धिन् 'नः अङ्घ्रिं' सपत्न्याः कुचयोर्विलुलितं संयोगविमर्दात् प्रभ्रष्टं मालाया यत् कुङ्कुमं तद्रक्तैः श्मश्रुभिर्मा स्पृश । रतिव्यतिकरे सपत्नीस्तनकुङ्कुमरञ्जितायामुपवेशाद् भ्रमरस्य शोणश्मश्रुतां सम्भाव्येदमुच्यते । मधुपतिः कृष्णः' तस्य मानिनीनां माथुरीणाम् । तन्मानिनीनामिति सोत्प्रासम् । विडम्ब्यम् उपालम्भनीयम् । स्त्रैणत्वप्रकाशनाद् ईदृक् कुचकुङ्कुमेन श्लाघ्यमानत्वाद् निर्लज्जास्पदत्वेन मधुपतिरप्येवंविध इत्युक्तम् । अत एव मधुपत्वं तस्य च कितवत्वम् । प्रायेण हि मधुपाः कितवाश्च निर्ह्रीका भवन्ति । (भाग० १०।४७।१२) ॥६२॥

सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथन्तत् पादपद्मं नु पद्मा
अपि बत हृतचेता ह्युत्तमःश्लोकजल्पैः ॥६३॥

कितवत्वं बन्धुत्वं चाह ' सकृदित्यादि । सुमनसोऽस्मान् । भवानिव चलप्रकृतिर्दृश्यत इति भवादृक् श्रीकृष्णः । यथा त्वं सुमनसः पुष्पाण्युपभुज्य त्यजसि । तस्य क्षणसौहृदस्य पादपद्मं पद्मा लक्ष्मीः कथं परिचरति । नुशब्दो वितर्के । अपि अहो । हृतं वञ्चितं चेतः यस्याः । उत्तमःश्लोकस्य जल्पैः विविधैः चाटुकारैः प्रियवाक्यैः भ्रमितचित्ता परिचरतीत्यर्थः । बत इत्यनुकम्पायाम् । (भाग० १०।४७।१३) ॥६३॥

किमिह बहु षडङ्घ्रे गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥६४॥

भ्रमरगुञ्जितं कृष्णगुणगानं मत्वाह ' किमिहेति । हे षडङ्घ्रे भ्रमर ! यदूनामधिपतिमिति लक्षणया तच्चरितमभिमतम् । तत् किं बहु गायसि । यतस्तत् पुराणं जीर्णम् । वयञ्चागृहा एकाकिन्यः । विजयोऽर्जुनः ' तस्य सखा कृष्णः ' तस्य सख्यो मथुरास्त्रियः ' तासामग्रतो गीयताम् । ताश्च तवेष्टं कल्पयन्ति पूरयिष्यन्तीत्यर्थः । वर्तमानसामीप्ये वर्तमानवद् वा[1] भविष्यदर्थे लट् । यतस्ताः क्षपितकुचरुज इष्टाश्च तस्य । न तु वयमित्यर्थः । (भाग० १०।४७।१४) ॥६४॥

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्वयं का
अपि च कृपणपक्षे ह्युत्तमःश्लोकशब्दः ॥६५॥

भो मातः ! मैवं वोचः । त्वामनुस्मृत्यानङ्गविकलस्त्वां प्रसादयितुमादिष्टवानिति' अत आह दिवीति । मामाह्वातुमयमागत इत्यभिप्रेत्याह ' स्वर्गादौ तस्य दुरापा याः स्त्रियस्ताः का न काश्चनापीत्यर्थः । अतः किं मदाह्वानेन । कपटेन रुचिरो हासो भ्रूविजृम्भश्च यस्य । यस्य चरणरजो लक्ष्मीरप्युपास्ते' तस्य वयं काः न काश्चनापीत्यर्थः । अपि चैवंविधस्यापि अस्मासु कृपया युज्यते । यतः उत्तमःश्लोकशब्दः कृपणानां पक्षे सहायभूते पुंसि वर्तते । स च उत्तमःश्लोकत्वादनाथानप्यस्माननुग्रहीष्यतीति भावः । (भाग० १०।४७।१५) ॥६५॥

---

1 पाणिनिः ३।३।१३१ ।

विसृज शिरसि पादं वेद्म्यहं चाटुकारै-
रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ।
स्वकृत इह विसृष्टापत्यपत्यन्यलोकान्
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ॥६६॥

भ्रमरं स्वचरणपतितं मत्वाह ' विसृजेति । अनुनयविदुषः सन्धानप्रकारज्ञस्य । मुकुन्दादागतस्य तव । चाटुकारैः प्रियवाक्योच्चारणैः । शिरसि कृतं मे पादं विसृज । वेद्म्यहं मुकुन्दम् । नु अहो । अस्मिन् मुकुन्दे किं सन्धेयम् । योऽस्मान् व्यसृजत् । स्वकृते कृष्णार्थम् । विसृष्टास्त्यक्ताः । अन्ये गृहादयः । अकृतमकृतज्ञं चेतो यस्य । (भाग० १०।४७।१६) ॥६६॥

मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्त्वावेष्टयद् ध्वाङ्क्षवद् य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥६७॥

अकृतचेतस्त्वमेवाह ' मृगयुरिवेति । मृगयुर्व्याधः । कपीन्द्रो बाली । लुब्धस्वभावः । स्त्रियं सूर्पणखाम् । अकृत कृतवान् । कामयानां कामयमानाम् । बलिं वैरोचनम् । बलिमुपहारं प्रतिग्रहरूपम् । अत्त्वा भक्षयित्वा । अवेष्टयद् बबन्ध । ध्वाङ्क्षवत् काकवत् । तत् तस्मादकृतज्ञत्वात् । असितः श्रीकृष्णः । (भाग० १०।४७।१७) ॥६७॥

यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इह विहङ्गा भिक्षुचर्यां चरन्ति ॥६८॥

नन्वलं चेत् किमिति प्रस्तूयते तत्राह दुस्त्यज इति। दुस्त्यजत्वमेवाह यदनुचरितेति। यस्य अनु अनुकूलाचरितलीलैव कर्णपीयूषं तस्य विप्रुषो विन्दवः तेषां सकृददनेन विधूतास्त्यक्ता द्वन्द्वधर्माः स्त्रीपुरुषाणामाचारा राग-द्वेषादयो वा यैस्ते तथा। विभ्यो पक्षिभ्यः नष्टाः पृथगभूतास्त्यक्तसङ्गा इत्यर्थः। सपदि लीलाकर्णनानन्तरम्। गृहं कुटुम्बञ्च। इह वृन्दावने। भिक्षुचर्यां परमहंस-स्थितिम्। (भाग० १०।४७।१८) ॥६८॥

वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः।
ददृशुरसकृदेतत् तन्नखस्पर्शतीव्र-
स्मररुज उपमन्त्रिन् भण्यतामन्यवार्ता ॥६९॥

ननु पूर्ववृत्तान्तो यथा तथाऽस्तु एतत् सन्धानं न चलतीति चेत्तत्राह वयमिति। वयं सर्वा अपि जिह्मस्य कुटिलस्य कृष्णस्य व्याहृतमुक्तम्। ऋतमिव असत्यमपि सत्यं मन्यमानाः। ददृशुरित्येतस्य विपरिणामाद्ददृशिम। एतत्तस्य विप्रलम्भकत्वम्। यथा कुलिकस्य व्याधस्य कृतं कपटगीतं हरिण्यो वास्तवं मन्यमाना वधेनासत्यं ददृशुः। कृष्णो हरिर्मृगश्च। हे उपमन्त्रिन् प्रलोभक! तस्मादन्यवार्ता क्रियताम्। (भाग० १०।४७।१९) ॥६९॥

प्रियसख पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥७०॥

किञ्चिद् भ्रमणं कृत्वा व्यावृत्तं भ्रमरं भगवत्प्रेषितं मत्वाह प्रियसखेति। हे प्रियसख! प्रेयसा कृष्णेन प्रेषितः सन् किं पुनरागाः आगतोऽसि। किम-नुरन्धे कमनुरोधम् अनुवृत्तिं करोमि किन्ते कामं पूरयामीत्यर्थः। मथुरागमन-

मेव रचयामीति चेत् तत्राह' नयसीति। इह अस्मिन् प्रस्तावे ' दुस्त्यजं द्वन्द्वं माधुरीभिः सह मिथुनीभावो येन तस्य पार्श्वे। तदासक्तत्वेनास्माभिः सह तस्य प्रसङ्गाभावाद् व्यर्थं गमनमिति भावः। न ' कदाचिदेकान्ते त्वयाऽपि सह प्रसङ्गो भविष्यतीति चेत्तत्राह ' सततमिति। हे सौम्य! सोमवत्प्रियदर्शन! सा प्रसिद्धा कं सुखं यथा स्यात् तथाऽस्ते। (भाग० १०।४७।२०) ॥७०॥

अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान् सौम्यबन्धूंश्च गोपान्।
क्वचिदपि स कथा नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥७१॥

मनोगतं पृच्छति अपीति। बत अहो। मधुपुरी मथुरा। आर्यस्य वसुदेवस्य पुत्रः। स क्वचिदपि कस्मिन्नपि प्रसङ्गे कथा वार्ता गृणीते करोतीत्यर्थः। अपीति निपातः सम्बोधने। अधास्यत धास्यति। नुशब्दः प्रश्ने। गोप्यो भ्रमरम्। (भाग० १०।४७।२१) ॥७१॥

पट्टमहिष्यः—

कुररि विलपसि त्वं वीतनिद्रा न शेषे
स्वपिति जगति राज्यामीश्वरो गुप्तबोधः।
वयमिव सखि कच्चिद् गाढनिर्विद्धचेता
नलिननयनहासोदारलीलेक्षितेन ॥७२॥

अथ वैचित्त्ये विप्रलम्भमाह। पट्टमहिष्य इति। कुररीति। हे कुररि न शेषे। जगति स्वपिति शयानेऽपि त्वं वीतनिद्रा यत्तत् किमीश्वरस्त्वत्स्वामी कुररः गुप्तबोधः अदृशीभूतः। वयमिव यथा वयं गुप्तेश्वरत्वाद्वीतनिद्राः। अनेन निद्राच्छेदलक्षणा स्मरदशा उक्ता। महिषीणामीश्वरस्य सन्निहितत्वेऽपि

उन्मादमाहात्म्याद् गुप्तत्वोक्तिः । न ह्यत्र भगवतोऽन्तर्धानादिकमुक्तम् । न शेष इत्यत्र न च्युतोऽच्युत इतिवद् विभाषा न लोपो नञः[1] । क्वचिच्छन्दो हि इष्टसंप्रश्ने । नलिननयनः कृष्णः । निर्विद्धचित्तत्वं वीतनिद्रत्वे कारणान्तरम् । (भाग० १०।६०।१५) ॥७२॥

नेत्रे निमीलयसि नक्तमदृष्टबन्धु-
स्त्वं रोरवीषि करुणं बत चक्रवाकि ।
दास्यङ्गता वयमिवाच्युतपादजुष्टां
किंवा स्रजं स्पृहयसे कबरेण वोढुम् ॥७३॥

नेत्र इति । नक्तं रात्रौ । बन्धुः प्रियतमः । रोरवीषि भृशं शब्दं करोषि । बतेति खेदे । अच्युतस्य पादाभ्यां भक्त्यर्पितत्वाज्जुष्टाम् । वयमिव यथा वयं स्पृहयामः । अनेन सङ्कल्पलक्षणा । (भाग० १०।६०।१६) ॥७३॥

भो भोः सदा निष्टनसे उदन्व-
न्नलब्धनिद्रोऽधिगतप्रजागरः ।
किंवा मुकुन्दापहृतात्मलाञ्छन-[2]
प्राप्तां दशां त्वञ्च गतो दुरत्ययाम् ॥७४॥

भो इति । हे उदन्वन् समुद्र ! निष्टनसे नितरां शब्दायसे । मुकुन्देनापहृतं आकृष्टं यदात्मनो लाञ्छनं समुद्रशायिनी मूर्तिः तेन प्राप्तां दशाङ्गतः । त्वञ्चेति चकारेण वयञ्च । समुद्रशायिन एव पुरुषस्य कृष्णत्वात् । प्रतिसमुद्रं हरिः शेत इति कविसमयाच्च । अत्र निष्टनस इत्यनेन प्रलापलक्षणा । (भाग० १०।६०।१७) ॥७४ ॥

---

1 पाणिनिः ६।३।७३ वार्तिकम् ।

2 भाग० ॰लाञ्छनः ।

त्वं यक्ष्मणा बलवतासि गृहीत इन्दो
क्षीणस्तमो न निजदीधितिभिः क्षिणोषि ।
कच्चिन्मुकुन्दगदितानि यथा वयं त्वं
विस्मृत्य भोः स्थगितगीरुपलक्ष्यसे नः ॥७५॥

त्वमिति । यक्ष्मणा दक्षशापजेन रोगेण । न प्रक्षिणोषि न नाशयसि । यथा वयं विरहजेन यक्ष्मणा क्षीणाः ' तमोऽज्ञानम् ' दीधितिभिः प्रज्ञा-रश्मिभिर्न क्षिणुमः । विस्मृत्य विशेषात् स्मृत्वा स्थगितगीर्निश्चलः । उपलक्ष्यसे दृश्यसे नोऽस्माभिः । अनेन व्याधिलक्षणा । (भाग० १०।९०।१८) ॥७५॥

किंवाचरितमस्माभिर्मलयानिल तेऽप्रियम् ।
गोविन्दापाङ्गनिर्भिन्ने हृदीरयसि नः स्मरम् ॥७६॥

किंवेति । किमप्रियमाचरितं नो हृदि ईरयसि उद्दीपयसि । अनेन मनः-सङ्गलक्षणा । (भाग० १०।९०।१९) ॥७६॥

मेघ श्रीमंस्त्वमसि दयितो यादवेन्द्रस्य नूनं
श्रीवत्साङ्कं वयमिव भवान् ध्यायति प्रेमबद्धः ।
अत्युत्कण्ठः शबलहृदयोऽस्मद्विधो बाष्पधाराः
स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तत्प्रसङ्गः ॥७७॥

मेघेति । शबलं व्याकुलम् । अत्र स्मृतिः । (भाग० १०।९०।२०) ॥७७॥

प्रियरावपदानि भाषसे
मृतसञ्जीविकयानयागिरा ।
करवाणि किमद्य ते प्रियं-
वद मे वल्गितकण्ठ कोकिल ॥७८॥

प्रियेति । प्रियस्य रावपदानि भाषसे । अनया पञ्चमस्वरयुक्तया । वल्गितो वल्गीकृतः । अत्र गुणकीर्तनम् । (भाग० १०।६०।२१) ॥७८॥

न चलसि न वदस्युदारबुद्धे
क्षितिधर चिन्तयसे महान्तमर्थम् ।
अपि बत वसुदेवनन्दनाङ्घ्रिं
वयमिव कामयसे स्तनैर्विधर्तुम् ॥७९॥

नेति । अपि अहो । यथा वयं स्तनैर्विधर्तुं कामयामहे । अत्र लपानाशः । (भाग० १०।६०।२२) ॥७९॥

शुष्यद्ध्रदाः करशिता बत सिन्धुपत्न्यः
सम्प्रत्यपेतकमलश्रिय[1] इष्टभर्तुः ।
यद्वद्वयं मधुपतेः प्रणयावलोक-
मप्राप्य मुष्टहृदयाः पुरुकर्शिताः स्म ॥८०॥

हे सिन्धुपत्न्यो महानद्यः ! आः कष्टम् । यूयं सूर्पस्था भवथ । शुष्यन्तो ह्रदाः हृदयस्थानीयाः प्रदेशा यासां ताः । अपेताः कमलश्रियो सुखायमानपद्मशोभा यासां तास्तथा । वयमप्येवंविधाः । अत्र तनुता । (भाग० १०।६०।२३) ॥८०॥

हंस स्वागतमास्यतां पिब पयो ब्रूह्यङ्ग शौरेः कथां
दूतं त्वां नु विदाम कच्चिदजितः स्वस्त्यास्त उक्तं पुरा ।
किंवा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं
क्षौद्रालापमकामदं[2] श्रियमृते सैवैकनिष्ठा स्त्रियाम् ॥८१॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां विप्रलम्भश्रृङ्गारः ।
इति द्वादशोऽध्यायः ॥१२॥

---

1 ०त्यपास्तकमल० इति क्वचिद्भागवते ।

2 क्षौद्रालापय कामदमिति स्वामिसम्मतः पाठः ।

हंसेति। हे हंस आस्यताम् उपविश्यताम्। शौरेः कृष्णस्य। नु अहो। अजितः कृष्णः। पुरा पूर्वमस्मान् प्रति यदुक्तं तत् किं स्मरति ? तच्च कस्माद्-भजामो वयम्। यतोऽसौ क्षौद्रवद् मधुवन्मधुरालापो न तु कामदः। श्रियमृते सा हि यासां स्त्रीणां मध्ये एकनिष्ठा एकस्मिन्नेव स्थिरीभूता न तु चञ्चलेति सोत्प्रासोक्तिः। अयमर्थः। अचञ्चला अप्यस्मान् उज्झित्वा चञ्चलां श्रियं स भजत इति। अत्रोन्मादः। मह्िष्यः कुर्यादीन्। (भाग० १०।९०।२४) ॥८१॥

अत्र चस्मृति-गुणकीर्तन-व्याधि-प्रलापाश्चतस्रो दशाः काव्यप्रकाशनिष्ठाः[1]। निद्राच्छेदादयस्तु षट् नयनप्रीतिरित्यत्र रतिरहस्यस्था[2] दर्शिता इति ज्ञेयम्। तासां नानामहिषीगतत्वाद् यत्किञ्चित्क्रमादुक्ताः। मृतिलक्षणा त्वन्या स्मरदशास्ति। सा च

इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे।
ध्रियमाणेन माधव्यो लेभिरे वैष्णवीं गतिम्[3] ॥

इत्यनेन मूलग्रन्थेन सूचिताप्यमङ्गलत्वादिह नोक्ता। एकादशश्लोके जलकेलि-प्रसङ्गे मूले यद् दर्शितं[4] तत्र च सन्निहितेऽपि भगवति तदालापसौष्ठवेन तासां वैचित्त्याविर्भावान्नास्य भेदस्य पूर्वानुरागादिष्वन्तर्भावः शक्यो वक्तुम्। तथा च तत्रोक्तम्—

कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः
नर्मक्ष्वेलिपरिष्वङ्गैः स्त्रीणां किल हृता धियः।

---

1 सम्मटीय-काव्यप्रकाशे व्यभिचारिभाववर्णनावसरे स्मृतिव्याध्यादिरेव नामत उल्लेखो दृश्यते।

2 नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः।
उन्मादो मूर्छा मृतिरिति स्मरदशा दशैव स्युः॥
कौक्कोकक्तरतिरहस्यम् १२श-परिः।

3 श्रीमद्भागवतम्। १०।९०।२५।

4 श्रीमद्भागवतम् १०।९०।११।

ऊचुर्मुकुन्दैकधियो गिर उन्मत्तवज्जडम् ।
चिन्तयन्त्योऽरविन्दाक्षं यास्ता[1] मे गदतः शृणु ॥

इति । न चास्मिन्नध्याये भगवतो व्यवधानादिकमुक्तम् । तस्माद्वैचित्त्यरूपं विप्रलम्भस्य भेदान्तरमवश्यमभ्युपेतव्यम् । अयमेवात्र विदग्धबुद्धेराचार्यस्याभिप्रायः ।

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां विप्रलम्भश्रृङ्गारः ।
समाप्तोऽयं द्वादशोऽध्यायः ॥१२॥

———

1 श्रीमद्भागवते (१०।९०।१३-१४) यास्ता इत्यत्र तानीति पाठान्तरम् ।

अथ त्रयोदशोऽध्यायः

विष्णुभक्तानां करुणरसः ।

तत्राऽर्जुनः—

यत्संश्रयाद् द्रुपदगेहमुपागतानां
राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम् ।
तेजो हृतं खलु मया निहतश्च मत्स्यः
सज्जीकृतेन धनुषाधिगता च कृष्णा ॥१॥

एवमष्टभेदं शृङ्गारमुक्त्वा क्रमप्राप्तं करुणमाह । करुणेति । सचेष्टनाशानिष्टसम्प्रयोगविभावो दैवोपालम्भनिःश्वासतानवमुखशोषणस्वरभेदाश्रुपातवैवर्ण्यप्रलयसंस्तम्भकम्पभूलुण्ठनगात्रस्रंसनाक्रन्दनाद्यनुभावो निर्वेदग्लानिचिन्तौत्सुक्यमोहश्रमत्रासविषाददैन्यव्याधिजडतोन्मादापस्मारालस्यमरणप्रभृतिदुःखसमये दुःखमयव्यभिचारीति[1] । तत्रेष्टनाशविभावे करुणरसे अर्जुनोद्धवौ भक्तौ । तत्र प्रथममर्जुनमाह ।

तत्र द्रौपदीस्वयंवरे कृष्णोपकारं स्मरत्यर्जुनः । यत्संश्रयादिति । कृष्णा द्रौपदी । (भाग० १।१५।७) ॥१॥

यत्सन्निधावहमु खाण्डवमग्नयेऽदा-
मिन्द्रञ्च सामरगणं तरसा विजित्य ।
लब्धा सभा मयकृताद्भुतशिल्पमाया
दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते ॥२॥

खाण्डवदाहने राजसूये च कृष्णोपकारं स्मरति । यत्सन्निधाविति । उ अहो युधिष्ठिर । अहम् अदां दत्तवान् । मयेन कृताद्भुता शिल्पमाया यस्यां सभायाम् । (१।१५।८) ॥२॥

पत्न्यास्तवाधिमखक्लृप्तमहाभिषेक-
श्लाघिष्ठचारुकबरं कितवैः सभायाम् ।

---

1 काव्यानुशासने द्वितीयोऽध्यायः (काव्यमाला, ७०, ९१ पृः) द्रष्टव्यः ।

स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या
यस्तत् स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥३॥

पत्न्या इति । अश्वमखं राजसूयमधिकृत्य क्रमो रचितो यो महाभिषेकः तेन श्लाघिष्ठं श्लाघ्यतमं यत् चारुकबरं केशपाशः । कितवैर्दुःशासनादिभिर्विकीर्योन्मुच्य स्पृष्टं पतिताश्रु मुखं यस्याः । तथा पतितं पदयोः । सापेक्षत्वेऽपि समासः । तदानीमेव स्मरणात् पुरः स्थितस्य कृष्णस्य पादयोः । तत्स्त्रियस्तेषां कितवानां स्त्रियः । अकृत कृतवान् । हतैरीशैर्हेतुभूतैर्विमुक्तकेशाः । (भाग० १।१५।१०) ॥३॥

यो नो जुगोप वनमेत्य[1] दुरन्तकृच्छ्राद्-
दुर्वाससोऽरिरचितादयुताग्रभुग् यः ।
शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीं
तृप्ताममंस्त सलिले विनिमग्नसङ्घः ॥४॥

दुर्वाससः शापे कृष्णोपकारं स्मरति । यो नो जुगोपेति । वनवासस्तावत् कृच्छ्रम् । तत्रापि दुर्वाससो दुरन्तं कृच्छ्रम् । तच्चारिणा दुर्योधनेन रचितम् । वनवासस्थान् पाण्डवान् युधिष्ठिरद्रौपदीभोजनानन्तरं याचस्वेति प्रार्थितः । यावद्द्रौपदी न भुङ्क्ते तावदक्षयमन्नमिति हि सूर्येण वरो दत्तः । यो दुर्वासा अयुताग्रभुक् शिष्याणामयुतस्याग्रे भुङ्क्ते । किं कृत्वा कृष्णो जुगोप । शाकान्नशिष्टमुपयुज्य तदानीमेव द्रौपदीस्मरणादागत्य शाकरूपस्यान्नस्य यत् शिष्टं पात्रे लग्नं तत् स्वयम्भुक्त्वा । यतो भोजनाद् दुर्वासास्त्रिलोकीं तृप्ताममंस्त । न केवलमात्मानं सशिष्यं तु सलिले स्नात्वा भोक्तुमागच्छतेति युधिष्ठिरवचनाद् यत्र स्नातुं गतस्तत्र कीदृशो विनिमग्नः शिष्यसहितः आत्मा यस्य स तथा । (भाग० १।१५।११) ॥४॥

यत्तेजसाऽथ भगवान् युधि शूलपाणि-
र्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ।

1 क्वचिद्भागवते वन एत्य ।

अन्येऽपि चाहममुनैव कलेवरेण
प्राप्तो महेन्द्रभवने महदासनार्धम् ॥५॥

दिव्यास्त्रलाभे कृष्णोपकारं स्मरति श्लोकद्वयेन ' यत्तेजसेति ' अन्येऽपि लोकपाला निजान्यस्त्राण्यदुः । अहञ्च महेन्द्रस्यासनार्धं प्राप्तः । (भाग० १।१५।१२) ॥५॥

तत्रैव मे विहरतो भुजदण्डयुग्मं
गाण्डीवलक्षणमरातिवधाय देवाः ।
सेन्द्राः श्रिता यदनुभावितमाजमीढ
तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥६॥

तत्रेति । तत्रैव स्वर्गे । अरातयो निवातकवचनामानो दैत्याः । यदनुभावितं येन कृष्णेन प्रभाववत् कृतं भुजदण्डयुग्मम् ' श्रिताः शरणं जग्मुः । हे आजमीढ ! युधिष्ठिर । तेनेत्यादि सर्ववाक्यशेषः । भूम्ना अपरिच्छिन्नेन वाप्यभिव्यञ्जकं विना न दृश्यत इति मुषितत्वम् । अस्मदादिदेहानां त्वनुमापकत्वम् ' न तु कृष्णदेहवत् प्रत्यक्षत्वापादकत्वम् । (भाग० १।१५।१३) ॥६॥

यद्बान्धवः कुरुबलाब्धिमनन्तपार-
मेको रथेन ततरेऽहमतार्यसत्त्वम् ।
प्रत्याहृतं पुरुधनञ्च मया परेषां
तेजस्पदं मणिमयञ्च हृतं शिरोभ्यः ॥७॥

गोग्रहणे कृष्णोपकारं स्मरति ' यद्बान्धव इति । यद्बान्धवः कृष्णसहायः । अनन्तगाम्भीर्यस्यावधिः पारो विस्तारो यस्य तम् । ततरे तीर्णवान् । अतार्यसत्त्वं हिंस्रगजादिकम् । पुरु बहु धनं परैराहृतं गोधनम् ' परेषां च मणिमयं मुकुटादि धनञ्च हृतम् । तद्धि तेजस्पदं तद्धरणे तेजोहरणात् । (भाग० १।१५।१४) ॥७॥

योभीष्मकर्णगुरुशल्यचमूष्वदभ्र-
राजन्यवर्यरथमण्डलमण्डितासु ।
अग्रेचरो मम विभो रथयूथपाना-
मायुर्मनांसि च दृशा सह ओज आच्छत् ॥८॥

कुरुक्षेत्रयुद्धे कृष्णोपकारं स्मरति यो भीष्मेति श्लोकत्रयेण । दृशा दर्शनेन । आच्छेदाकृष्टवान् । आयुर्मनांसि सह ओजश्च सह । कर्मेन्द्रियाणां बलमोजः । बुद्धीन्द्रियाणां शक्तिर्मनांसि त्वीरयन्तःकरणानि । (भाग० १।१५।१५) ॥८॥

यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्ण-
नप्तृत्रिगर्तशलसैन्धवबाह्लिकाद्यैः ।
अस्त्राण्यमोघमहितानि[1] निरूपितानि
नोपस्पृशुर्नृहरिदासमिवासुराणि ॥९॥

यदिति । यस्य कृष्णस्य दोःषु भुजेषु । प्रणिहितं मां न अस्त्राण्युपस्पृशुः । निरूपितानि प्रेरितानि । अमोघं महितं पूजितं येषां तानि तथा । आसुराण्यस्त्राणि नृहरिदासं प्रह्लादं यथा न स्पृशन्ति स्म । (भाग० १।१५।१६) ॥९॥

सौत्ये वृतः कुमतिनात्मद ईश्वरो मे
यत् पादपद्ममभवाय भजन्ति भव्याः ।
मां श्रान्तवाहमरयो रथिनो भुविष्ठं
न प्राहरन् यदनुभावनिरस्तचित्ताः ॥१०॥

सौत्य इति । सौत्ये सारथित्वे मे मया कुमतिना वृतः । स ईश्वर आत्मानमीश्वरत्वं वृतो ददाति । भजन्ति च भव्या अभवाय यस्य पादपद्मम् ।

1 महिमानीति स्वामिसम्मतः पाठः ।

यस्यानुभावेन निरस्तचित्ता उन्मनीकृता अरयो न प्राहरन्। स सूतः वृतः। आत्मानं निन्दति। (भाग० १।१५।१७) ॥१०॥

नर्माण्युदाररुचिरस्मितशोभितानि
हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति।
संजल्पितानि नरदेव हृदिस्पृशानि
स्मर्तुर्लुठन्ति हृदयं मम माधवस्य ॥११॥

कृष्णेन सहवासं स्मरति श्लोकद्वयेन। नर्माणीति। नर्माणि परिहास-वचांसि। हे पार्थ इत्यादि सम्बोधनपूर्वकं संजल्पितानि उदारवचांसि मम हृदयं लुठन्ति शोकेन इतस्ततः पातयन्ति। (भाग० १।१५।१८) ॥११॥

शय्यासनाटनविकत्थनभोजनादि-
ष्वैक्याद्वयस्य [1]ऋतवानिति विप्रलब्धः।
सख्युः सखेव पितृवत्तनयस्य सर्वं
सेहे महान्महितया कुमतेरघं मे ॥१२॥

यस्येति। विकत्थनं कलाकौशलदर्शनम्। ऐक्यादविनाभावात्। हे वयस्य! ऋतवांस्त्वं सत्ययुक्तस्त्वमिति लक्षणामूलात्यन्ततिरस्कृताविवक्षित-वाच्येन ध्वनिना विप्रलब्ध उपहसितः कृष्णो मे अघं अपराधं सेहे। महान् महितया महत्त्वातिशयेन हि महत्त्वम्। (भाग० १।१५।१९) ॥१२॥

सोऽहं नृपेन्द्र रहितः पुरुषोत्तमेन
सख्या प्रियेन सुहृदा हृदयेन शून्यः।
अध्वन्युरुक्रमपरिग्रहमङ्ग रक्षन्
गोपैरसद्भिरबलेव विनिर्जितोऽस्मि ॥१३॥

---

1 ऋभुमान् ऋतमानिति स्वामिधृतौ पाठौ।

कृष्णवियोगफलं कथयति । सोऽहमिति द्वयेन । सख्यमुपकारेण । प्रियत्वं निरुपधिप्रेमास्पदत्वेन । सुहृत्त्वं प्रत्युपकारानपेक्षमुपकर्तृत्वेन । उरुक्रमपरिग्रहं कृष्णवल्लभाः । (१।१५।२०) ॥१३॥

तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति ।
सर्वं क्षणेन तदभूदसदीशरिक्तं
भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम् ॥१४॥

तदिति । यतो धनुरादेः । असत् अप्रयोजकम् । ईशेन रिक्तं हीनम् । यथा ऊष्यामूषरभूम्यामुप्तम् । कुहकेन कपटेन राद्धं प्राप्तम् । तदिव । भस्मनि हुतम् एतद्यथा । अत्यन्तमप्रयोजकमिदमित्यर्थः । अर्जुनो युधिष्ठिरम् । (भाग० १।१५।२१) ॥१४॥

उद्धवः ।

यन्मर्त्यलीलौपयिकं स्वयोग-
मायाबलं दर्शयता गृहीतम् ।
विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ॥१५॥

उद्धवः कृष्णस्वरूपं स्मरति । यन्मर्त्येति । यस्य मर्त्यानां या लीला तस्यामौपयिकं योग्यं तच्च स्वयोगमायाबलम् । लोकः पश्यत्विति गृहीतम् । मणिमन्त्रौषधीर्विना समाधिनैव याविर्भवति सा योगमाया । न केवलमन्यस्य स्वस्य च विस्मापनम् । कथमिदमाविर्भूतमिति । यतः सौभाग्यं सम्पत्तेः परं स्थानम् । भूषणानामपि भूषणान्यङ्गानि यस्य स तथा । (भाग० ३।२।१२) ॥१५॥

यद्धर्मसूनोर्बत राजसूये
निरीक्ष्य दृक्स्वस्त्ययनं [1]नृलोकः ।

1 त्रिलोकः इति स्वामिसम्मतः पाठः ।

कार्त्स्न्येन चाद्येह गतं विधातु-
रर्वाक्सृतौ कौशलमित्यमन्यत ॥१६॥

यदिति। यद्रूपं राजसूये निरीक्ष्य नृलोकोऽमन्यत। अद्य अर्घ्यदानावसरे। इह कृष्णरूपे यत् कार्त्स्न्यं तद्गुणसम्पूर्णत्वं तेन। गतं ज्ञातं मया। विधातुः कौशलमर्वाक्सृतौ कर्ममार्गे तत्कर्मभोगायतननिर्माणे। न ज्ञानमार्गे न सालोक्यादिभोगायतननिर्माणे वेति। (भाग० ३।२।१३) ॥१६॥

यस्यानुरागप्लुतहाससरास-
लीलावलोकप्रतिलब्धमानाः।
व्रजस्त्रियो दृग्भिरनुप्रवृत्त-
धियोऽवतस्थुः किल कृत्यशेषाः ॥१७॥

यस्येति। यस्य कृष्णस्यानुरागप्लुतेन हासादिना प्रतिलब्धो मानो याभिस्तास्तथा। प्रतिशब्देन ताभिरपि तथा हास्याद्याचरितमिति गम्यते। दृग्भिः सर्वत्र कृष्णदर्शनैः अनुप्रवृत्ता सर्वं परित्यज्य कृष्णमेवानुगता धीर्यासां तास्तथा। कृतौ कर्तव्ये। अशेषाः शेषरहिताः। अवतस्थुः कृतकृत्या बभूवुरित्यर्थः। (भाग० ३।२।१४) ॥१७॥

स्वशान्तरूपेष्वितरैः स्वरूपै-
रभ्यर्द्यमानेष्वनुकम्पितात्मा।
परावरेशो महदंशयुक्तो
ह्यजोऽपि जातो भगवान् यथाग्निः ॥१८॥

स्वेति। यः कृष्णोऽजोऽपि जन्मायोग्योऽपि। परावरेशोऽपि जन्मना विना कार्यं कर्तुं समर्थोऽपि। जातः। महतो महत्तत्त्वस्यांशेन विशुद्धोर्जितसत्त्वेन युक्तः। उपाधिना विना जन्मासम्भवात्। यथा अग्निर्महाभूतत्वेन सर्वत्र सन्नपि दाहसम्बन्धात्तज् जायते। यद्यपि शान्तान्यशान्तानि च तस्यैव रूपाणि तथापि शान्तानामनुकम्पया जातः। (भाग० ३।२।१५) ॥१८॥

मां खेदयत्येतदजस्य जन्म-
विडम्बनं यद्वसुदेवगेहे ।
व्रजे च वासोऽरिभयादिव स्वयं
पुराद् व्यवात्सीद् यदनन्तवीर्यः ॥१६॥

मामिति । एतत् त्रयम् । विडम्बनम् अनुचिताचरणम् ' मां खेदयति । किन्तत् ' वसुदेवगेहे यज्जन्म ' यश्च व्रजे वासः ' यश्च पुराद् व्यवात्सीत् मथुरातो द्वारकामगात् । अरिभयादिवेति लोकोत्प्रेक्षातः ' न चानन्तवीर्यस्यारिभयम् । नृसिंहवदरिवधः कार्य इति मे मतिरित्यर्थः (भाग० ३।२।१६) ॥१६॥

दुनोति चेतः स्मरतो ममैतद्
यदाह पादावभिवन्द्य पित्रोः ।
तातम्ब कंसादुरुशङ्कितानां
प्रसीदतं नोऽकृतनिष्कृतीनाम् ॥२०॥

दुनोतीति । एवञ्च मम चेतो दुनोति । यद्वसुदेवं प्रति तातेत्याह ' देवकीं प्रति अम्बेति । यच्च पादवन्दनं यच्च प्रसीदतं युवामस्माकमिति वचनम् । यतो वयं कंसादत्यन्तभीताः । अकृतनिष्कृताः अनिष्पादितपुत्रकार्याः । युवयोर्बन्धमोक्षाकरणात् (भाग० ३।२।१७) ॥२०॥

को वा अमुष्याङ्घ्रिसरोजरेणुं
विस्मर्तुमीशीत पुमान् विजिघ्रन् ।
यो विस्फुरद्भ्रूविटपेन भूमे-
र्भारं कृतान्तेन तिरश्चकार ॥२१॥

को वेति । ईशीत शक्नुयात् । विजिघ्रन् गन्धवासितेन्द्रियः सन् । विस्फुरन् भ्रूविटपो यस्मिन् कृतान्ते स तथा भ्रूभङ्गेन प्रेरित इत्यर्थः (भाग० ३।२।१८) ॥२१॥

दृष्टा भवद्भिर्ननु राजसूये
चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः ।
यां योगिनः संस्पृहयन्ति सम्यग्
योगेन कस्तद्विरहं सहेत ॥२२॥

तथैव चान्ये नरलोकवीरा
य आहवे कृष्णमुखारविन्दम् ।
नेत्रैः पिबन्तो नयनाभिरामं
पार्थास्त्रपूताः पदमापुरस्य ॥२३॥

दृष्टेति । भवद्भिर्विदुरादिभिः । आहवे कुरुक्षेत्रसंग्रामे । पार्थोऽर्जुनः । अस्य विष्णोः । (भाग० ३।२।१९-२०) ॥२३॥

तत्तस्य कैङ्कर्यमलं भृतान्नो-
विग्लापयत्यङ्ग यदुग्रसेनम् ।
तिष्ठन् निषण्णं परमेष्ठिधिष्ण्ये
न्यबोधयद्देव निधारयेति ॥२४॥

तदिति । कैङ्कर्यं नोऽस्मान् भृत्यान् अलमत्यर्थं विग्लापयति । यत् परमेष्ठि-धिष्ण्ये राजासने निषण्णमासीनमुग्रसेनं तिष्ठन्नसौ न्यबोधयद् विज्ञापितवान् । हे देव ! निधारय अवधारयेति (भाग० ३।२।२२) ॥२४॥

स्वयन्त्वसाम्यातिशयस्त्र्यधीशः
स्वाराज्यलक्ष्म्याप्तसमस्तकामः ।
बलिं हरद्भिश्चिरलोकपालैः
किरीटकोटीडितपादपीठः ॥२५॥

स्वयमिति । यतस्तेन सहातिशयः साम्यं वा कस्यापि नास्तीति त्रयाणां पुरुषाणाम् अधीशः । स्वाराज्यलक्ष्म्या माययाऽनभिभूतत्वेन । चिरलोकाश्चिर-कालावस्थायिनो ब्रह्मलोकादयः (भाग० ३।२।२१) ॥२५॥

अहो बकी यं स्तनकालकूटं
जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यं
कं वा दयालुं शरणं व्रजेम ॥२६॥

अहो इति । बकी पूतना । यं कृष्णम् । एवमसाध्व्यपि धात्रुचितां गतिं लेभे । धात्री यशोदा । माता हि देवकी । अपकारेऽप्युपकारो दयालुत्वम् (भाग० ३।२।२३) ॥२६॥

मन्येऽसुरान् भागवतांस्त्र्यधीशे
संरम्भमार्गाभिनिविष्टचित्तान् ।
ये संयुगेऽचक्षत तार्क्ष्यपुत्र-
मंसे सुनाभायुधमापतन्तम् ॥२७॥

मन्य इति । असुरान् भागवतान् मन्ये । संरम्भो बुद्ध्या हन्तुमुद्यमः । अचक्षत अपश्यत् । तार्क्ष्यपुत्रं गरुडम् । कीदृशम् । अंसे स्कन्धे सुनाभायुधश्चक्रायुधो यस्य स तथा । [1]षष्ठी स्थाने-योगेतिज्ञापकादसंज्ञायामप्यलुक् । उद्धवो विदुरम् (भाग० ३।२।२४) ॥२७॥

सुनीतिः ।

नान्यं ततः पद्मपलाशलोचनाद्
दुःखच्छिदं ते मृगयामि कञ्चन ।
यो मृग्यते हस्तगृहीतपद्मया
श्रियेतरैरङ्ग विमृग्यमाणया ॥२८॥

अथानिष्टसंप्रयोगविभावं शोकमाह । नान्यमिति । तस्या हि सपत्न्याः पुत्रनिर्भर्त्सनेन शोक उद्भूतः । ते ध्रुवस्य । इतरैर्ब्रह्मादिभिः । अत्र भगवदन्यस्य दुःखच्छेत्तुरभाव उद्दीपकः । सुनीतिर्ध्रुवम् (भाग० ४।८।२३) ॥२८॥

---

1 पाणिनिः १।१।४९

प्रह्लादः ।

मतिर्न कृष्णे परतः स्वतो वा
मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्तगोभिर्विशतां तमिस्रं
पुनः पुनश्चर्वितचर्वणानाम् ॥२९॥

मतिरिति । परतो गुर्वादिभ्यः, स्वत आत्मनः, मिथः परस्परं विचारात्, अभिपद्येतोपपद्येत । गृहमेव व्रतं येषां ते तथा गृहासक्ता इत्यर्थः । अन्धकार-रूपत्वाद्विषयस्य तमिस्रत्वम् । अदान्तगोभिरजितेन्द्रियैः । गोवत् सर्वत्र चरण-शीलत्वाद् गाव इन्द्रियाणि । तमिस्रं विषयम्, तादर्थ्यात्ताच्छील्यम् । चर्वितस्य भुक्तस्य चर्वणं पुनर्भोजनं येषां ते तथा । अत्र हि प्रह्लादस्य विषयेषु क्लिश्यतः प्राणिनः समीक्ष्य मृदुमनस्कतया शोक उत्पन्नः स्थायी । स चर्वितचर्वणादिभि-र्विभावैर्वर्धितः । एवं वक्ष्यमाणेषु रुद्रादिषु (भाग० ७।५।३०) ॥२९॥

न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः ।
अन्धा यथान्धैरुपनीयमाना
[1]वाचीश तन्त्यामुरुदाम्नि बद्धाः ॥३०॥

नेति । स्वार्थस्य भुक्तिमुक्तिरूपस्य गतिः प्राप्तिर्यस्माद्विष्णोः । बहि-र्विष्णोरन्योऽर्थः प्रयोजनं येषां ते बहिरर्थाः तान् मानयन्ति गुरुत्वेनेति ते तथा, गुरुसहिता अपि न विदुरित्यर्थः । अत्र दृष्टान्तः अन्धा इत्यादि । वाचि ईश्वरस्य वेदरूपायायां तन्त्यामुरूणि नामान्येव दामानि यस्यां तत् तथा, तस्य वाक् तंतिर्नामानि दामानीति श्रुतेः (भाग० ७।५।३१) ॥३०॥

---

1 तेऽपीश० इति दृश्यते मुद्रापितः पाठो भागवते ।

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं
स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोभिषेकं
निष्किञ्चनानां न वृणीत यावत् ॥३१॥

नैषामिति । एषां विषयानुसारिणी मतिः । अनर्थस्य संसारस्यापगमो निवृत्ति-र्यस्य विष्णुचरणस्पर्शस्यार्थः फलम् । प्रह्लादः पितरम् (भाग० ७।५।३२) ॥७१॥

जह्यासुरं भावमिमं त्वमात्मनः
समं मनो धत्स्व न सन्ति विद्विषः ।
ऋतेऽजितादात्मन उत्पथे स्थितात्
तद्धि ह्यनन्तस्य महत् समर्हणम् ॥३२॥

जहीति । हे हिरण्यकशिपो । समं मित्रामित्रविकल्पहीनम् । धत्स्व धारय । यतोऽजिताद् अनिगृहीतात् आत्मनो मनसः ऋते तव विद्विषो न सन्ति । अजितत्वादुत्पथे उन्मार्गे स्थितात् । तत् समत्वधारणम् । अर्हण-माराधनम् (भाग० ७।८।६) ॥३२॥

दस्यून् पुरा षण् न विजित्य लुम्पतो
मन्यन्त एके स्वजिता दिशो दश ।
जितात्मनो ज्ञस्य समस्य देहिनां
साधोः स्वमोहप्रभवाः कुतः परे ॥३३॥

अजितात्मतामेवाह ' दस्यूनिति । दस्यून् शत्रून् । षट् काम-क्रोध-लोभ-मोह-दम्भे-र्षाख्यान् । लुम्पतः स्वसीमानमुल्लङ्घ्य विषयं भुञ्जानान् । एके त्वादृशाः । देहिनां देहाभिमानिनाम् । स्वमोहप्रभवाः स्वरूपाज्ञानजाः । परे शत्रवः । ज्ञस्य देहाभिमानरहितस्य । कुतो भवेयुः । जितात्मत्वादि-न्द्रियजयः' समत्वादात्मनो जयः ' साधुत्वात्तन्निर्वाहः । प्रह्लादः पितरम् (भाग० ७।८।१०) ॥३३॥

शोचे ततो विमुखचेतस इन्द्रियार्थ-
मायासुखाय भरमुद्वहतो विमूढान्।
प्रायेण देवमुनयः स्वविविक्तकामा
मौनं चरन्ति विजने न परार्थनिष्ठाः ॥३४॥

शोच इति। हे देव नृसिंह सोऽहं शोचे। ततस्त्वत्कथायाः। इन्द्रियार्थ-मायासुखाय विषयजनितसुखप्रतिरूपाय। भरं गृहधुरम्। तान् मुनय उद्धरिष्यन्तीति चेत् तत्राह' प्रायेणेति। अत्र शोच इति शोकस्य स्थायिनः कथनम् (भाग० ७।६।४३-४३) ॥३४॥

नैवोद्विजे पर दुरत्ययवैतरण्या-
स्त्वद्वीर्यगायनमहामृतमग्नचित्तः।
नैतान् विहाय कृपणान् विमुमुक्ष एको
नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥३५॥

नैवेति। एतान् विमुखचेतसः कृपणान् शोच्यान्। न विमुमुक्षे न विमोक्तुमिच्छामि। (भाग० ७।६।४३-४४) ॥३५॥

यन्मैथुनादिगृहमेधि सुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम्।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः
कण्डूतिवन्मनसिजं विषहेत धीरः ॥३६॥

अस्य जगतो विरक्तो भूत्वा निवर्तिष्यन्त इति चेत्तत्राह' यदिति। यद् यस्मात्। इह मैथुनादौ' गृहमेधिनि गृहसम्बन्धिनि गृहसंसर्गिणि' मेधतेः संसर्गार्थत्वात्' तुच्छे सुखे कृपणा न तृप्यन्ति न विरज्यन्ते। दुःखाद् दुखम् अत्यन्तदुःखरूपमित्यर्थः। अत्र दृष्टान्तमाह' कण्डूयनेनेति। करयोः कण्डूयनेन यत् सुखं तदापातमात्ररम्यत्वेऽपि परिणतिविरसत्वाद् यथा दुःखं

तथेत्यर्थः । ननु कुतः पुनरेषां कृपणत्वं तत्राह ' कुरुडूतीति । धीरो हि मनसिजं कामं विषहेत । न चैते विषहन्ते । तस्मात्तथेत्यर्थः (भाग० ७।६।४५) ॥३६॥

मौनव्रतश्रुततपोऽध्ययनस्वधर्म-
व्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ते त्वजितेन्द्रियाणां
वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥३७॥

नन्ववि रिक्तानामप्येषां साधनानुष्ठानान्मोक्षो भविष्यतीति चेत्तत्राह ' मौनेति । हे पुरुष नृसिंह ! ते मौनादय आपवर्ग्याः अपवर्गप्रयोजनभूता अपि । परं केवलं दाम्भिकानां वार्ता जीवनोपाया भवन्ति न तु अपवर्गाय । व्रतम् एकादश्युपवासादि । श्रुतं शास्त्रम् । तपः कृच्छ्रादि । स्वधर्मो नित्यनैमित्तिकानुष्ठानम् । व्याख्या तदर्थविचारः । रहः एकान्तशीलनम् (भाग० ७।६।४६) ॥३७॥

तत्तेऽर्हत्तम नमःस्तुतिकर्मपूजाः
कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं
भक्तिं जनः परमहंसगतौ लभेत ॥३८॥

मद्भक्त्या भविष्यन्तीति चेत्तत्राह ' तदिति । हे अर्हत्तम नृसिंह । ते त्वत्सम्बन्धिन्या । नमो नमनम् । स्तुतिकर्म स्तुतिकरणम् । कर्म गृहमार्जनादि । इति एवम् । षडङ्गया सेवया विना । प्रह्लादो नृसिंहम् (भाग० ७।६।५०) ॥३८॥

रुद्रः ।

दैवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवञ्चकः ॥३९॥

देवदत्तेति । नृलोकं मनुष्यदेहं देवदत्तं लब्ध्वा यो यत्नेन नाद्रियेत । अजितेन्द्रियत्वादनादरः (भाग० १०।६३।४१) ॥३९॥

देवदेव जगन्नाथ गोविन्द पुरुषोत्तम ।
नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ॥४०॥

देवदेवेत्यादीनि सम्बोधनानि (भाग० १०।६४।२७) ॥४०॥

यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् ।
विपर्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥४१॥

यस्त्वामिति । भृशमयुक्तलोकचेष्टितदर्शनादाक्रोशेन कृपातिशयं ध्वनयन्ति । ये सुखबुद्ध्या गृहीतादुःखस्वरूपा भवन्ति ते विपर्यया इन्द्रियार्था विषयाः । यस्तदर्थं त्वां विसृजते सोऽमृतं परित्यज्य विषमत्ति । रुद्रः श्रीकृष्णम् (भाग० १०।६३।४२) ॥४१॥

चमसः ।

य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ।
न भजन्त्यवजानन्ति स्थानाद् भ्रष्टाः पतन्त्यधः ॥४२॥

य इति । एषां ब्राह्मणादीनां मध्ये । पुरुषं विष्णुम् । आत्मनः प्रभवं जनकम् । स्थानाद् ब्राह्मणत्वादेः (भाग० ११।५।३) ॥४२॥

दूरेहरिकथाः केचिद्दूरे चाच्युतकीर्तनाः ।
स्त्रियः शूद्रादयश्चैव तेऽनुकम्प्या भवादृशाम् ॥४३॥

दूरेहरीत्यादिरलुक् । भवादृशां निमिप्रभृतीनाम् (भाग० ११।५।४) ॥४३॥

विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदान्तिकम् ।
श्रौतेन जन्मनाथापि मुह्यन्त्याम्नायवादिनः ॥४४॥

श्रौतं जन्म उपनयनम् (भाग० ११।५।५) ॥४४॥

सर्वेषु शश्वत्तनुभृत्स्ववस्थितं
यथा खमात्मानमभीष्टमीश्वरम् ।
वेदोपगीतं च न शृण्वतेऽबुधा
मनोरथानां प्रवदन्ति वार्तया ॥४५॥

मुह्यन्तीत्युक्तं तदेवाह, सर्वेष्विति । न शृण्वते च, शृण्वन्त्यपि नेत्यर्थः । अभीष्टमिति तस्य पुरुषार्थरूपत्वमुक्तम् । सर्वेष्विति सौलभ्यम् । यथा खमिति उपाधिदोषैरदूषितत्वम् । ईश्वरमिति निग्रहसामर्थ्यम् । वेदेति प्रमाणसिद्धत्वम् । तत् किं शुभव्यापारान्तरवैयग्र्यादेवंविधस्याप्यश्रवणम्, नेत्याह । मनोरथानामिति कर्मणि षष्ठी । कामिनां तदपि शोभेत यदि सम्पादयितुं शक्नुयुः, न तु तथेत्याह, वार्तयेति । तत् किमीश्वरे निरूढं दूषणमस्ति, नेत्याह, अबुधा इति । (भाग० ११।५।१०) ॥४५॥

लोके व्यवायामिषमद्यसेवा
नित्यास्तु जन्तोर्नहि तत्र चोदना ।
व्यवस्थितिस्तेषु विवाहयज्ञ-
[1]सुराग्रहैराशुनिवृत्तिरिष्टा ॥४६॥

एवं मोहमाहात्म्यात् स्त्रीसेवादयोऽपि ऋतौ भार्यामुपेयात् इत्यादौ वेदेनैव विहिता इत्यपि मन्यमानान् बोधयितुमाह, लोक इत्यादि । व्यवायो मैथुनम् । आमिषं मांसम् । मद्यं प्रसिद्धम् । एषां सेवा नित्या रागतः प्राप्ता हि स्फुटम् । तत्र तासु सेवासु । चोदना वैदिकी प्रवर्तना नास्ति, अप्राप्ते शास्त्रमर्थवदिति न्यायात् । नन्वेवं ऋतौ भार्यामुपेयादित्यादेः कोऽर्थ इति चेत्तत्राह, व्यवस्थितिर्नियम इष्टा वेदस्य । तथा हि यदि व्यवायः कार्यः कर्तव्यः तर्हि विवाहेनैव । यद्यामिषं भक्ष्यं तर्हि यज्ञेनैव । यदि मद्यं सेव्यं तर्हि सुराग्रहेणैव, न तु निर्व्यवस्थित्या एव । तत्राह आश्विति,

1. भाग० सुराग्रहैरासु ।

आशु शीघ्रं निवृत्तिर्यया व्यवस्थित्या सा तथा। अयमर्थः। वेदो हि व्यवायादीनामनर्थानुबन्धितामवेद्य सर्वथा ततो निवृत्तिमिच्छन् स्वरसवाहिनीमनियतां तत्प्रवृत्तिं विवाहादिच्छलेन निरुणद्धि। (भाग० ११।५।११) ॥४६॥

धनञ्च धर्मैकफलं यतो वै
ज्ञानं [1]सविज्ञानमनु प्रशान्तिः[1]।
गृहेषु युञ्जन्ति कलेवरस्य
मृत्युं न पश्यन्ति दुरन्तवीर्यम् ॥४७॥

किञ्च सकामाः पुरुषाः रागोद्रेकात् काम्यानपि त्यक्त्वा दृष्टोपभोगार्थमेव प्रवर्तन्त इत्याह। धनञ्चेति। धर्म एकं केवलं फलम् यस्य तत् तथा। यतो धर्मात सम्यगनुष्ठितात्। ज्ञानं शास्त्रे विवेचनाशक्तिः। विज्ञानं विविक्तार्थधारणाशक्तिः। अनु पश्चात्। प्रशान्तिः सकलक्लेशकर्मक्षयात कैवल्यावाप्तिः। एवंविधं परम्परया मोक्षफलं धनं गृहेषु स्त्र्यादिषु युञ्जन्ति व्यर्थयन्ति। ननु दृष्टसुखत्यागेनादृष्टसुखार्थितैव कुबुद्धिरिति चेत् तत्राह। कलेवरस्येति। (भाग० ११।५।१२) ॥४७॥

यद्घ्राणभक्षो विहितः सुराया-
स्तथा पशोरालभनं न हिंसा।
एवं व्यवायः प्रजया न रत्यै
इमं विशुद्धं न विदुः स्वधर्मम् ॥४८॥

स एष यज्ञादिव्याजेन मांसादिग्रहः सांख्यविद्भिः शबलो धर्म इत्याख्यायते। यदिति। घ्राणेन नासिकासञ्चारिणा वायुनैव स्वादनं विहितं न तु पानम्। तथाच आश्वलायनमहर्षिणा स्वसूत्रे तृतीयेऽध्याये "प्राणभक्षोऽत्रे"त्युक्तम्[2]। तथा पशोरग्नीषोमीयादेरालम्भनं हिंसा न भवति। किन्तु नालभेतवत्समालभतिवदालभतेः स्पर्शार्थः। न चैवमवदानादिवचन-

1...1. भाग० सविज्ञानमनुप्रशान्ति। 2. आश्वलायनश्रौतसूत्रम् ३।९।६

विरोधः पिष्टपशौ यज्ञे सर्वकल्पनायाः सुकरत्वात् । अत एव महाभारते मोक्षधर्मेषु वेदविवादे ऋषिभिरुक्तम् ।

अजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः ।
अजसंज्ञानि बीजानि छागं न मन्तुमर्हथ ।
नैष धर्मः सतां देवा यत्र वध्येत वै पशुः ।

इति ।[1] अतोऽन्यथा ब्रुवाणश्च वसुसंज्ञो राजा तैरेव शप्तः । अत्रापि च "प्रेत्य खादन्ति ते च तान्" इत्यादिना[2] भूयसा तत्र तत्र सा निषिद्धा । तच्चायमर्थः सकामेषु क्रतुषु सर्वसाद्गुण्यसव्यपेक्षत्वात् यथाश्रुत एवार्थो ग्राह्यः । भगवत्-प्रीत्यर्थेषु च दर्शितरीत्या तत्र वैगुण्येऽपि दोषाभावात् । यथोक्तम्

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते[3]

इति । प्रजया हेतुभूतया रतिस्त्वानुषङ्गिकीति । विशुद्धं हिंसादिकलङ्करहितत्वात् । (भाग० ११।५।१३) ॥४८॥

द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ।
मृतके सानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः ॥४९॥

किञ्च पशुना यजत आत्मघातः स्वामिघातश्च स्यादित्याह द्विषन्त इति । मृतकं देहः । अनुबन्धः पुत्रादिः । (भाग० ११।५।१४) ॥४९॥

हित्वात्यायासरचिताः गृहापत्यसुहृच्छ्रियः ।
तमो विशन्त्यनिच्छन्तो वासुदेवपराङ्मुखाः ॥५०॥

हित्वेति । गृहादिचतुर्णामीहा । चमसः निमिम् । (भाग० ११।५।१५) ॥५०॥

नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत् स आत्महा ॥५१॥

---

1. महाभारते (मध्वविलासग्रन्थागारात् प्रकाशिते) शान्तिपर्वणि ३४५शेऽध्याये ७-८म-श्लोकौ द्रष्टव्यौ । 2. भागवतम् ११।५।१४ । 3. गीता २।४० ।

नृदेहमित्यादि। अत्र प्राप्येत्यध्याहारः। आद्यं नानायोनिप्रापक-कर्मोपार्जकत्वात्। सुलभम् अनादौ संसारे बहुशः प्राप्यमानत्वात्। दुर्लभन्त्व-स्थिरत्वात् तस्येच्छया वा अप्राप्तत्वात्। प्लवमुडुपम्। सुकल्पं सुदृढम्। अस्य च वृत्तस्यात्र पाठे प्रयोजनं चिन्त्यम्। इदं हि भगवतो वाक्यं तस्य भजनीयत्वेन भक्तत्वाभावात्। भक्तिरसानुभवाद्धि भक्ताः। यथा गोप्यादयः। भक्तिरसश्च विष्णोस्तद्भक्तानां वा चरितश्रवणादिना जातश्चमत्कार इति प्रागुक्तम्। स चात्र भगवानेव भक्तिरसस्यानुभविता। तस्माच्चिन्त्यः पाठः (भाग० ११।२०।१७)॥५१॥

अदितिः।

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रवः श्रवणमङ्गलनामधेय।
आपन्नलोकवृजिनोपशमोदयाद्य
शं नः कृधीश भगवन्नसि दीननाथः॥५२॥

यज्ञेशेति। तीर्थं गङ्गा पादेऽस्येति तीर्थपादः। श्रवः कीर्तिः। आपन्नानां शरणागतानां लोकानां यद् वृजिनं दुःखं तस्योपशमाय उदयः अवतारोऽस्येति। शं सुखम्। कृधि कुरुत। पुत्रसहितानां यतस्त्वं दीननाथोऽसि। अत्र क्लिश्यतः पुत्रान् दृष्ट्वाऽदितेरुत्पन्नः शोकः स्थायी। अदितिः भगवन्तम् (भाग० ८।१७।८)॥५२॥

नारदः।

स्वपादमूले पतितं तमर्भकं
विलोक्य देवं कृपया परिप्लुतः।
उत्थाप्य तच्छीर्ष्ण्यदधात् कराम्बुजं
कालाहिवित्रस्तधियां कृताभयम्॥५३॥

स्वेति। तं प्रह्लादम्। देवो नृसिंहः। अत्र प्रह्लादविषये कृपात्मकस्य भगवच्चरणानुभवान्नारदस्य भक्तत्वम्। (भाग० ७।९।५)॥५३॥

स तत्करस्पर्शधुताखिलाशुभः
सपद्यभिव्यक्तपरात्मदर्शनः ।
तत्पादपद्मं हृदि निर्वृतो दधौ,
हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥५४॥

इति श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां करुणरसः ।
इति त्रयोदशोऽध्यायः ॥१३॥

एवं करुणानुविद्धभक्तिरसं भावयन्तं पुरुषस्याप्तकामतालक्षणं फलं भवति इत्यभिप्रेत्याह ' स इति । स प्रह्लादः । तस्य नृसिंहस्य करस्पर्शेन धुतमपनीतम् अखिलं ससंस्कारम् अशुभं मायापटलम् यस्य स तथा । सपदि तस्मिन्नेव क्षणे । अभिव्यक्तमाविर्भूतम् परस्य अशनायतीतस्य अपेतब्रह्म-क्षत्रादिभावस्य आत्मनः क्षेत्रज्ञस्य दर्शनं साक्षात्कारो यस्य स तथा । तस्य नृसिंहस्य पादपद्मम् । निर्वृतः छिन्नसंशयत्वात् । निर्वृतत्वेन हृष्य-त्तनुत्वादयः त्रयः सात्विकानुभावाः । क्लिन्नमार्द्रं भक्तिरसेन हृदयं यस्य स तथा । अश्रूणि लोचने यस्य । तादात्म्यनिर्देशः आनन्दाश्रूणां प्रभूतत्वं क्षरणा-तिशयं च द्योतयितुम् ' व्यधिकरणबहुव्रीहिर्वा (भाग० ७।९।६) ॥५४॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां करुणरसः ।
समाप्तोऽयं त्रयोदशोऽध्यायः ॥१३॥

चतुर्दशोऽध्यायः

विष्णुभक्तानां रौद्ररसः ।

रौद्ररसे हिरण्यकशिपुः ।

व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमुर्षूणां हि मन्दात्मन्नु स्युर्विक्लवा गिरः ॥१॥

अथ मात्सर्यदारापहारदेशजात्यभिजनविद्याकर्मनिन्दासत्यवचनस्वभृत्याधिक्षेपोपहासवाक्पारुष्यद्रोहादिविभावं नयनरागभ्रूकुटीकरणदन्तौष्ठपीडनगण्डस्फुरणहस्ताग्रनिष्पेषताडनप्रहरणाहरणशस्त्रसम्पातरुधिरापकर्षणच्छेदनाद्यनुभावम् औग्र्यावेगोत्साहविबोधामर्षचापलादिव्यभिचारिणं क्रोधस्थायिनं रौद्ररसमाह[1] रौद्रे ति ।

तत्रापि हिरण्यकशिपौ शिशुपाले च मात्सर्यविभावः क्रोध इति दर्शयन् परिपुष्टत्वाद्धिरण्यकशिपुगतं प्रथमं प्रस्तौति व्यक्तमिति । व्यक्तं निश्चितम् । अतिमात्रमतिशयितम् (भाग० ७।८।११) ॥१॥

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ॥२॥

य इति स्पष्टम् । (भाग० ७।८।१२) ॥२॥

सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ।
गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥३॥

सोऽहमिति । त्वा त्वाम् । गोपायेत रक्षतु । शरणं रक्षिता (भाग० ७।८।१३) ॥३॥

---

1 हेमचन्द्रकृत-काव्यानुशासने द्वितीयेऽध्याये रौद्ररसलक्षणं द्रष्टव्यम् ।

एवं दुरुक्तैर्मुहुरर्दयन् रुषा
सुतं महाभागवतं महासुरः ।
खड्गं प्रगृह्योत्पतितो वरासनात्
स्तम्भं तताडातिबलः स्वमुष्टिना ॥४॥

एवमिति । दुरुक्तैर्दुर्वाक्यैर्मुहुर्वारंवारम् । वरासनं सिंहासनम् । अत्र रुषेति स्थायिन उक्तिः । खड्गं प्रगृह्य स्तम्भं तताडेत्यनुभावयोः । उत्पतित इत्या-वेगाख्यस्य सञ्चारिणः । नृसिंहश्चालम्बनम् । एवमन्यत्र (भाग० ७।८।१४) ॥४॥

स विक्रमन् पुत्त्रवधेप्सुरोजसा
निशम्य निर्ह्रादमपूर्वमद्भुतम् ।
अन्तःसभायां न ददर्श तत्पदं
वितत्रसुर्येन सुरारियूथपाः ॥५॥

स इति । स हिरण्यकशिपुः । विक्रमन् विक्रमं कुर्वन् । ओजसा विशिष्टः । निर्ह्रादम् अट्टहासम् । अन्तःसभायां सभामध्ये । तस्य निर्ह्रादस्य पदमाश्रयम् । येन निर्ह्रादेन (भाग० ७।८।१६) ॥५॥

सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम् ॥६॥

सत्यमिति । निजभृत्यस्य प्रह्लादस्य भाषितं "हरिः सर्वगत" इति सत्यं कर्तुम् । अदृश्यत हरिरिति शेषः । न मृगं न मृगसम्बन्धि । (भाग० ७।८।१७) ॥६॥

स सत्त्वमेवं परितो विपश्यन्
स्तम्भस्य मध्यादनुनिर्जिहानम् ।
नायं मृगो नापि नरो विचित्र-
महो किमेतन्नृमृगेन्द्ररूपम् ॥७॥

स इति। स दैत्यः सत्त्वं निर्ह्लादकर्तारम् प्राणिनम्। परितः सर्वासु दिक्षु विपश्यन्। निर्जिहानं निर्गतम्। (भाग० ७।८।१८) ॥७॥

[1]मीमांसमानः स[1] समुत्थितोऽग्रतो
नृसिंहरूपं तदलं भयानकम्।
प्रतप्तचामीकरचण्डलोचनं
स्फुरत्सटाकेशरजृम्भिताननम् ॥८॥

मीमांसमान इति। किमेतदिति मीमांसमानो विचारयन् समुत्थित इत्यन्वयः। अलमत्यर्थं भयानकं भयङ्करम्। प्रतप्तं यच्चामीकरं सुवर्णम् तद्वर्णे चण्डे अतिकोपने लोचने यस्मिन् रूपे। स्फुरन्त्यः सटाः जटाः केशराणि च कण्ठस्य समन्तात् स्थिताः केशाः तैः जृम्भितं विकसितं आननञ्च यस्मिन् (भाग० ७।८।१९) ॥८॥

करालदंष्ट्रं करवालचञ्चल-
क्षुरान्तजिह्वं भ्रुकुटिमुखोल्वणम्।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुत-
व्यात्तास्यनासं हनुभेदभीषणम् ॥९॥

करालेति। करवालवत् खड्गवच्चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन्। भ्रुकुटीयुतेन मुखेनोल्वनम्। गिरिकन्दराद्भुतं प्रसारितमास्यं नासे च यस्मिन्। हनोर्भेदेन विभक्तत्वेन (भाग० ७।८।२०-२१) ॥९॥

दिविस्पृशत्कायमदीर्घपीवर-
ग्रीवोरुवक्षःस्थलमल्पमध्यमम्।
चन्द्रांशुगौरैश्छुरितं तनूरुहै-
र्विष्वग्भुजानीकशतं नखायुधम् ॥१०॥

1. मीमांसमानस्येति मुद्रापितो भागवतीयः पाठः।

दुरासदं सर्वनिजेतरायुध-
प्रवेकविद्रावितदैत्यदानवम् ॥११॥

दिवीति। अदीर्घा पीवरा च ग्रीवा गलः उरु विशालं वक्षःस्थलञ्च यस्मिन्। अल्पं कृशं मध्यमं मध्यभागः यस्मिन्। तनूरुहैर्लोमादिभिः छुरितं मिश्रितम्। विष्वक् समन्तात्। भुजा एवानीकशतानि सैन्यशतानि यस्य। निजं चक्रादि। इतरत् खड्गादीनि। प्रवेकम् उत्तमम्। (भाग० ७।८।२१'२२) ॥१०'११॥

प्रायेण मेऽयं हरिणोरुमायिना
बधः स्मृतोऽनेन समुद्यतेन किम्।
एवं ब्रुवंस्त्वभ्यपतद्‌गदायुधो
नदन्नृसिंहं प्रति दैत्यकुञ्जरः ॥१२॥

प्रायेणेति। अयं नृसिंहः। अनेन समुद्यतेन। मम किं न किमपीत्यर्थः। अभ्यपतत् अभिमुखमागतः। (भाग० ७।८।२३) ॥१२॥

अलक्षितोऽग्नौ पतितः पतङ्गमो
यथा नृसिंहौजसि सोऽसुरस्तदा।
न तद्विचित्रं खलु सत्त्वधामनि
स्वतेजसा यो नु पुरापिबत्तमः ॥१३॥

अलक्षित इति। स च नृसिंहस्य ओजसि तेजोराशौ पतितः सन्नलक्षितः। अग्नाविव पतङ्गः। तत्तथाविधं तेजोवैभवम्। सत्त्वधामनि विष्णौ। यतोऽसौ पुरा सृष्ट्यादौ। तमः प्रलयान्धकारम्।

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः[1] ॥

इति वचनात्तदा तमःसद्भावः । (भाग० ७।८।२४) ॥१३॥

ततोऽभिपद्याभ्यपतन्महासुरो[3]
रुषा नृसिंहं गदयोरुवेगया ।
तं विक्रमन्तं सगदं गदाधरो
महोरगं तार्क्ष्यसुतो यथाग्रभीत्[2] ॥१४॥

तत इति । अभिपद्य अभ्यपतत् । किञ्चिदभिमुखमागत्य पुनराचक्राम । गदाविशिष्टः । तं दैत्यं विक्रमं कुर्वाणम् । गदाधरो नृसिंहः । तार्क्ष्यसुतो गरुडोऽग्रभीत् । हृग्रहोर्भश्छन्दसीति[4] भकारः । अप्रयासेन ग्रहणं दृष्टान्तेन व्यञ्जितम् । (भाग० ७।८।२५) ॥१४॥

स तस्य हस्तोत्कलितस्तदासुरो
विक्रीडतो यद्वदहिर्गरुत्मतः ।
असाध्वमन्यन्त हृतौकसोऽमरा
घनच्छदा भारत सर्वधिष्ण्यपाः ॥१५॥

स इति । उत्कलित उन्मुक्तः । तदुत्कलनमसाधु अमन्यन्त । हृतौकसो हृतस्थानाः । घना मेघाः छदा अपावरणानि येषां ते तथा । माऽस्मानद्राक्षी-दिति भयम् । धिष्ण्यपाः लोकपालाः । हे भारत ! परीक्षित् । (भाग० ७।८।२६) ॥१५॥

---

1 मनुसंहिता १।५ ।
2 ०भ्यहनन्महासुरो इति भागवते पाठो दृश्यते ।
3 ययाग्रहीदिति भागवते मुद्रापितः पाठः ।
4 पाणिनिः ८।२।३२ वार्तिकम् ।

तं मन्यमानो निजवीर्यशङ्कितं
यद्धस्तमुक्तो नृहरिं महासुरः ।
पुनस्तमासज्जत खड्गचर्मणी
प्रगृह्य वेगेन गतश्रमो मृधे ॥१६॥

तमिति । यत् यस्मात् । (भाग० ७।८।२७) ॥१६॥

तं श्येनवेगं शतचन्द्रवर्त्मभि-
श्चरन्तमच्छिद्रमुपर्यधो हरिः ।
कृत्वाट्टहासं खरमुत्स्वनोल्बणं
निमीलिताक्षं जगृहे महाजवः ॥१७॥

तमिति । तं दैत्यम् । श्येनस्येव वेगो यस्य । शतचन्द्रं फलकम् । अच्छिद्रमलक्ष्यमाणावकाशं यथा स्यात्तथोपर्यधश्च सञ्चरन्तम् । उत्स्वनेन स्वकृतेन उल्बणम् । (भाग० ७।८।२८) ॥१७॥

विष्वक् स्फुरन्तं ग्रहणातुरं हरि-
र्व्यालो यथाखुं कुलिशाक्षतत्वचम् ।
द्वार्यूरुमापात्य ददार लीलया
नखैर्यथाहिं गरुडो महाविषम् ॥१८॥

विष्वगिति । ग्रहणेनातुरं व्यग्रम् । व्यालो यथेति ग्रहणे दृष्टान्तः । (भाग० ७।८।२९) ॥१८॥

संरम्भदुष्प्रेक्ष्यकराललोचनो
व्यात्ताननान्तं विलिहन् स्वजिह्वया ।
असृग्लवाक्तारुणकेशराननो
यथान्त्रमाली द्विपहत्यया हरिः ॥१९॥

संरम्भेति; संरम्भेन संग्रामेण दुष्प्रेक्ष्ये कराले लोचने यस्य स तथा। व्यात्तस्य प्रसारितस्याननस्यान्तं सृक्किरूपम्। असृजो रुधिरस्य लवैर्बिन्दुभिः अक्तानि विलिप्तानि अत एवारुणानि केशराण्याननञ्च यस्य। यथा हरिः सिंहः। द्विपस्य गजस्य हत्यया हननेन। (भाग० ७।८।३०) ॥१९॥

नखाङ्कुरोत्पाटितहृत्सरोरुह
विसृज्य तस्यानुचरानुदायुधान्।
अहन् समन्तान्नखशस्त्रपार्ष्णिभि[1]
र्दोर्दण्डयूथोऽनुपथान् सहस्रशः ॥२०॥

नखाङ्कुरेति। नखाङ्कुरोत्पाटितं हृत्सरोरुहं यस्य स तम्। विसृज्याहन्। हतवान्। पार्ष्णिर्गुल्फाधोभागः। दोर्दण्डाणां यूथं सङ्घो यस्मिन्। अनुपथान् अनुचरानस्यानुगामिनः। (भाग० ७।८।३१) ॥२०॥

सटावधूता जलदाः परापतन्
ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः।
अम्भोधयः श्वासहता विचुक्षुभु-
र्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥२१॥

सटेति। सटाभिस्कन्धस्थैः केशैरवधूताः पराहताः। परापतन् दूरे पतिताः। ग्रहाः सूर्यादयः। (भाग० ७।८।३२) ॥२१॥

द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला
प्रोत्सर्पत क्ष्मा च पदाभिपीडिता।
शैलाः समुत्पेतुरमुष्य रंहसा
तत्तेजसा खं ककुभो न रेजिरे ॥२२॥

द्यौरिति। द्यौः स्वर्गः। तत्सटाभिरुत्क्षिप्तैरूर्ध्वं गमितैः विमानैः सङ्कुला सम्बद्धा प्रोत्सर्पत प्रकर्षेणोर्ध्वं गता। क्ष्मा पृथिवी। अमुष्य नृसिंहस्य। रंहसा वेगेन। (भाव० ७।८।३३) ॥२२॥

---

1 पार्ष्णिभिरिति भागवते पाठो दृश्यते।

ततः सभायामुपविष्टमुत्तमे
नृपासने संभृततेजसं विभुम् ।
अलक्षितद्वैरथमत्यमर्षणं
प्रचण्डवक्त्रं न बभाज कश्चन ॥२३॥

ततो वधानन्तरम् । अलक्षितं द्वैरथं द्वाभ्यां रथाभ्यां निर्वृत्तं युद्धं येन तम् । अदृष्टप्रतिभटमित्यर्थः । (भाग० ७।८।३४) ॥२३॥

निशम्य लोकत्रयमस्तकज्वरं
तमादिदैत्यं हरिणा हतं मृधे ।
प्रहर्षवेगोत्कलितानना मुहुः
प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥२४॥

निशम्येति । ऊत्कलितम् उत् फुल्लम् ७।८।३५ (२४)

तदा विमानावलिभिर्नभस्तलम्
दिदृक्षतां सङ्कुलमास नाकिनाम् ।
सुरानका दुन्दुभयोऽथ जघ्निरे
गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥२५॥

तदेति । नाकिनो देवाः । (भाग० ७।८।३६) ॥२५॥

शिशुपालः ।

इत्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः ।
नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥२६॥

इत्थमिति । इत्थं राजसूयाग्रपूजया सभाजितं सत्कृतं । नमो जयेति वदन्तः । तं कृष्णम् । (भाग० १०।७४।२६) ॥२६॥

इत्थं निशम्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।

उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी
संश्रावयन् भगवते परुषाण्यभीतः ॥२७॥

इत्थमिति । इत्थम् "अर्हति ह्यच्युतः श्रैष्ठ्यम्" इत्यादि सहदेववाक्यम्[1] । निशम्य श्रुत्वा । दमघोषसुतः शिशुपालः । स्वपीठात् स्वासनात् भगवते भगवदर्थम् । तमुद्दिश्येत्यर्थः । अत्रामर्षीति स्थायिनः क्रोधस्योक्तिः । गुणवर्णनजातमन्युरिति मत्सरस्य विभावस्य । उत्क्षिप्य बाहुमित्यनुभावस्य । सञ्चारिणस्तूह्याः । (भाग० १०।७४।३०) ॥२७॥

ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ।
वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥२८॥

ईश इति । श्रुतिः प्रसिद्धिः । वृद्धानां भीष्मादीनां । बालः सहदेवः । (भाग० १०।७४।३१) ॥२८॥

यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितम् ।
सदसस्पतयः सर्वे कृष्णो यत् सम्मतोऽर्हणे ॥२९॥

यूयमिति । कृष्णोऽर्हणे सम्मत इति यत्तद् बालभाषितं मा मन्ध्वं न मन्यध्वम् । सदसस्पतयः सभापतयः । (भाग० १०।७४।३२) ॥२९॥

तपोविद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् ।
परमर्षीन् ब्रह्मनिष्ठान् लोकपालैश्च पूजितान् ॥३०॥
सदस्पतीनतिक्रम्य[2] गोपालः कुलपांसनः ।
यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥३१॥

तप इति । ऋष्यादीनतिक्रम्य । गोपालो बल्लवः । सपर्यां पूजाम् । कथमर्हति न कथमपीत्यर्थः । वस्तुतः गाव इन्द्रियाणि तासां पालोऽधिष्ठाता ।

---

1 भाग० १०।७४।१९ ।

2 ०तिक्रम्येति भागवते पाठान्तरम् ।

कुलं वंशम् पांसयति [पांसुमन्तं करोति] मलिनं करोतीति कुलपांसनः। [1]विन्मतोर्लुगिति मतुबो लुक् [2]टेरित्युकारलोपः। तत्त्वतस्तु कुत्सितं लपन्तीति कुलपान् कुत्सितवाचः। अंसयति विभाजयति पृथक्करोति निराकरोतीति कुलपांसनः। काको वायसः। अथवा अकं पापं दुःखञ्च। तव अको वक्रगामी तन्नाशक इत्यर्थः। अक वक्रगताविति[3] भूवादौ पठ्यते। (भाग० १०।७४।३३'३४) ॥३१॥

वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः।
स्वैरवर्ती गुणहीनः सपर्यां कथमर्हति ॥३२॥

वर्णेति। सर्वधर्मेभ्यो बहिः कृतं करणं यस्य। यत् सर्वधर्मेभ्यो न लभ्यते तत्फलमयं लम्भयतीत्यर्थः। स्वैरवर्ती ईश्वरत्वात्। गुणैर्हीनश्चिन्मात्रत्वात्। अर्थान्तरन्तु वक्तव्यम्। (भाग० १०।७४।३५) ॥३२॥

ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतम्।
वृथापानरतं शश्वत् सपर्यां कथमर्हति ॥३३॥

ययातिनेति स्पष्टम्। (भाग० १०।७४।३६) ॥३३॥

ब्रह्मर्षिसेवितान् देशान् हित्वैतेऽब्रह्मवर्चसम्।
समुद्रं दुर्गमाश्रित्य बाधन्ते दस्यवः प्रजाः ॥३४॥

ब्रह्मर्षीति स्पष्टम्। (भाग० १०।७४।३७) ॥३४॥

एवमादीन्यभद्राणि बभाषे नष्टमङ्गलः।
नोवाच किञ्चिद्भगवान् यथा सिंहः शिवारुतम् ॥३५॥

एवमिति स्पष्टम्। मङ्गलं तच्छरीरारम्भकं पुण्यं यस्य स तथा। शिवारुतं श्रुत्वेति शेषः। (भाग० १०।७४।३८) ॥३५॥

---

1. पाणिनिः ५।२।६५। 2. पाणिनिः ६।४।१५५।
3. पाणिनीये धातुपाठे (१।७९२) अक अग कुटिलायां गताविति दृश्यते।

ततः पाण्डुसुताः क्रुद्धा मत्स्यकैकयसृञ्जयाः ।
उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥३६॥

तत इति । उदायुधाः उद्यतास्त्राः । (भाग० १०।७४।४१) ॥३६॥

ततश्चैद्यस्त्वसम्भ्रान्तो जगृहे खड्गचर्मणी ।
भर्त्सयन् कृष्णपक्षीयान् राज्ञः सदसि भारत ॥३७॥

तत इति । हे भारत परीक्षित् । (भाग० १०।७४।४२) ॥३७॥

तावदुत्थाय भगवान् स्वान्निवार्य स्वयं रुषा ।
शिरः क्षुरान्तचक्रेण जहारापततो रिपोः ॥३८॥

तावदिति । स्वान् भीमादीन् । क्षुरवत् अन्तो यस्य । आपततः आगच्छतः । (भाग० १०।७४।४३) ॥३८॥

चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ।
पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ॥३९॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां रौद्ररसः ।
इति चतुर्दशोऽध्यायः ॥

एवं रौद्ररसेन भजन्तो भगवत्सायुज्यफलं भवतीत्याहुः चैद्येति । खात् आकाशात् । शुकः राजानम् । (भाग० १०।७४।४५) ॥३९॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां रौद्ररसः ।
समाप्तोऽयं चतुर्दशोऽध्यायः ।१४॥

पञ्चदशोऽध्यायः

विष्णुभक्तानां भयानकरसः ।

भयानकरसे कंसः

धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ।
पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥१॥

अथ पिशाचादिविकृतस्वरश्रवणातदवलोकनस्वजनवधबन्धादिदर्शनश्रवणशून्य-गृहारण्यगमनादिविभावं करकम्पचलदृष्टिनिरीक्षणहृदयपादस्पन्दशुष्कौष्ठकण्ठत्वङ्-मुखवैवर्ण्यस्वरभेदाद्यनुभावं शङ्कापस्मारमरणत्रासचापल्यदैन्यमोहादिव्यभिचारिणं स्त्रीनीचप्रकृतिषु स्वाभाविकमुत्तमेषु कृतकं भयानकं रसमाह[1] भयानकेति ।

धनुष इत्यादि । भज्यमानस्य कृष्णेन । रोदसीति भूद्यावे । यं शब्दम् । (भाग० १०।४२।१८) ॥१॥

दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ।
बह्वन्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥२॥

दीर्घेति । दीर्घः प्रजागरो निद्राक्षयो यस्य स तथा । अचष्ट अपश्यत् । उभयथा स्वप्ने जागरे च । दौत्यं दूतत्वम् । (भाग० १०।४२।२७) ॥२॥

हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ।
कंसो मनस्यपि तदा भृशमुद्विविजे नृप ॥३॥

हतमिति । तौ रामकृष्णौ । उद्विविजे उद्विग्नोऽभूत् । हे नृप परीक्षित् । शुकः राजानम् । (भाग० १०।४३।१८) ॥३॥

---

1 हैमचन्द्रकृतकाव्यानुशासने द्वितीयेऽध्याये भयानकरसलक्षणं द्रष्टव्यम् ।

तं खड्गपाणिं विचरन्तमाशु
श्येनं यथा दक्षिणसव्यमम्बरे।
समग्रहीद् दुर्विषहोग्रतेजा
यथोरगं तार्क्ष्यसुतः प्रसह्य: ॥४॥

तमिति। तं कंसम्। दक्षिणसव्यं दक्षिणतः सव्यतश्च विचरन्तम्। दुर्विषहम् अतिदुःसहम्। अत एव उग्रं तेजो यस्य स तथा। तार्क्ष्यसुतोऽपि दुर्विषान् सर्पान् हन्तीति दुर्विषहः। (भाग० १०।४४।३६) ॥४॥

प्रगृह्य केशेषु चलत्किरीटं
निपात्य रङ्गोपरि तुङ्गमञ्चात्।
तस्योपरिष्टात् स्वयमब्जनाभः[1]
पपात विश्वाश्रय आत्मतन्त्रः ॥५॥

प्रगृह्येति। चलत्किरीटं कंसं तुङ्गात् उच्चान्मञ्चात् रङ्गोपरि स्वयं निपात्य तस्योपरि स्वयं पपात। अञ्जनाभः इन्द्रनीलोज्ज्वलत्वात्। विश्वाश्रय इत्यनेन गुरुत्वप्रकर्षादुपरिपातमात्रेण कंसस्य गतासुत्वमुक्तम्। ननु चक्रादिभिरहत्वा किमित्येवमेव हतवानित्याह आत्मेति। अत्र च कंसस्य नारदादिभ्यो भगवत्कर्तृकवधश्रवणादुत्पन्ना भीः स्थायिभावो भीत इत्यलोक्तः। तस्य च धनुषः शब्दश्रवणदुर्निमित्तगजवधदर्शनादय उद्दीपनविभावाः, दीर्घप्रजागरादयोऽनुभावाः, त्रासोद्वेगौ च सञ्चारिणौ। (भाग० १०।४४।३७) ॥५॥

स नित्यदोद्विग्नधिया तमीश्वरं
पिबन्नदन् वा विचरन् स्वपन् श्वसन्।
ददर्श चक्रायुधमग्रतो यत-
स्तदेव रूपं दुरवापमाप ॥६॥

---

1 स्वयमब्जनाभ इति स्वामिसम्मतः पाठः।

अथ भयानकरसेन भजतः फलमाह ' स इति । सः कंसः । नित्यदा सर्वकालम् । उद्विग्नधिया विशिष्टः । यदेव पानाद्यवस्थासु ददर्श तदेवाप फलम् । फलकीर्तनस्य च प्रकरणपर्यन्ते समुचितत्वेऽपि भीरुभक्तेषु कंसस्यैव मुख्यत्वादत्रैव तत् कृतम् । (भाग० १०।४३।३६) ॥६॥

दुर्वासाः ।

स [1]दह्यमानोऽजितशस्त्रवह्निना
तत्पादमूले पतितः सवेपथुः ।
आहाच्युतानन्त सदीप्सित प्रभो
कृतागसं माऽव हि विश्वभावन ॥७॥

स इति । स दुर्वासाः । अजितस्य शस्त्रं चक्रम् । विष्णुना ह्यम्बरीषरक्षार्थं स्वचक्रं प्रहितम् । तस्याजितस्य पादमूले सवेपथुः सकम्पः । कृतागसं कृतापराधम् । मा माम् । अव रक्ष । हे विश्वभावन ! विश्वं भावयसि सत्तां लम्भयसि तथा । यद्वा भावयसि रक्षयसीति । (भाग० ९।४।६१) ॥७॥

अजानता ते परमानुभावं
कृतं मयाघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधात-
र्मुच्येत यन्नाम्न्युदितेऽपि नारकः[2] ॥८॥

अजानतेति । अघं दुःखं कृत्योत्पादनरूपम् । प्रियाणां ह्यम्बरीषादीनाम् । बहुवचनमत्राम्बरीषस्य पुत्रकलत्रादिविवक्षया । तेऽपि ह्यम्बरीषसम्बन्धात् भगवत्प्रियाः । अपचितिं निस्तारम् । यस्य तव नाम्नि उदिते किं पुनस्त्वयि दृष्ट इत्यर्थः । अत्र दुर्वाससः स्ववधाद्भयं स्थायिभावः ' दह्यमानत्वमुद्दीपनविभावः ' पादपतनं वेपथुरच्युतेत्याक्रन्दनं चानुभावः । (भाग० ९।४।६२) ॥८॥

---

1 भाग० सन्दह्यमानो ।　　　　2 भाग० यन्नाम्न्युदिते नारकोऽपि ।

उत्तरा ।

पाहि पाहि महायोगिन् देव देव जगत्पते ।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥९॥

पाहीति । अथ स्वजनवधशङ्काविभावं भयमाह ' उत्तरेत्यादि । हे देव कृष्ण । यत्र यस्मिन् । अत्र पाहि पाहीत्यनेन स्वपुत्रवधदर्शनमुत्तरया व्यक्तीकृतम् । (भाग० १।८।९) ॥९॥

कुन्ती ।

यथा हृषीकेश खलेन देवकी
कंसेन रुद्धातिचिरं शुचार्पिता ।
विमोचिताहञ्च सहात्मजा विभो
त्वयैव नाथेन मुहुर्विपद्गणात् ॥१०॥

यथेति । यथा यथावत् ' चकारेणैवोपमार्थस्य लब्धत्वात् । मुहुर्विपद्गणादिति व्यतिरेकः । (भाग० १।८।२३) ॥१०॥

अप्यद्य नस्त्वं स्वकृतेहित प्रभो
जिहाससि स्वित् सुहृदोऽनुजीविनः ।
येषां न चान्यद् भवतः पदाम्बुजात्
परायणं [1]राजसुयोजितांहसाम् ॥११॥

अपीति । कृष्णप्रयाणं निषेधयति । अपि अहो जिहाससि स्वान् हातुमिच्छति । किञ्च वयं हि सुहृदोऽनुजीविनश्च । त्वं स्वकृतेहितः स्वस्मिन् आत्मीये कृतमीहितमभिलषितं येन स तथा ' स्वजनस्य कामान् पूरयसीत्यर्थः । राजसु क्षत्रियेषु सुयोजितं सुष्ठु योगं नीतम् अंहः पापं कर्म यैस्ते तथा । कुन्ती श्रीकृष्णम् । (भाष० १।८।३७) ॥११॥

---

1 राजसु योजितमिति स्वामिसम्मतः पाठः ।

प्रह्लादः ।

त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्र-
संसारचक्रकदनादसतां[1] प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं
प्रीतोऽपवर्गमरणं[2] ह्वयसे कदा नु ॥१२॥

त्रस्तोऽस्मीत्यादि । हे उशत्तम नृसिंह ! कदनं दुःखम् । असतां मध्ये प्रणीतः प्रक्षिप्तोऽहं स्वकर्मभिः । ते अङ्घ्रिमूलं प्रति कदा ह्वयसे आह्वास्यसि । किम्भूतम् ? अपवर्गं मुक्तिरूपम् । अरणं शरणम् । (भाग० ७।९।१६) ॥१२॥

यस्मात् प्रियाप्रियवियोगसयोगजन्म-
शोकाग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाहं
भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥१३॥

यस्मादिति । हे भूमन् । तस्मिन् प्रपञ्चे या धीः तया । अहं भ्रमामि । अतस्तव दास्ययोगं वद । प्रियवियोगजन्मना अप्रियसंयोगजन्मना च शोकाग्निना दह्यमानः । यद् दुःखौषधं तदपि दुःखं तत्सम्पादनस्य दुःखात्मकत्वात् । (भाग० ७।९।१७) ॥१३॥

सोऽहं प्रियस्य सुहृदः परदेवताया
लीलाकथास्तव नृसिंह विरिञ्चिगीताः ।
अञ्जस्तितर्म्यनुगृणन् गुणविप्रमुक्तो
दुर्गाणि ते पद्युगालयहंससङ्गः ॥१४॥

ननु दास्ययोगस्य किं फलं तत्राह ? सोहमिति । हे नृसिंह ! गुणैर्ज्ञानादिभिर्विप्रमुक्तो हीनः । तव कथाः पुनः पुनर्गृणन्नञ्जसा दुर्गाणि तितर्मि तरामि । प्रियत्वात् सुखसेव्यत्वम् ? सुहृत्त्वादुपकर्तृत्वम् ? देवतात्वादुपकारसमर्थत्वम् ।

1 भाग० ०कदनाद्ग्रसतां । 2 भाग० ०पवर्गशरणं ।

विरिञ्चिगीता इति सदनुष्ठितोऽयं मार्ग इत्युक्तम् । ते पदयुगलमालयः आश्रयो येषां हंसानां योगिनां तेषां सङ्गो यस्य स तथा । तत्सङ्गाद्धि कथानिर्वाहः । (भाग० ७।९।१८) ॥१४॥

बालस्य नेह शरणं पितरौ नृसिंह
नार्तस्य चागदमुदन्वति मज्जतो नौः ।
तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्ट-
स्तावद्विभो तनुभृतां त्वदुपेक्षितानाम् ॥१५॥

ननु दुःखस्य प्रतीकारः क्रियताम् किं दास्येनेत्यत आह ' बालस्येति । हे नृसिंह इह लोके । यः पदार्थः । इह दुःखे । शरणम् रक्षिता । इष्टः सम्मतः । स त्वदुपेक्षितानाम् अञ्जसा निश्चितं न भवत्येव । तावदवधारणे । तस्यैव प्रपञ्चः ' बालस्येत्यादि । आर्तो रोगी । अगदमौषधम् । तत्प्रतिविधिस्तत्प्रतीकारः । (भाग० ७।९।१९) ॥१५॥

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः
क्वेदं कलेवरमशेषरुजां विरोहः ।
निर्विद्यते न तु जनो यदपीति विद्वान्
कामानलं मधुलवैः शमयन् दुरापैः ॥१६॥

ननु विरक्तं दुःखं न बाधतेऽतो विरक्तेन भवितव्यमिति चेत्तत्राह ' कुत्रेति । आशिषो विषयाः । मृगतृष्णिकारूपाः मरीचिकावभासाः । तथा हि— मृगतृष्णा हि रविरश्मिरूपापि जलरूपावभासते । तथा विषया दुःखरूपा अपि सुखरूपा इव दृश्यन्त इति भावः । विरोहः प्ररोहस्थानम् । यदपि यद्यपि । इति विद्वान् एवं वेत्ति । तथापि न निर्विद्यते न विरज्यते । कामानलमिच्छाग्निम् । मधुतुल्यत्वाद् मधु सुखम् तस्य लवैर्लेशैः । (भाग० ७।९।२५) ॥१६॥

काहं रजःप्रभवः ईश तमोऽधिकेऽस्मिन्
जातः सुरेतरकुले क्व तवानुकम्पा।
न ब्रह्मणो न तु भवस्य न वै रमाया
यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥१७॥

कृपणवत्सल इत्युक्तम् तदेव दर्शयति ' काहमिति। रजःप्रभवो रजोविकारः। सुरेतरा दैत्याः। का सा अनुकम्पा यन्मे शिरसि पद्मकररूपः प्रसादोऽर्पितः। ब्रह्मादिभिस्त्रिभिः षष्ठ्यन्तैः पुत्रमित्रकलत्रेष्वपि प्रेमपात्रेष्वपि नैवंविधं प्रसादं कृतपूर्वो भवनित्युक्तम्। (भाग० ७।९।२६) ॥१७॥

नैषा परावरमतिर्भवतो ननु स्याज्-
जन्तोर्यथात्मसुहृदो जगतस्तथापि।
संसेवया सुरतरोरिव ते प्रसादः,
सेवानुरूपमुदयो न परावरत्वम् ॥१८॥

ननु कृपालुश्चेत् कथं फलवैषम्यम् ' तत्राह ' नैषेति। हे भगवन् एषा परावरमतिः अयमुत्तमः अयमधम इति बुद्धिः। जन्तोर्यथा क्लेशकर्माद्युपेतस्य। त्वं हि जगत आत्मना स्वेनैव सुहृत् न तु निमित्तवशात्। तथापि सेवकस्यैव तत् फलम्। तच्च सेवानुरूपम्। न तु परावरत्वमुदये फले कारणम्। एतच्च सुरतरौ दृष्टम्। स हि पक्षपातहीनोऽप्युपसर्पतामेव यथा फलं प्रसूते न तु दूरस्थानाम्। सेवाकृतं वैषम्यं फलतीति कृपालुत्वम् ' अतो न विरोध इत्यर्थः। (भाग० ७।९।२७) ॥१८॥

एवं जनं निपतितं प्रभवाहिकूपे
कामाभिकाममनु यः प्रपतन् प्रसङ्गात्।
कृत्वात्मसात् सुरर्षिणा भगवान् गृहीतः
सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥१९॥

तद्भक्तसेवापि फलदेत्याह ' एवमिति । प्रभवाहिकूपे संसारे काल-सर्परूपे पतितं जनमनु जनेन सह प्रसङ्गात् प्रपतन् । सुरर्षिणा नारदेन गृहीत उद्धृतः । कामाभिकामं विषयाभिलाषिणम् । (भाग० ७।६।२८) ॥१६॥

मत्प्राणरक्षणमनन्त पितुर्वधश्च
मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ।
खड्गं प्रगृह्य यदवोचदसद्विधित्सु-
स्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥२०॥

मदिति । स्वभृत्यो हिरण्यकशिपुः स एव ऋषिः तस्य वाक्यम् । ऋतं सत्यम् । ऋत्यक[1] इति प्रकृतिभावः । किन्तद्वाक्यं यदसद्विधित्सुरवोचत् ' अहं ते कं शिरो हरामि ' मदन्यो य ईश्वरोऽस्ति स त्वामवत्विति । (भाग० ७।६।२६) ॥२०॥

नैतन्मनस्तव कथासु विकुण्ठनाथ
संप्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं हरषशोकभयैषणार्तं
तस्मिन् कथं तव गतिं विमृषामि दीनः ॥२१॥

ननु तथापि किं दास्येन मत्स्वरूपमात्मनि विमृष्यताम् ' तत्राह ' नैतदिति । त्वत्कथासु न प्रीयते न तु तुष्यति । यतो दुरितैः पापैर्दुष्टम् अत एव तीव्रं यथा स्यात् तथा असाधु । एषणाः पुत्रैषणाद्याः । अतस्तस्मिन् कथं तव गतिं स्वरूपम् विमृषामि । (भाग० ७।६।७६) ॥२१॥

जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता
शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्ति-
र्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥२२॥

---

1 पाणिनिः ६।१।१२८

एवमार्ततामेवाह । जिह्वेति । मा माम् । अवितृप्ता क्षुधिता । घ्राणो नासासञ्चारी वायुः । अन्यतो गन्धे । दृक् चक्षुः । कर्मशक्तिः कर्मेन्द्रियाणि । (भाग० ७।६।४०) ॥२२॥

एवं स्वकर्मपतितं भववैतरण्या-
मन्योन्यजन्ममरणाशनभीतभीतम् ।
पश्यन् जनं स्वपरविग्रहवैरमैत्रं
हन्तेति पारचर पीपृहि मूढमद्य ॥२३॥

को न्वत्र तेऽखिलगुरो भगवन् प्रयास
उत्तारणेऽस्य भवसम्भवलोपहेतोः ।
मूढेषु वै महदनुग्रह आर्तबन्धो
किं तेन ते प्रियजनाननुसेवतां नः ॥२४॥

इदानीं सर्वार्थं प्रार्थयते श्लोकद्वयेन । एवमिति । हे पारचर परतीरस्थ । भववैतरण्यां संसारप्रवाहे पतितं जनम् । इति एवं पश्यन् यथा मां कृपया पश्यसि तथेत्यर्थः । पीपृहि कृपावलोकेन पालयेत्यर्थः । अन्योऽन्यं परस्परम् । जन्मादिभ्यो भीतं कालाच्च भीतम् । स्वपरविग्रहयोः स्वपरशरीरयोर्यथासम्भवं वैरमैत्रे यस्य तम् । (भाग० ७।६।४१) ॥२३॥

अस्य जगतः । भवसम्भवलोपाः सृष्टिस्थितिलयाः । महतामनुग्रहश्च मूढेषु । ननु किमन्यप्रसङ्गेन त्वां तावदुत्तारयिष्यामीति चेत्तत्राह । किं तेनेति । तेन मोक्षेण किं न किमपीत्यर्थः । वयं त्वद्भृत्यसेवयैव कृतार्था इत्यभिप्रायः । तत्र च त्रस्तोऽस्मीत्येतदारभ्य प्रकरण एव भयानको रसः । प्रह्लादो नृसिंहम् । (भाग० ७।६।४२) ॥२४॥

श्रीसदस्याः ।

उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्र-
व्यालान्विष्टे विषयमृगतृष्ण्यात्मगेहोरुभारः[1] ।

---

1 विषयमृगतृष्णात्मेत्यादिः पाठो मुद्रापितभागवतेषूपलभ्यमानः प्रामादिकः ।

द्वन्द्वश्वभ्रे खलमृगभये शोकदावे ज्ञसार्थः[1]
पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥२५॥

उत्पत्तीति। उत्पत्तिः संसार। अशरणे रक्षकहीने। व्यालाः सर्पाः। अन्विष्टो दृष्टः। मृगतृड् मृगतृष्णा। आत्मा देहो गेहश्च उरुर्भारो यस्य। द्वन्द्वानि हर्षविषादादीनि। श्वभ्रं गर्तः। मृगाः सिंहादयः। ज्ञाः पण्डितम्मन्याः तेषां सार्थः सङ्घः। उपसृष्ट उपद्रुतः। कदा याति कोऽपि कदापि न याति। मार्गान्तरमतिजत्वादित्यर्थः। अत्र च घोरसंसारदर्शनात् सदस्येषु भयमुत्पन्नमिति शरणदेत्यनेन व्यञ्जितम्। भीतानां हि शरणेच्छा। सदस्या भगवन्तम्। (भाग० ४।७।२८) ॥२५॥

मुचुकुन्दः।

चिरमिह वृजिनार्तस्तप्यमानोऽनुतापै-
रवितृषषडमित्रो लब्धशान्तिः कथञ्चित्।
शरणद [2]शमुपेतस्त्वत्पदाब्जं परात्म-
न्नभयमृतमशोकं पाहि मापन्नमीश ॥२६॥

चिरमिति। वृजिनं दुःखम्। अनुतापैः पश्चात्तापैः। अवितृषाः षट् इन्द्रियाण्यमित्रा यस्य। शं सुखरूपम्। अभयमद्वितीयत्वात्। ऋतमबाध्यत्वात्। अशोकमानन्दघनत्वात्। आपन्नं शरणागतम्। मुचुकुन्दः श्रीकृष्णम्। (भाग० १०।५१।५७) ॥२६॥

रुद्रज्वरः।

तप्तोऽहं ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥२७॥

---

1 शोकदावेऽज्ञसार्थ इति स्वामिसम्मतः पाठः। 2 समुपेत इति स्वामिधृतः पाठः।

तप्तोऽहमिति । शान्तः सन्नुग्रः शान्तोग्रः तेन शीतेनेत्यर्थः । रुद्रज्वरः श्रीकृष्णम् । (भाग० १०।६३।२८) ॥२७॥

नारदः ।

दृष्टं तवाङ्घ्रियुगलं जनतापवर्गं
ब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं
ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥२८॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां भयानकरसः ।
इति पञ्चदशोऽध्यायः ॥१५॥

एवं भयानकरसेन भजतोऽनिष्टहानिरिष्टाप्तिश्च स्यादित्याह, दृष्टमिति । यत्तवाङ्घ्रियुगलं ध्यायंश्चरामि तद्दृष्टम्, इतोऽन्यत् किं प्रार्थनीयमस्तीत्यभिप्रायः । जनानां समूहो जनता, तस्यापवर्गं कैवल्यम् । ब्रह्मानन्दादपि सुतरामभिलषणीयमित्याह, ब्रह्मादिभिरिति । मुक्तानां स्पृहणीयत्वमुक्त्वा मुमुक्षूणां तदाह, संसारेति । यद्यपि मदङ्घ्रिदर्शनं परमपुरुषार्थः, जातश्च तत्, तथापि किञ्चिदाह्रियतामिति चेत्तत्राह, अनुगृहाणेति । स्मृतेर्विपरिलोपो मा भूदित्यर्थः । फलकीर्तनार्थमेवास्य श्लोकस्येह पाठः, अन्यथा भयशङ्कयोरभावादनर्थकः पाठः स्यात् । नारदः श्रीकृष्णम् । (भाग० १०।६६।१८) ॥२८॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां भयानकरसः ।
समाप्तोऽयं पञ्चदशोऽध्यायः ॥१५॥

षोडशोऽध्यायः

वीभत्सरसे पुरूरवाः ।

क्वायं मलीमसः कायो दौर्गन्ध्याद्यात्मकोऽशुचिः ।
क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः ॥१॥

अथाहृद्यव्रणपूतिगन्धकृमिकीटादीनां दर्शनश्रवणादिविभावमङ्गसंकोचहृल्लासनासामुखविवराच्छादननिष्ठीवनाद्यनुभावमपस्मारौग्र्यमोहमदादिव्यभिचारिणं जुगुप्सास्थायिभावं वीभत्समाह[1] । वीभत्सेति ।

क्वायमित्यादि । मलीमसो मलिनः । सौमनस्यं पुष्पतुल्यत्वम् । तच्च गन्धेन दौर्गन्ध्यादिव्यतिरेकात् । अध्यासः अतद्रूपे तद्रूपबुद्धिः । (भाग० ११।२६।१८) ॥१॥

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः ।
किमात्मनः किं सुहृदामिति यो नावसीयते ॥२॥

नावसीयते न निश्चीयते । अत्र पित्रादीनां क्रमाज्जननोपभोगक्रयदाहभक्षणाधिष्ठानोपयोगाः स्वत्वहेतवः । (भाग० ११।२६।१९) ॥२॥

तस्मिन् कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते ।
अहो सुभद्रं सुनसं सुस्मितञ्च मुखं स्त्रियाः ॥३॥

तस्मिन्निति । तस्मिन्ननिश्चिते । अमेध्ये अपवित्रे । तुच्छेन अल्पेन निष्ठा नाशोऽस्येति तुच्छनिष्ठम् । विषज्जते विशेषात् सङ्गं करोति । तदाह अहो इत्यादि । (भाग० ११।२६।२०) ॥३॥

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ।
विण्मूत्रपूये रमतां कृमीणां कियदन्तरम् ॥४॥

---

1 हेमचन्द्रकृतकाव्यानुशासने द्वितीयेऽध्याये १५श-सूत्रवृत्तिर्द्रष्टव्या ।

विडादीनां त्रयाणां द्वन्द्वैक्यम् । त्वगादीनां सप्तानां संहतिः सङ्घातो यस्मिन् विन्मूत्रपूये तत्र रमतां प्राणिनाञ्च कृमीणाञ्च कियदन्तरम् ' न कियदपीत्यर्थः । (भाग० ११।२६।२१) ॥४॥

पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः ।
आत्मारामेश्वरमृते भगवन्तमधोक्षजम् ॥५॥

पुंश्चली ऊर्वशी । नु अहो । आत्मनि स्वस्वरूपे सदानन्दघने आरमन्ति सर्वकालमभिव्याप्य क्रीडन्ति मनो व्यापारयन्ति ये ते तथा ' जीवन्मुक्ता-इत्यर्थः ' तेषामीश्वरं नित्यमुक्तत्वात् ।

अत्र क्वायमिति क्षेपार्थेन जुगुप्सा गम्यते । तस्या देहदोषा उद्दीपन-विभावाः । चिद्धिकारादयोऽनुभावाः । सञ्चारिणस्तूह्याः । जगुप्सायुतस्य चेतसो भगवद्विषयत्वाद् भक्तिरसत्वम् । ऐलः श्रीकृष्णम् । (भाग० ११।२६।१५) ॥५॥

अवधूतः ।

देहो गुरुर्मम विरक्तिविवेकहेतु-
र्बिभ्रत् स्म सत्त्वनिधनं सततार्त्युदर्कम् ।
तत्त्वान्यनेन विमृशामि यथा तथापि
पारक्यमित्यवसितो विचराम्यसङ्गः ॥६॥

देह इत्यादि । कुतो गुरुः ' यतो विरक्तिहेतुत्वयुक्तं सत्त्वनिधनं जन्मनाशौ बिभ्रदिति । उदर्क उत्तरकालः फलम् । विवेकहेतुत्वमाह तत्त्वा-नीति । तत्त्वानि पुरुषादीनि । यथा यथावत् । यद्यप्येवं तथापि पारक्यं श्वशृगालाद्भिर्भक्ष्यमिदम् इति निश्चितोऽयम् । अतोऽसङ्गो ममत्वहीनोऽहं विचरामि । (भाग० ११।६।२५) ॥६॥

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्
पुष्णाति यत्प्रियचिकीर्षया वितन्वन् ।

स्वान्ते सकृच्छ्रमवरुद्धधनः स देहः
सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा ॥७॥

जन्मनाशवत्तामेवाह । जायेति । यस्य देहाभिमानिन आत्मनः प्रियचिकीर्षया । वितन्वन् सम्पादयन् । पुष्णाति सकृच्छ्रं यथा स्यात्तथा । अवरुद्धमर्जितं धनं येन । स्वान्ते आयुषः समाप्तौ । स देहः अस्य एतत्सजातीयस्य देहान्तरस्य । बीजं पुण्यपापे । अवसीदति क्लिश्यति । वृक्षधर्मा यथा वृक्षो वृक्षान्तरजनकं बीजं प्रसूय नश्यति तथाऽयमित्यर्थः । (भाग० ११।६।२६) ॥७॥

लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्यु याव-
न्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥८॥

विवेकहेतुत्वं पुनराह लब्ध्वेति । मानुष्यं मनुष्यत्वम् । बहूनां जन्मनामन्ते । यद्यप्यनित्यं तथाप्यर्थदं मोक्षदं मोक्षादन्यस्यानर्थत्वात् । निःश्रेयसाय यतेत । अनुमृत्यु मृत्योः सम्मुखम् । ननु विषयार्थमेव प्रयततां किमन्येन । तत्राह । विषय इति । सर्वतो नरकादावपि सुलभत्वात् । अत्र विभावादिविवेकः प्राग्वत् । अवधूतो यदुम् । (भाग० ११।६।२६) ॥८॥

पिङ्गला ।

सन्तं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयाधिशोक-
मोहप्रदं तुच्छमहं भजेऽज्ञा ॥९॥

सन्तमिति । अहमज्ञा । इममात्मानं विहाय अन्यं रमणं भजामि । सेव्यासेव्यत्वद्योतनाय द्वयोर्विशेषणानि । वित्तं विचारः । विद विचारणे[1] इत्यस्य भावे निष्ठायां रूपम् । नुदविदोन्देति[2] वानत्वम् । मोहः भोगासङ्गाद्विवेकाभावः । (भाग० ११।८।३१) ॥९॥

---

1 धातुपाठः ७।१३ 2 पाणिनिः ८।२।५६

अहो मयात्मा परितापितो वृथा
साङ्केत्यवृत्त्यातिविगर्ह्यवार्तया ।
स्त्रैणान्नराद्याऽर्थतृषोऽनुशोच्यात्
क्रीतेन वित्तं रतिमात्मनेच्छती ॥१०॥

अज्ञत्वमेवाह अहो इति । आत्मा चित्तम् ' साङ्केत्यवृत्त्या वेश्याधर्मेण । अतिविगर्ह्यया वार्तया जीविकया । दुर्लभस्य वस्तुनः प्राप्तौ सुखं भवति तदपि नास्तीत्याह ' स्त्रैणादिति । स्त्रीणां वश्यान्नरान्न तु देवादित्यर्थः । न च वित्तमपीत्याह ' अर्थेति । अर्थतृष्णायुक्तात् कृपणादित्यर्थः । न चैवं-विधेनापि सह सदैव सम्भोगोऽस्तीत्याह ' अनुशोच्यादिति ' मृत्युग्रस्ता-दित्यर्थः । क्रीतेन विक्रीतेन । आत्मना देहेन । रतिं वित्तञ्चेच्छती याऽहं तयेत्यर्थः । (भाग० ११।८।३२) ॥१०॥

यदस्थिभिर्निर्मितवंशवश्य-
स्थूणं त्वचा रोमनखैः पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्-
विण्मूत्रपूर्णं मदुपैति काऽन्या ॥११॥

यत्राविवेकात् पूर्वं वस्तुबुद्धिः तस्यैव विचार्यमाणत्वे वीभत्सतेत्याह ' यदित्यादि । एतदगारं गृहं मदन्या का उपैति न कापीत्यर्थः । एतत् किं भूतमित्याह ' वंशा वेणवः ' वश्यं तदाधारभूतं काष्ठं ' स्थूणाः स्तम्भाः । पिनद्धं बद्धम् । क्षरन्ति नव द्वाराणि यस्मिन् तत् । पिङ्गला । (भाग० ११।८।३३) ॥११॥

मुचुकुन्दः ।

विमोहितोऽयं जन ईश मायया
तदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते
गृहेषु योषित् पुरुषश्च वञ्चितः ॥१२॥

विमोहित इति । हे ईश । जनो योषित् पुरुषश्चेति द्विविधो जनः । तदीयया मायया विमोहितो वञ्चितश्च । विमोहितत्वादुचिते न प्रवर्तते । वञ्चितत्वादनुचिते प्रवर्तते । तदेव पदद्वयेनाह । अनर्थे प्रपञ्चे दृक् यस्य स तथा । दुःखस्य प्रभवो जन्म येषु तेषु । (भाग० १०।५१।४५) ॥१२॥

लब्ध्वा जनो दुर्लभमत्र मानुषं
कथञ्चिदव्यङ्गमयत्नतोऽनघ ।
पादारविन्दं न भजत्यसन्मति-
र्गृहान्धकूपे पतितो यथा पशुः ॥१३॥

विमोहितत्वमेव युनः प्रपञ्चयति लब्ध्वेति । कथञ्चित् कुतश्चित् पुण्यात् । अव्यङ्गम् अविकलम् । असति विषये मतिर्यस्य । (भाग० १०।५१।४६) ॥१३॥

ममैष कालोऽजित निष्फलो गतो
राज्यश्रियोन्नद्धमदस्य भूपतेः ।
मर्त्यात्मबुद्धेः सुतदारकोशभू-
ष्वासज्जमानस्य दुरन्तचिन्तया ॥१४॥
कलेवरेऽस्मिन् घटकुड्यसन्निभे
निरूढमानो नरदेव इत्यहम् ।
वृतो रथेभाश्वपदात्यनीकपै-
र्गां पर्यटंस्त्वागणयन् सुदुर्मदः ॥१५॥

अहमपि तथेति द्वाभ्यामाह । ममेति । उन्नद्ध उत्कटो मदो गर्वः । मर्त्ये देहे आत्मबुद्धिर्यस्य । कोशोऽर्थसञ्चयः । चिन्तया आसज्जमानस्यासङ्गं प्राप्यमाणस्य ।

अहमिति नरदेव इति च निरूढाभिमानो गां भुवं पर्यटन् त्वा त्वाम् अगणयन् दुर्मदोऽस्मीत्यर्थः । (भाग० १०।५१।४७।४८) ॥१४-१५॥

प्रमत्तमुच्चैरितिकृत्यचिन्तया
प्रवृद्धलोभं विषयेषु लालसम् ।
त्वमप्रमत्तः सहसाभिपद्यसे
क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ॥१६॥
पुरा रथैर्हेमपरिष्कृतैश्चरन्
मतङ्गजैर्वा नरदेवसंज्ञितः ।
स एव कालेन दुरत्ययेन ते
कलेवरो विट्कृमिभस्मसंज्ञितः ॥१७॥

दुर्मदानाञ्च कामभयं द्वाभ्यामाह । प्रमत्तेति । इदं कृत्वेदं करिष्यामीति चिन्तया प्रमत्तं प्रमादिनम् । उच्चैरत्यर्थं लालसं कामिनम् । सावधानस्त्वम् । सहसा वेगन । क्षुधा लेलिहानः सृक्कभागम् अभिपद्यसे प्राप्नोषि ।

परिष्कृतैर्भूषितैः । मतङ्गजा हस्तिनः । ते तव कालेन । श्वादिभक्षिते विट्संज्ञा । दग्धे भस्मसंज्ञा । संज्ञित इति ।तारकादित्वादितच्[1] । (भाग० १०।५१।४६।५०) ॥१६।१७॥

निर्जित्य दिक्चक्रमभूतविग्रहो
वरासनस्थः समराजवन्दितः ।
गृहेषु मैथुन्यसुखेषु योषितां
क्रीडामृगः पूरुष ईश नीयते ॥१८॥
करोति कर्माणि तपःसुनिष्ठितो
निवृत्तभोगस्तदपेक्षया ददत् ।
पुनश्च भूयेयमहं[2] स्वराडिति
प्रवृद्धतर्षो न सुखाय कल्पते ॥१९॥

मनुष्यत्वेऽपि स्त्रीप्रसङ्गः काम्यकर्मानुष्ठानं वा जुगुप्सितमित्याह निर्जित्य दिगिति द्वाभ्याम् । मैथुन्यं मिथुनस्य कर्म । नीयते नितरामीयते प्राप्यत इत्यर्थः ।

1 पाणिनिः ५।२।३६ ।　　2 भूयासमहमिति वीरराघवसम्मतः पाठः ।

तपःसुनिष्ठितो निष्ठां प्राप्तः । तदपेक्षया भोगापेक्षया । निवृत्तभोगो ददद् दानञ्च करोति । पुनर्जन्मान्तरे । महान् स्वराट् भूयेयं भवेयमिति प्रवृद्धाभिलाषो न सुखाय कल्पते । मुचुकुन्दः श्रीकृष्णम् । (भाग० १०।५१।५१'५२) ॥१८'१९॥

जरासन्धबद्धराजानः ।

त एव कृष्णाद्य गभीररंहसा
दुरन्तवीर्येण विचालिताः श्रियः ।
कालेन तन्वा भवतोऽनुकम्पया
विनष्टदर्पाश्चरणौ स्मराम ते ॥२०॥

अथो न राज्यं मृगतृड्निरूपितं[3]
देहेन शश्वत् पतता रुजां भुवा ।
उपासितव्यं स्पृहयामहे विभो
क्रियाफलं प्रेत्य च कर्णरोचनम् ॥२१॥

एवं बीभत्सरूपेण भक्तिरसमनुभवतो भगवत्स्मृतिरन्या स्मृतिश्च स्यादिति क्रमाद्द्वाभ्यामाह ' त एवेति । हे कृष्ण ! ये प्रागैश्वर्यमदान्धा अभूम त एव वयम् अद्य ते चरणौ स्मराम ' यतो विनष्टदर्पाः । तदेव कुतः ' यतस्तव तन्वा कालेन । श्रियः सकाशाद् विचालिताः । (भाग० १०।७३।१३) ॥२०॥

अथो त्वच्चरणस्मरणानन्तरम् । मृगतृषा मरीचिकया निरूपितं व्याख्यातम् ' तत्तुल्यमित्यर्थः । रुजां रोगाणां भुवा आश्रयेण । अनेन भोज्यभोजकयोरप्यनित्यत्वमुक्तम् । उपासितव्यं न स्पृहयामहे सेव्यबुद्ध्या न गृह्णीम इत्यर्थः । यच्च प्रेत्य परलोकं गत्वा । क्रियाया ज्योतिष्टोमादेः फलम् ' तदपि न

---

3 मृगतृष्णिरूपितमिति स्वामिसम्मतः पाठः । मृगतृड्निरूपितमित्ययं पाठः श्रीजीवगोस्वामिभिरपि वैष्णवतोषण्यां दीपदेवपाठ इत्युल्लिखितो दृश्यते ।

स्पृहयामहे । यतस्तत् कर्णरोचनं केवलं श्रवणमात्रप्रीतिजनकं न तु भोगक्षमम् । अविशुद्धित्वयादिदोषदूषितत्वादिति भावः । राजानः श्रीकृष्णम् । (भाग० १०।७३।१४) ॥२१॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां बीभत्सरसः । इति षोड़शोऽध्यायः ॥१६॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां बीभत्सरसः । समाप्तोऽयं षोडशोऽध्यायः ॥१६॥

सप्तदशोऽध्यायः

शान्तरसे नारदः ।

तत्रान्वहं कृष्णकथाः प्रगायता-
मनुग्रहेणाश्रृणवं मनोहराः ।
ताः श्रद्धया मेऽनुपदं विश्रृण्वतः
प्रियश्रवस्यङ्ग ममाभवद्रतिः ॥१॥

अथ वैराग्यसंसारभीरुतातत्त्वज्ञानवीतरागपरिशीलनपरमेश्वरानुग्रहतपोवन-विविक्तसेवादिविभावं यमनियमाध्यात्मशास्त्रचिन्तनसर्वभूतसमत्वदर्शनपरार्थकारित्वाद्यनुभावं धृतिस्मृतिमतिनिर्वेदहर्षादिव्यभिचारिणं शमस्थायिभावं शान्तरसमारभते।[1] शान्तेति ।

तत्रेत्यादि । तत्र मुनिसमीपे । अश्रृणवं श्रुतवानहम् । अनुपदं पदे पदे । पदार्थोऽपि न तिरोहित इत्यर्थः । प्रियश्रवसि श्रीकृष्णे । रतिर्भक्तिः । श्रद्धया मे रतिः । ममेत्यकृत्रिमत्वार्थम् । अङ्ग अहो व्यास ! (भाग० १।५।२६) ॥१॥

तस्मिंस्तदा[2] लब्धरतेर्महामुने[3]
प्रियश्रवस्यस्खलिता मतिर्मम ।
ययाहमेतत् सदसत् स्वमायया
पश्ये मयि ब्रह्मणि कल्पितं त्विदम्[4] ॥२॥

ननु किं रत्येति चेत्तत्राह । तस्मिन्निति । तस्मिन् श्रीकृष्णे प्रियश्रवसि । अस्खलिता मतिः निःसंशयं ज्ञानम् । यत्रैव रतिस्तत्रैव मतिरित्यर्थः । यया मत्या ।

---

1 हेमचन्द्रकृत-काव्यानुशासने द्वितीयेऽध्याये १७श-सूत्रं द्रष्टव्यम् ।

2 लब्धरुचेरिति स्वामि पाठः । 3 महामते इति क्वचिद्भागवते ।

4 त्विदमित्यत्र परे इति स्वामिसम्मतः पाठः ।

सदसत् स्थूलसूक्ष्मं रूपद्वयम् । ममैव मायया मय्येव ब्रह्मरूपे कल्पितम् आरोपितम्' रज्जुभुजङ्गवत् । पश्ये अद्यापि पश्यामि । एतदिदमितिपदद्वयेन यथाऽन्यत्र सत्यो भुजङ्गो रज्ज्वामारोपितो न तथाऽन्यत्र सत्यं रूपद्वयं ब्रह्मण्यारोपितम्' किन्त्विदमेव'इत्युक्तम् । अनिर्वाच्यमित्यर्थः । (भाग० ११५१२७) ॥२॥

एवं[1] शरत्प्रावृषिकावृतू हरे-
र्विश्शृण्वतो मेऽनुसवं यशोऽमलम् ।
संकीर्त्यमानं मुनिभिर्महात्मभि-
र्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥३॥

महानुभावप्रसङ्गादचिरेणैव तत्त्वज्ञानमुत्पद्यत इत्याह ' एवमिति । अनुसवम् अवसरेऽवसरे । किम्भूता भक्तिः ' आत्मनोऽन्तःकरणस्य रजस्तमसी अपहन्तीति' तथा शुद्धसत्त्वात्मिकेत्यर्थः । ज्ञानस्यैव सा परा काष्ठा यस्यामभ्युदितायां प्रत्युदितख्यातिरेवं मन्यते [2]प्राप्तं मे[2] प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः छिन्नः क्लिष्टो वा भवसंक्रमो यस्याविच्छेदाज्जनित्वा म्रियते मृत्वा च पुनर्जायत इति ।[3] अत्र च

ते मय्यपेताखिलचापल[4]

इति पूर्वश्लोकेन सकलचापलत्यागात्मा शमः स्थायी उक्तः । सत्प्रसङ्गः[5] श्रद्धा कथाश्रवणञ्चेत्युद्दीपनविभावाः । भगवानालम्बनम् । सर्वत्रात्मैक्यकथनमनुभावः । अस्खलिता मतिर्व्यभिचारी । एवमेष विभावानुभावव्यभिचारिसंयोगाद्रसः शान्तो निष्पद्यते ।

न च शमस्य सर्वचित्तवृत्त्युपरमात्मकत्वेन रत्याद्यभावरूपत्वाद्भावत्वं विप्रतिषिद्धमिति शङ्क्यम्' प्रशान्तवाहितारूपवृत्तिसद्भावेन भावत्वोपपत्तेः । प्रशान्तमेव हि चित्तं तत्तत्कारणवशाद्रतिहासादिपरिणाममनुभवतीति रत्यादीनां मूलरूपत्वादस्य नाभावरूपत्वम् । न हि शक्यं वक्तुं घटाभावो

1 इत्यर्थमिति स्वामिसम्मतः पाठः ।　　2 क-संज्ञकमातृकायां प्राप्तमेवेति पाठः ।
3 योगसूत्रीयं (१।१६) व्यासभाष्यं द्रष्टव्यम् ।　　4 भाग० ११५१२४
5 सुसङ्गेति मातृकादृष्टः पाठः ।

मृत्तिका पटाभावस्तन्तव इति । निरतिशयानन्दहेतुत्वेन चास्य रसेषु श्रैष्ठ्यम् । यदाहुः

यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥[1] इति ।

ननु

एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना ।[2]

इति वदतो भरतस्य शृङ्गारादावष्टके रसत्वमभिप्रेतम् । न त्वस्मिन्नवमे । तत् कथमुच्यते । सत्यम् । किन्तु नाट्यविषयेऽष्टानामेव रसत्वं नान्यस्येति तस्याभिप्रायः । अत एव

अष्टौ नाट्ये रसाः स्मृताः[3]

इति तेनैवोक्तम् । सर्वस्यैव शान्तापलाप इति तु व्याख्याने

तुष्यन्ति तरुणाः कामे मोक्षे चापि विरागिणः ।[4]
धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम् ।[5]

इत्यादि तस्यैव वचनं विरुध्येत । अत एवायमभिनवगुप्तपादैर्महता संभ्रमेण प्रतिष्ठापितः ।[6] महाभारतादौ चास्यैव साम्राज्यम् ।

ननु तथाप्यस्य विषयजुगुप्सारूपत्वाद् बीभत्सेऽन्तर्भावो युज्यते इति चेन्न । इह जुगुप्सायाः सञ्चारित्वेनावस्थापितत्वात् पर्यन्तनिर्वाहे तस्य मूलत एव विच्छेदात् । यत्र तु बीभत्समानो विरज्यते तत्र बीभत्स एव ।

लालां वक्त्रासवं वेत्ति मांसपिण्डौ पयोधरौ ।
मांसास्थिपिण्डे जघने जनः कामग्रहातुरः ॥[7]

---

1 महाभारतम् (कुम्भघोणम्), शान्तिपर्व, मोक्षधर्मः १७३,४७ ।

2 नाट्यशास्त्रम् ६।१७ । 3 नाट्यशास्त्रम् ६।१६ ।

4 काशीतचौखम्बा-ग्रन्थमालायां प्रकाशिते नाट्यशास्त्रे (२७।६०) मोक्षेष्वथ विरागिण इति चतुर्थचरणपाठः । अभिनवभारत्यां (वडोदाग्रन्थमाला-प्रकाशितायां ३४०पृ: तु मोक्षे चापि विरागिण इत्येवंरूप एवोद्धृतः । 5 नाट्यशास्त्रम् (वडोदा) १।१०९

6 नाट्यशास्त्रस्य षष्ठाध्यायटीकाया अन्तिमभागे (वडोदा शान्तरसविचारो द्रष्टव्यः ।

7 सुभाषितग्रन्थे धृतोऽयं श्लोकः ।

तथा

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरक्रमेः कस्य जायते ॥[1]

इति ।

नाप्यस्य धर्मवीरेऽन्तर्भावः । तस्याभिमानमयत्वेन व्यवस्थानात् । अस्य चाहङ्कारप्रशमैकरूपत्वात् । तथापि तयोरेकत्वपरिकल्पने वीररौद्रयोरपि तथाप्रसङ्गः । धर्मवीरादीनां चित्तवृत्तिविशेषाणां सर्वाकाराहङ्काररहितत्वे शान्तरसभेदत्वमिति व्यवस्थाप्यमाने न कश्चिद्विरोधः ।[2]

तस्माद्बीभत्सादिभ्यः पृथग्भूतः शमस्थायिभाव उत्तमप्रकृतिरहङ्कार-शैथिल्यात्मकोऽस्तु शान्तनामा रस इत्यनिच्छताऽप्यवश्यमभ्युपेतव्यम् । नारदो व्यासम् । (भाग० १।५।२८) ॥३॥

कपिलः ।

सतां प्रसङ्गान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ।।४।।

सतामित्यादि । वीर्यं महिमानं सम्यग् वेदयन्तीति वीर्यसंविदः । वान्ति पर्णशुषो वाता इतिवदन्तर्भावितनिजर्थोऽत्र विदिः । रसायना अमृतीभूताः । तज्जोषणात् कथासेवनात् । अपवर्गस्य मोक्षस्य वर्त्मनि मार्गे मयि साकारे । प्रथमं श्रद्धा प्रसन्नचित्तत्वम् । ततो रतिरासक्तिः । ततो भक्तिः परमप्रेमात्मिका यल्लाभेन ब्रह्मादिपदान्यपि तृणाय मन्यन्त इत्यनुक्रमः । (भाग० ३।२५।२५) ॥४॥

भक्त्या पुमान् जातविराग ऐन्द्रियाद्-
दृष्टश्रुतान्मद्रचनानुचिन्तया ।

---

1 श्लोकोऽयं मम्मटकृतकाव्यप्रकाशे (७ उः । ३०४ श्लोः) हेमचन्द्रकृतकाव्यानुशासनवृत्तौ च (२ अः । ६ सू० ३०४ श्लोः) दृश्यते ।

2 हेमचन्द्रकृत-काव्यानुशासन-सूत्रवृत्तिः (अः २ । सू १७) द्रष्टव्या ।

चित्तस्य यत्तो ग्रहणे योगयुक्तो
यतिष्यते ऋजुभिर्योगमार्गैः ॥५॥

तदेवाह भक्त्येत्यादि। ऐन्द्रियमिन्द्रियजन्यं सुखम्। दृष्टमैहिकम्। श्रुतं पारलौकिकम्। मम रचनायाः सर्गविसर्गादेः अनुचिन्ता यस्यां भक्तौ। ऋजुभिर्योगमार्गैर्यमादिभिः। चित्तस्य ग्रहणे वशीकरणे। यत्तः सावधानः सन् यतिष्यते। ततो योगयुक्तः समाधिसम्पन्नो भवतीत्यर्थः। कपिलो देवहूतिम्। (भाग० ३।२५।२६) ॥५॥

पुंसां किलैकान्तधियां स्वकानां
याः सम्पदो दिवि भूमौ रसायाम्।
न राति यत्र स्मय[1] उद्वेग आधि-
र्मदः कलिर्व्यसनं सम्प्रयासः ॥६॥

पुंसामित्यादि। एकस्मिन्नीश्वरे अन्तो बन्धनं यस्याः सा धीर्येषां ते तथा। अति बन्धने इति भूवादौ[2]। भगवन्निष्ठानामित्यर्थः। रसा पातालान्ता। तेषां न राति न ददाति। यत्र यासु सम्पत्सु। स्मयो गर्वः कुलैश्वर्यावलेपादन्येषामनादरः। उद्वेगश्चित्तानवस्थितिः। आधिश्चिन्ता। मदोऽहङ्कारः। कलिर्विरोधः। व्यसनं चित्तस्य तत्परत्वम्। संप्रयासः सम्यक् क्लेशः। (भाग० ६।११।२२) ॥६॥

त्रैवर्गिकायासविघातमस्मत्-
पतिर्विधत्ते पुरुषस्य शक्र।
ततोऽनुमेयो भगवत्प्रसादो
यो दुर्लभोऽकिञ्चनगोचरोऽन्यैः ॥७॥

तदेवाह त्रैवर्गिकेति। त्रिवर्गः प्रयोजनं यस्यायासस्य तस्य विघातम्। अस्मत्पतिर्विष्णुः। हे शक्र! ततो विघातात्। अन्यैर्धनादिसक्तैः। (भाग० ६।११।२३) ॥७॥

---

1 भाग० न राति यद्द्वेष

2 धातुपाठः १।६१

अहं हरे तव पादैकमूल-
दासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणानां
गृणीत वाक् कर्म करोतु कायः ॥८॥

तस्मात् स्मयादिदुष्टत्वात् सम्पदस्त्यक्त्वा भगवद्दास्यमभ्यर्थय इत्याह ' अह-मित्यादि । तव पाद एको मूलमाश्रयो येषां तेषां दासानामनुदासो भवितास्मि भविष्यामि । भूयः पुनः ' प्रागेकवारं चित्रकेतुत्वेन भूतत्वात् । असुपतेः प्राणाधिष्ठातुः । कर्म तद्गृहमार्जनादि । एका[1] कर्मणि षष्ठी । अन्या सम्बन्धे । (भाग० ६।११।२४) ॥८॥

न नाकपृष्ठं न च पारमेष्ठ्यं
न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
समञ्जसं त्वां[2] विरहय्य काङ्क्षे ॥९॥

ननु किं मद्दास्येन स्वाराज्यादिष्वन्यतमं व्रियतामिति चेत्तत्राह ' न नाकेति । नाकपृष्ठम् ऐन्द्रं स्थानम् । सार्वभौमं सर्वस्या भूमेरीश्वरत्वम् । पारमेष्ठ्यं ब्राह्मं पदम् । योगसिद्धिरणिमाद्या । अपुनर्भवो मोक्षः । समञ्जसं त्वामिति हेतुगर्भ-विशेषणम् । व्युत्क्रमनिर्देशोऽप्यर्थक्रमबलीयस्त्वात् सार्वभौम-नाकपृष्ठ-पातालपरमैश्वर्य-योगसिद्धि-पारमेष्ठ्यापुनर्भवेषूत्तरोत्तरप्रकर्षो विवक्षितः । अत्र च नाकपृष्ठादीनां पञ्चानां कालकलितत्वेन मोक्षस्य च नित्यत्वेन निरतिशय-सुखैकरूपत्वेन तदनुभवाभावादसमञ्जसतयाऽनाकाङ्क्षत्वम् । भगवति तु तद्वैलक्षण्येन समञ्जसत्वादाकाङ्क्षत्वम् (भाग० ६।११।२५) ॥९॥

अजातपक्षा इव मातरं खगाः
स्तन्यं यथा वत्सतराः क्षुधार्ताः ।

1 आद्येति मातृकालब्धः पाठः । 2 समञ्जस त्वेति स्वामिपाठः ।

प्रियं प्रियेव व्युषितं नवोढा[1]
मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥१०॥

त्वां काङ्क्षन इत्युक्तम् । तदेव प्रपञ्चयत्यजातेति । व्युषितं दीर्घप्रवासिनम् । अजातपक्षादिभिस्त्रिभिरुपमानैर्यथोत्तरं ज्ञानप्रकर्षात् सुषुप्ताद्यवस्थात्रयं क्रमाल्लक्षितम् । ततश्चावस्थात्रयेऽपि त्वां मनो दिदृक्षत इत्यर्थः । यद्वोपमात्रयेण क्रमादुत्कण्ठया मन्दमध्यमोत्तमरूपमवस्थात्रयमुक्तम् । (भाग० ६।११।२६) ॥१०॥

ममोत्तमःश्लोकजनेषु सख्यं
संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्मायया त्वात्मजदारगेहे-
ष्वासक्तचित्तेषु न नाथ भूयात् ॥११॥

ननु प्राचीनकर्मक्षपणार्थं त्वया तत्रैव स्थेयं कुतो मद्दर्शनमिति चेत् तथापि संसृतौ भ्रमता मयापि किञ्चिदभ्यर्थ्यमस्तीत्याह । ममेति । हे उत्तमःश्लोक आत्मजादिष्वासक्तचित्तेषु जनेषु मे सख्यं न भूयात् । आत्मा देहः । वृत्रो हरिम् । (भाग० ६।११।२७) ॥११॥

अक्रूरः ।

किं मया चरितं भद्रं किं तप्तं परमं तपः ।
किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवम् ॥१२॥

अर्हते सत्पात्राय । (भाग० १०।३८।३) ॥१२॥

मम तद्दुर्लभं मन्य उत्तमःश्लोकदर्शनम् ।
विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥१३॥

आत्मा मनः । ब्रह्म वेदः । (भाग० १०।३८।४) ॥१३॥

---

1 भाग० विप्रक्षा

मैवं ममाधमस्यापि स्याद्देवाच्युतदर्शनम् ।
ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ॥१४॥

अथवा दुर्लभमिति मैवम् । किन्तु सुलभम् । (भाग० १०।३८।५) ॥१४॥

ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः ।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ॥१५॥

भवो जन्म । (भाग० १०।३८।६) ॥१५॥

कंसो बताद्याकृत मेऽत्यनुग्रहं
द्रक्ष्येऽङ्घ्रिपद्मं प्रहितोऽमुना हरेः ।
कृतावतारस्य दुरत्ययं तमः
पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥१६॥

बतेति विस्मये । अमुना कंसेन प्रहितः प्रस्थापितः । ननु किमङ्घ्रिपद्मे दृष्टेऽपि ? तत्राह ? दुरत्ययमिति । पूर्वे सनन्दनादियोगिनः । यस्याङ्घ्रिपद्मस्य हृत्पद्मकर्णिकायामर्पितस्य त्विषा तमः पञ्चपर्वाविद्याम् अतरन् तीर्णवन्तः । (भाग० १०।३८।७) ॥१६॥

यदर्चितं ब्रह्मभवादिभिः सुरैः
श्रिया च देव्या मुनिभिः स सात्वतैः ।
गोचारणायानुचरैश्चरद्वने
यद्गोपिकानां कुचकुङ्कुमाङ्कितम् ॥१७॥

न चेदमङ्घ्रिपद्मं मुक्तिमात्रफलम् ? किन्तु चतुर्वर्गमपि प्रसूते इत्यभिप्रेत्याह ? यदिति । यदङ्घ्रिपद्मम् । अनुचरैर्गोपैः सह । ब्रह्मादिभिरर्चितम् ?

निजैश्वर्यनिर्वाहायेत्यर्थसिद्धिरुक्ता । श्रियेति कामस्य ' मुनिभिरिति मुक्तेः ' सात्वतैरिति धर्मस्य । सत् सत्त्वं विद्यते यस्मिन् स सत्वान् विष्णुः ' स भजनीयो येषान्ते तथा ' वैष्णवा इत्यर्थः । गोचारणायेति ' त्रिभिर्विशेषणैः पशुपामरस्त्र्यादिष्वपि सानुग्रहत्वात् सुप्रसन्नत्वमुक्तम् । (भाग० १०।३८।८) ॥१७॥

द्रक्ष्यामि नूनं सुकपोलनासिकं
स्मितावलोकारुणकञ्जलोचनम् ।
मुखं मुकुन्दस्य गुडालकावृतं
प्रदक्षिणं मे प्रचरन्ति वै मृगाः ॥१८॥

स्मितयुक्त अवलोको यस्मिन् तथा अरुणे कञ्जवत् लोचने यस्मिन् । पश्चादनयोः कर्मधारयः । कञ्जं पद्मम् । गुडा वक्रा ये अलकाश्चूर्णकेशाः तैः वक्रकेशैरावृतमित्यर्थः । कुतो नूनं तद्द्रक्ष्यसि तत्राह ' प्रदक्षिणमिति । वै यस्माद् मृगा इत्यत्राविशेषोक्तावप्ययुग्मसंख्या गौराश्चेति ज्ञेयम् । तथा चोक्तं शाकुनतन्त्रे

पुण्येन गत्यागमयोरयुग्माः प्रदक्षिणं गौरमृगाः प्रयान्ति ।
समा न शस्ता न च वामयाताः कृष्णैर्विमिश्रा न भवन्ति दुष्टाः ॥

इति । (भाग० १०।३८।६) ॥१८॥

अप्यद्य विष्णोर्मनुजत्वमीयुषो
भारावताराय भुवो निजेच्छया ।
लावण्यधाम्नो भवितोपलम्भनं
मह्यं न न स्यात् फलमञ्जसा दृशः ॥१९॥

अपि अहो । ईयुषः प्राप्तस्य । भविता भविष्यति । उपलम्भनं दर्शनम् । तेन च मह्यं मम दृशः दृष्टेः फलं न स्यादिति न ' किन्तु द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति स्यादेवेत्यर्थः । (भाग० १०।३८।१०) ॥१९॥

य ईक्षिताहंरहितोऽप्यसत्सतोः
स्वतेजसापास्ततमोभिदाभ्रमः ।
स्वमाययात्मन्रचितैस्तदीक्षया
प्राणाक्षधीभिः सदनेष्वभीयते ॥२०॥

कोऽसौ विष्णुरिति चेत्तत्राह ' य इति । यः सदनेषु देहेषु अभीयते देहज्ञ-तया प्रतीयते । किम्भूतेषु देहेषु ' प्राणाक्षधीभिर्विशिष्टेष्वित्यर्थः । प्राति पूरयति सर्वमिति प्राणाः स्थूलसूक्ष्माणि दश भूतानि । प्रातेर्नन्द्यादिल्युप्रत्यये [1] रूपम् । अक्षाणि दशेन्द्रियाणि ' धियश्चत्वार्यन्तःकरणानि ' चतुर्विंशतितत्त्वरूपेष्वित्यर्थः । तत् किमेतान्यप्यात्मवन्नित्यानि नेत्याह ' आत्मन्निति । आत्मनि अधिष्ठाने रचितैः रचिताभिरित्यर्थः । नन्वद्वितीयत्वादसहायस्य कुतः कर्तृत्वं तत्राह ' स्वेति । स्वशक्तिमायाद्वारेण रचितैरित्यर्थः । तथापि मायाया जडत्वान्न कर्तृत्वमिति चेत्तत्राह ' तदीक्षयेति । [2]स ऐक्षत बहु स्यां प्रजायेयेत्यादिश्रुतिप्रसिद्धेक्षा दर्शनं यस्यां मायायां सा तथा । अयमर्थः ' अचेतनापि माया चैतन्यच्छाया-पतितमालाध्यापिपर्ति अयस्कान्तमणिसन्निधानादिव लोहम् । मायासम्बन्धा-नन्तरभावीदमुक्तम् । ततः प्राग्भाविरूपमाह । असत्सतोः कार्यकारणयोः । ईक्षिता द्रष्टा । अहंरहितोऽपि इदमहं पश्यामीत्यभिमानरहितोऽपि । अहं-राहित्ये हेतुमाह ' स्वतेजसेति । स्वेन तेजसा चित्प्रकाशेन अपास्तं दूरीकृतं तमोऽज्ञानं भिदा तत्कार्यं विपर्ययो वा भ्रमः तत्संस्कारः संशयो वा येन स तथा । अज्ञानादिसंसर्गशून्य इत्यर्थः । (भाग० १०।३८।११) ॥२०॥

यस्याखिलामीवहभिः सुमङ्गलै-
र्वाचो विमिश्रा गुणकर्मजन्मभिः ।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगद्-
यास्तद्विरक्ताः शवशोभना मताः ॥२१॥

1 पाणिनिः ३।१।१३४

2 छान्दोग्योपनिषत् ६।२।३

अमीवं पापं घ्नन्तीत्यमीवहानि तैः। प्राणन्ति जीवयन्ति। शुम्भन्ति शोभयन्ति। अन्तर्भावितनिजर्थावत्र प्राणितिशुम्भती। तद्विरक्ताः विष्णु-गुणादहीनाः। शवशोभनाः शवालङ्करणानि। (भाग० १०।३८।१२) ॥२१॥

स चावतीर्णः किल सात्वतान्वये
स्वसेतुपालामरवर्यशर्मकृत्।
यशो वितन्वन् व्रज आस्त ईश्वरो
गायन्ति देवा यदशेषमङ्गलम् ॥२२॥

स विष्णुः। सात्वतान्वये यदुवंशे। किल प्रसिद्धौ। यद् यशः। अशेषाणि मङ्गलानि यस्मिन् यशसि। (भाग० १०।३८।१३) ॥२२॥

तन्त्वद्य नूनं महतां गतिं गुरुं
त्रैलोक्यकान्तं दृशिमन्महोत्सवम्।
रूपं दधानं श्रिय ईप्सितास्पदं
द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥२३॥

गुरुमुपदेष्टारम्। गतिं प्राप्यम्। दृशिमतां विशालदृष्टीनां महानुत्सवो यस्माद्रूपात्। उषसः प्रातःकालस्य सम्बन्धिनः। सुप्रशस्तदर्शनाः दध्या-ज्यदूर्वादयः। उषसि मयैते दृष्टा इत्यर्थः। (भाग० १०।३८।१४) ॥२३॥

अथावरूढः सपदीशयो रथात्
प्रधानपुंसोश्चरणं स्वलब्धये।
धिया धृतं योगिभिरप्यहं ध्रुवं
नमस्य आभ्याञ्च सखीन् वनौकसः ॥२४॥

अथ दर्शनानन्तरम्। ईशौ रामकृष्णौ। प्रधानपुंसोः प्रकृति-पुरुषयोः। स्वलब्धये आत्मप्राप्त्यै। आभ्यामनयोः। (भाग० १०।३८।१५) ॥२४॥

अप्यङ्घ्रिमूले पतितस्य मे विभुः
शिरस्यधास्यन्निजहस्तपङ्कजम् ।
दत्ताभयं कालभुजङ्गरंहसा
प्रोद्वेजितानां शरणैषिणां नृणाम् ॥२५॥

अधास्यत् धास्यति किमिति काका गाम्यते । (भाग० १०।३८।१६) ॥२५॥

समर्हणं यत्र निधाय कौशिक-
स्तथा बलिश्चाप जगत्त्रयेन्द्रताम् ।
यद्वा विहारे व्रजयोषितां श्रमं
स्पर्शेन सौगन्धिकगन्ध्यपानुदत् ॥२६॥

यत्र हस्तपङ्कजे । कौशिक इन्द्रः । विहारे रासक्रीडायाम् । सौगन्धिकं कह्लारं तद्वद्गन्धो यस्य तत्तथा । अपानुदत् अपाचकार । (भाग० १०।३८।१७) ॥२६॥

न मय्युपैष्यत्यरिबुद्धिमच्युतः
कंसस्य दूतः प्रहितोऽपि विश्वदृक् ।
योऽन्तर्बहिश्चेतस एतदीहितं
क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥२७॥

उपैष्यति प्राप्स्यति । यद्यपि कंसस्य दूतः प्रहितश्च तेनैवाहम् । यतो विश्वदृक् । तदेवाह योऽन्तरिति । एतस्य जनस्येहितं चेष्टाम् । अमलेन चक्षुषा प्रज्ञानदृष्ट्या । (भाग० १०।३८।१८) ॥२७॥

अप्यङ्घ्रिमूलेऽवहितं कृताञ्जलिं
मामीक्षिता सस्मितमार्द्रया दृशा[1] ।

1 ख-संज्ञकमातृकायां गिरेति पाठः ।

सपद्यपध्वस्तसमस्तकिल्विषो
वोढा मुदं वीतविशङ्क ऊर्जिताम् ॥२८॥

अवहितं अङ्घ्रिमूलविषये कृतावधानम्। ईक्षिता ईक्षिष्यते। वोढाहं भविष्यामि। वहेस्तृणि रूपम्, न तु लुटि, वोढास्मीति हि तत्र स्यात्। (भाग० १०।३८।१६) ॥२८॥

सुहृत्तमं ज्ञातिमनन्यदैवतं
दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ माम्।
आत्मा हि तीर्थीक्रियते तदैव मे
बन्धश्च कर्मात्मक उच्छ्वसित्यतः ॥२६॥

सुहृत्तममतिमित्रम्। ज्ञातिं सम्बन्धिनम्। अनन्यदैवतं भक्तम्। परिरप्स्यते आलिङ्गिष्यति। आत्मा शरीरम्। तीर्थीक्रियते सर्वपावनार्थत्वात्। कर्मात्मको बन्धः पुण्यपापग्रन्थिः। उच्छ्वसिति शिथिलो भवति। अतः परिरम्भात्। (भाग० १०।३८।२०) ॥२६॥

लब्ध्वाङ्गसङ्गं प्रणतं कृताञ्जलिं
मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः।
तदा वयं जन्मभृतो महीयसा
नैवादृतो यो धिगमुष्य जन्म तत् ॥३०॥

हे अक्रूर! तत हे तात। स ह्युरुश्रवाः स्फीतकीर्तिः। ततस्तत्कर्तृकं सम्भाषणमपेक्षत इत्यर्थः। जन्मभृतः श्लाघ्यजन्मानः। यो हि महीयसा नादृतः तस्य तत्तथाविधमपि जन्म धिङ् निन्दितमित्यर्थान्तरन्यासः। (भाग० १०।३८।२१) ॥३०॥

न तस्य कश्चिद्दयितः सुहृत्तमो
न चाप्रियो द्वेष्य उपेक्ष्य एव वा।

तथापि भक्तान् भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥३१॥

नन्वस्य कुतो महीयस्त्वम् ' मित्रामित्रविकल्पवत्त्वात् । अत आह न तस्येति । दयितो निरुपाधेः स्नेहस्यास्पदम् ' सुहृत्तमः सोपाधिकस्य । अप्रियः अरुचिमात्रस्य ' द्वेष्यः अपकारस्यापि । उपेक्ष्यः औदासीन्यस्यापि । कथन्तर्हि भक्तेषु वत्सलत्वम् ' तत्राह तथेति । यथावत् यद्वत् । सुरद्रुम उपाश्रित एवार्थदः । तथा तेन प्रकारेणायमित्यर्थः । सेवाकृतं वैषम्यं ननु सेव्यकृतमिति प्रागुक्तम् । (भाग० १०।३८।२२) ॥३१॥

किञ्चाग्रजो मावनतं यदूत्तमः
स्मयन् परिष्वज्य गृहीतमञ्जलौ ।
गृहं प्रवेश्याप्तसमस्तसत्कृतं
सम्प्रक्ष्यते कंसकृतं स्वबन्धुषु ॥३२॥

अग्रजो बलभद्रः । आप्तं समस्तं सत्कृतं सत्कारो येन मया तम् । (भाग० १०।३८।२३) ॥३२॥

पदानि तस्याखिललोकपाल-
किरीटजुष्टामलपादरेणोः ।
ददर्श गोष्ठे क्षितिकौतुकानि
विलक्षितान्यब्जलताङ्कुशाद्यैः[1] ॥३३॥

एवं मनोरथान् कुर्वन् व्रजं प्राप्त इत्याह ' पदानीति । तस्य विष्णोः लता लताकारा रेखा । (भाग० १०।३८।२५) ॥३३॥

तद्दर्शनाह्लादविवृद्धसम्भ्रमः
प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ।

1 भाग० यवाङ्कुशाद्यैः ।

रथादवस्कन्द्य स तेष्वचेष्टत
विभोरमून्यङ्घ्रिरजांस्यहो इति ॥३४॥

तेषां पदानां दर्शनादाह्लादः। अवस्कन्द्य अवतीर्य। सः अक्रूरः। तेषु पदेषु। (भाग० १०।३८।२६) ॥३४॥

देहं भृतामियानर्थो हित्वा दम्भं भियं शुचम्।
सन्देशाद्यो हरेर्लिङ्गदर्शनश्रवणादिभिः ॥३५॥

देहं भृतां देहिनाम्। सन्देशाद् वार्ताहरादपि। हरिलिङ्गदर्शनश्रवणादिभिरियान् एतावानेवार्थः फलं यत्ते पादपूते रजसि विलुण्ठनमित्यर्थः। शुकः। (भाग० १०।३८।२७) ॥३५॥

सिद्धाः।

अयं ते[1] कथामृष्टपीयूषनद्यां
मनोवारणः क्लेशदावाग्निदग्धः।
तृषार्तोऽवगाढो न सस्मार दाहं[2]
न निष्क्रामति ब्रह्मसम्पन्नवन्नः ॥३६॥

मृष्टं निर्मलम्। मन एव वारणो गजः। क्लेशाः अविद्यादयः पञ्च। अवगाढो मग्नः। दाहं प्रागुजातम्। ब्रह्मसम्पन्नवत् समाधिस्थवत्। सिद्धा भगवन्तम्। (भाग० ४।७।३५) ॥३६॥

मुचुकुन्दः।

भवापवर्गो भ्रमतो यदा भवे-
ज्जनस्य तर्ह्यच्युत सत्समागमः।

1 स्वामिसम्मतः पाठस्तु त्वत् इति। 2 स्वामिपाठः दावं।

सत्सङ्गमो यर्हि तदैव सद्गतौ
परावरेशे त्वयि जायते मतिः ॥३७॥

एवं शान्तरसरूपेण भक्तिरसमनुभवतः सर्वानर्थनिवृत्तिरर्थप्राप्तिश्च स्यादित्याशयवानभ्यर्हितत्वादर्थप्राप्तिं तावदाह ' भवेति । भवापवर्गः संसारनिवृत्तिः । तर्हि तदा । यर्हि यदा । परे ब्रह्माद्याः । अपरे जीवाः । (भाग० १०।५१।५४) ॥३७॥

मन्ये ममानुग्रह ईश ते कृतो
राज्यानुबन्धापगमो यदृच्छया ।
यः प्रार्थ्यते साधुभिरेकचर्यया
वनं विविक्षद्भिरखण्डभूमिपैः ॥३८॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां शान्तरसः ।
इति सप्तदशोऽध्यायः ॥१७॥

अनर्थनिवृत्तिमाह ' मन्य इति । ते त्वया । अनुबन्धः सम्बन्धः । यदृच्छया अकस्मात् । विविक्षद्भिर्वेष्टुमिच्छद्भिः । अखण्डभूमिपैः सार्वभौमैः । एकचर्यया एकाकित्वेन । मुचुकुन्दः श्रीकृष्णम् । (भाग० १०।५१।५५) ॥३८॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां शान्तरसः ।
समाप्तोऽयं सप्तदशोऽध्यायः ॥१७॥

अष्टादशोऽध्यायः

अद्भुतरसे श्रीदामा ।

नूनं बतैतन्मम दुर्भगस्य
शश्वद्दरिद्रस्य समृद्धिहेतुः ।
महाविभूतेरवलोकतोऽन्यो
नैवोपपद्येत यदूत्तमस्य ॥१॥

अथ दिव्यदर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमानमाहेन्द्रजालातिशायिशिल्पकर्मादिविभावं नयनविस्तारानिमेषेक्षणरोमाञ्चाश्रुस्वेदसाधुवाददानहाहाकरणचेलाङ्गुलिभ्रमणाद्यनुभावं हर्षावेगजडतादिसञ्चारिणं चित्तविस्तारात्मविस्मयस्थायिभावमद्भुतरसं प्रस्तौति[1] । अद्भुतेति । श्रीदामेति नाम मूलेऽप्रयुक्तमपि

श्रीदामरङ्कभक्तार्थं भूम्यानीतेन्द्रवैभवम्

इति पद्मपुराणस्थ[2] सहस्रनाम दृष्ट्वेह प्रयुक्तम् ।

नूनमित्यादि । बतेति विस्मयद्योतको निपातः । एतन्नूनम् । एतत् किम् । यद् यदूत्तमस्यावलोकादन्यो मम समृद्धेर्हेतुर्नोपपद्येत न घटेतैव । विभूतिरैश्वर्यम् । अन्यस्य समृद्धिहेतुत्वाभावे कारणमाह । दुर्भगस्येति । भगो भाग्यम् । अत एव दरिद्रः । (भाग० १०।८१।३३) ॥१॥

नन्वब्रुवाणो दिशते समक्षं
याचिष्णवेऽभूर्यपि भूरि भोजः ।
पर्जन्यवत्तत् स्वयमीक्षमाणो
दाशार्हकाणामृषभः सखा मे ॥२॥

---

1 काव्यनुशासने द्वितीयेऽध्याये १६श-सूत्रं द्रष्टव्यम् ।

2 पद्मपुराणम्, उत्तरखण्डम्, ७२अः, २६९ श्लोः ।

नन्वेवम्भूतश्चेदस्यावलोकस्तर्हि किमिति विद्याभ्याससमये तव सम्पन्ना-भूदित्यत आह भोजवंश्यत्वाद्भोजः श्रीकृष्णः। अभूरि अल्पमपि याचिष्णवे याचमानाय समक्षं ददामीत्यब्रुवाणोऽर्थात् परोक्षं भूरि प्रचुरं दिशते ददाति। यथा पर्जन्यः स्तोकमप्यर्थितो महाशयतया भूर्यैव प्रयच्छति तथाऽयम्। तत् याचनम्। स्वयमेव याचकं प्रतीक्षमाण इत्यर्थः। दाशार्हकाः क्षत्रियविशेषाः। ऋषभः श्रीकृष्णः। (भाग० १०।८१।३४) ॥२॥

किञ्चित् करोत्युर्वपि यत् स्वदत्तं
सुहृत्कृतं फल्ग्वपि भूरिकारी।
मयोपनीतं पृथुकैकमुष्टिं
प्रत्यग्रहीत् प्रीतियुतो महात्मा ॥३॥

दृष्टान्तव्यञ्जितां महाशयतामेव पुनराह किञ्चिदिति। उरु बह्वपि स्वदत्तं किञ्चित्तुच्छं करोति। सुहृद्भक्तः' तत्कृतं फल्ग्वपि भूरिकारी भूरि करिष्यामीत्येवं-शीलः। यतो मयोपनीतमानीतं पृथुकानां चिपिटानामेकमुष्टिं स्वीकृतवान्। (भाग० १०।८१।३५) ॥३॥

तस्यैव मे सौहृदसख्यमैत्री-
दास्यं पुनर्जन्मनि जन्मनि स्यात्।
महानुभावेन गुणालयेन
विषज्जतस्तत्पुरुषप्रसङ्गः ॥४॥

यस्मादयमेवंभूतस्तस्मादिदमस्त्वित्याह ' तस्येति। सौहृदादीनां द्वन्द्वैक्यम्। सौहृदं शरीरसम्बन्धः। सख्यं सहवासः। मैत्री परस्परोपकारकर्तृत्वम्। गुणालयः प्रधानम्। महाननुभावो महदादिकार्यरूपः प्रभावो यस्य तेन। विषज्जत उच्चावचयोनीर्गच्छतः प्रकृतिवशात् संगरत इत्यर्थः। तत्पुरुषा वैष्णवाः। (भाग० १०।८१।३६) ॥४॥

भक्ताय चित्रा भगवान् हि सम्पदो
राज्यं विभूतीर्न समर्थयत्यजः ।
अदीर्घबोधाय विचक्षणः स्वयं
पश्यन्निपातं धनिनां मदोद्भवम् ॥५॥

ननु भक्तवत्सलश्चेदयं तर्हि स्वयमेव सम्पदः किं भक्तेभ्यो न वितरतीत्यत आह भक्तायेति । सम्पदो गजतुरगादयः । राज्यं राज्ञः कर्म निग्रहादिपाटवम् । विभूतीरणिमाद्यैश्वर्याणि । न समर्थयति न संवर्धयति । अदीर्घबोधायापक्वज्ञानाय भक्ताय । पक्वज्ञानस्य तु इच्छैव नास्ति । यदृच्छया चागताः सम्पदस्तं नाभिभवितुं क्षमन्ते । स्वयं विचक्षणः प्राज्ञः । सम्पत्सङ्गादेव तत्त्वविमुखो मा भूदिति विमर्शवत्त्वात् विचक्षणत्वम् । अत्र बतेति द्योतितो विस्मयः स्थायी । मनीषितावाप्तिर्विभावः । साधुवादोऽनुभावः । सञ्चारिण उह्याः । एवमन्यत्र । (भाग० १०।८१।३७) ॥५॥

शुकः ।

इत्थं सतां ब्रह्मसुखानुभूत्या
दास्यं गतानां परदैवतेन ।
मायाश्रितानां नरदारकेण
साकं विजह्रुः कृतपुण्यपुञ्जाः ॥६॥

गोपाः श्रीकृष्णेन सार्धं विजह्रुः । इत्थमङ्गस्पर्शनादिभिः । सतां ब्रह्मविदाम् । ब्रह्मसुखानुभूत्या ब्रह्माख्यसुखानुभवरूपेण । नरदारको नन्दनन्दनः । (भाग० १०।१२।११) ॥६॥

यत्पादपांशुर्बहुजन्मकृच्छ्र-
धृतात्मभिर्योगिभिरप्यलभ्यः ।

स एव यद्दृग्विषयः स्वयं स्थितः
किं वर्ण्यते दिष्टमहो व्रजौकसाम् ॥७॥[1]

बहुषु जन्मसु यत् कृच्छ्रं तपःप्रभृति तेन धृतात्मभिः जितेन्द्रियैः। यत्पादपांशुर्यत्पादरजः। स एव यद्दृग्विषयः न तु पांशुः। दिष्टं दैवम्। अहो आश्चर्ये। (भाग० १०।१२।१२) ॥७॥

नैतद्विचित्रं मनुजार्भमायिनः
परावराणां परमस्य वेधसः।
अघोऽपि यत्स्पर्शनधौतपातकः
प्रापात्मसात्म्यं[2] **त्वसतां सुदुर्लभम् ॥८॥**

एतद् गोपैः सह क्रीडनम्। मनुजार्भमायिनः मनुष्यबालरूपां मायां स्वीकृतवतः। परावराणां कारणकार्याणाम्। वेधसः कर्तुः। परमस्य कर्त्रन्तर-रहितस्य। अघो अघासुरः। सात्म्यमित्येवोक्ते सारूप्यं स्यादत उक्तम् आत्मेति। (भाग० १०।१२।३८) ॥८॥

सकृद्यदङ्गप्रतिमान्तराहिता
मनोमयी भागवतीं ददात्यपि[3] **।**
स एव नित्यात्मसुखानुभूत्यभि-
व्युदस्तमायः परमोऽङ्गसा पुनः[4] **॥९॥**

यदङ्गप्रतिमा यत्स्वरूपप्रकृतिः। भागवतीं स्थितिं ददाति। स एव साक्षात्। दृष्टो ददातीति किं पुनः अन्तःहृदये आहिता निक्षिप्ता। मनो-

---

1 श्लोकेऽस्मिन् ०कृच्छ्रतो। ०प्यगम्यः। दिष्टमतो इत्येते किल स्वामिसम्मताः पाठाः।

2 प्रापात्मसाम्यमिति स्वामी।　　3 ददौ गतिमिति स्वामी।

4 व्युदस्तमायोऽन्तर्गतो हि किं पुनरिति व्युदस्तमायः परमोऽङ्ग किं पुनरिति च चतुर्थ-चरणस्य पाठान्तरे श्रीधरस्वामि-वीरराघवसम्मते।

मत्यपि मनःपरिणामरूपापि । नित्यस्यात्मसुखस्यानुभूत्या अभिव्युदस्ता यथा पुनर्नोदेति तथा हिंसिता माया येन स तथा । अत्र च गोपानामलौकिकेन भगवता सह विहारेणाघासुरस्य भगवत्सायुज्येन विभावेन जातो विस्मयः शुकेनानुभूतः । तत्साधुवादश्चात्रानुभावः । शुकः । (भाग० १०।१२।३६) ॥६॥

ब्रह्मा ।

तदस्तु मे नाथ स भूरिभागो
भवेऽत्र वाऽन्यत्र तु वा तिरश्चाम् ।
येनाहमेकोऽपि भवज्जनानां
भूत्वा निषेवे तव पादपल्लवम् ॥१०॥

तत् तस्माद् यस्माद् भक्त्या सुलभत्वम् । भूरिभागो बहुभाग्यः । भवो जन्म । अत्र गोकुले । येन भवेन तिरश्चां तिर्यग्जातीयानां भवज्जनानां मध्ये अहमप्येको भूत्वा तव पादपल्लवं निषेवे । (भाग० १०।१४।३०) ॥१०॥

अहोऽतिधन्या व्रजगोरमण्यः
स्तन्यामृतं पीतमतीव ते मुदा ।
यासां विभो वत्सतरात्मजात्मना
यत्तृप्तयेऽद्यापि न चालमध्वराः ॥११॥

रमण्यो गोप्यः । गवां वत्सरूपेण रमणीनामात्मजरूपेण यस्य तव तृप्तये अध्वरा अद्यापि नालं समर्थाः । (भाग० १०।१४।३१) ॥११॥

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥१२॥

अहो इत्यादिवीप्सा आदरार्था । यद् येषाम् । पूर्णं व्यापकम् । (भाग० १०।१४।३२) ॥१२॥

एषान्तु भाग्यमहिमाच्युत तावदास्ता-
मेकादशैव हि वयं बत भूरिभागाः ।
एतद्धृषीकचषकैरसकृत् पिबामः
शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते ॥१३॥

एषां व्रजौकसाम् । महिमा महत्त्वम् । शर्वादयो वयम् । बत आश्चर्ये । भूरिभागाः बहुभाग्याः । शर्वो रुद्रः । कुतो भूरिभागाः ? हि यस्माद् वयम् एकादश साहङ्कारा इन्द्रियदेवताः । ताश्च

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।[1]

अहङ्कारो रुद्रः । एतद्धृषीकचषकैः एषामिन्द्रियैरेव पानपात्रैः । असकृत् सदा । अङ्घ्र्युदजमधु अङ्घ्रिकमलमकरन्दः स एवामृतं निर्वृतिहेतुत्वात् । आसवो मद्यम् अवस्थान्तरजनकत्वात् । (भाग० १०।१४।३३) ॥१३॥

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां
यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ।
यज्जीवितन्तु निखिलं भगवान् मुकुन्द-
स्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥१४॥

इहाटव्यां यत् किमपि तर्वादिरूपेण जन्म तद् भूरिभाग्यम् । किम्भूतं यत् ? कतमस्य किंजातीयस्य कस्यापि गोकुलवासिनः अङ्घ्रिरजसोऽभिषेको यस्मिन् तर्वादिजन्मनि । किम्भूतः कतमः ? यस्य जीवितं मुकुन्दः ? जीवितवन्मुकुन्दो यस्य प्रियतम इत्यर्थः । किम्भूतो मुकुन्दः ? यस्य पादरजः श्रुतिभिर्वेदैर्मृग्यमेव । अत्रैवशब्दान्न तु कदाचिन्मृगितमित्यर्थः । (भाग० १०।१४।३४) ॥१४॥

---

1 भागवतम् २।५।३०

एषां घोषनिवासिनामुत भवान् किं देव रातेति न-
श्चेतो विश्वफलात् फलं त्वदपरं कुत्राप्ययन्मुह्यति ।
सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता
यद्धामार्थसुहृत्तत्तात्मतनयप्राणाशयास्त्वत्कृते[1] ॥१५॥

उत अहो देव । घोषो गोकुलम् । किं फलमेतद्दास्यत्यस्मिन्नर्थे । अस्माकं चेतो मुह्यति । यतो विश्वस्य फलभूतात् त्वद् भवतः सकाशादपरं फलम् अयत् ' गत्यर्थानां धातूनां ज्ञानार्थत्वादजानदित्यर्थः ' इणः शतरि रूपम् । आत्मानमेव दास्यामीति चेत्तत्राह' सदिति । सतः प्रशस्तात् सम्पूर्णाद् द्वेषात् विरोधादिति यावत् । इव शब्दोऽप्यर्थे । पूतना त्वामेवापिता प्राप्ता । आपिः चुरादिः ' भ्वादौ पठ्यमानो हि सेट्[2] । किमेकाकिन्येव प्राप्ता ' नेत्याह । अपि सकुलेति । कुलं बकोऽघासुरश्च । येषां घोषनिवासिनां धामाद्याः । त्वत्कृते त्वदर्थम् । धाम गृहम् । अर्थः पश्वादिः । ततः पिता' अनेन माताऽप्युपलक्षिता । आत्मा जीवः । प्राणा इन्द्रियाणि प्रान्तीति व्युत्पत्त्या । आशया अन्तःकरणानि । य एवात्मा द्विषद्भ्यो दीयते स एवानुरक्तेभ्यो दीयत इत्यनुचितमित्यर्थः । (भाग० १०।१४।३५) ॥१५॥

तावद्रागादयः स्तेनास्तावत् कारागृहं गृहम ।
तावन्मोहोऽङ्घ्रिनिगडो यावत् कृष्ण न ते कथाः[3] ॥१६॥

रागादीनां स्तेनत्वादिकं तावदेव यावत् त्वत्कथा नास्ति । प्रवृत्तायां कथायान्तु तन्नास्तीत्यर्थः । कारागृहं बन्धनस्थानम् । ब्रह्मा श्रीकृष्णम् । अत्राद्भुतहेतुः प्राग्वत् । (भाग० १०।१४।३६) ॥१६॥

---

1 यद्धामार्थसुहृत्प्रियात्मतनय० इति पाठान्तरं मुद्रापितेषु श्रीमद्भागवतेषूपलभ्यते ।
2 पाणिनीय-धातुपाठे धातुरयं भ्वादौ न पठ्यते ।
3 जना इति स्वामिसम्मतः पाठः ।

उद्धवः ।

एताः परं तनुभृतो भुवि गोपवध्वो
गोविन्द एव निखिलात्मनि रूढभावाः ।
वाञ्छन्ति यद् भवभियो मुनयो वयञ्च
किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥१७॥

परं केवलम् । भुवि एतास्तनुभृतो नान्ये । शरीरधारणमासामेव सफलमित्यर्थः । यतो गोविन्द एव रूढभावाः । मुनयो वाचंयमत्वादिगुणयुक्ताः । वाञ्छन्ति परं न सहसा प्राप्नुवन्ति । भवभियः संसारभीरवः । वयञ्च दास्यमात्रनिष्ठाः । ननु मुनीनां ब्राह्मणत्वादिना युज्यते रूढभावो न तु तद्रहितस्य तव गोपीनां चेत्यत आह । किमिति । ब्रह्मजन्मभिर्ब्राह्मणजातिभिः । बहुवचनेन वृत्ताध्ययनादिब्राह्मणगुणैरपि किमित्युक्तम् । नाग्निहोत्रादिवद् भक्तौ विप्रादिरेवाधिकारी किन्तु सर्वेऽपीति भावः । अत एवोक्तम्

नालं द्विजत्वं देवत्वम्[1]

इत्यादि । (भाग० १०।४७।५८) ॥१७॥

क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः
कृष्णे क्व चैष परमात्मनि रूढभावः ।
नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षा-
च्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥१८॥

तदेवाह क्वेमा इति । नन्वहो । अनुवृत्त्या भजत अविदुषोऽपि प्रभावमजानतोऽपि गतानुगतिकया सेवमानस्यापि । साक्षाच्छ्रेयः कैवल्यम् । यथा ह्यगदराजो रसरसायनादिरुपयुक्तो गृहीतः सन्नविदुषोऽपि श्रेयःपुष्ट्यारोग्यादि तनोति तथैवायम् । वस्तुशक्तिरेवेदृशीति भावः । (भाग० १०।४७।५९) ॥१८॥

---

1 भाग० ७।७।५१

नायं श्रियोरसि[1] नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उद्गाद् व्रजवल्लवीनाम्[2] ॥१९॥

उरसि नितान्तमत्यर्थं रतिः रमणं यस्याः श्रियः । व्यत्ययस्मरणात् संहिता । नलिनवद् गन्धः परिमलो रुचिः कान्तिश्च यासाम् । पद्मिनीनामित्यर्थः । रासोत्सवे रासक्रीडायामित्यर्थः । अस्य श्रीकृष्णस्य । यः प्रसादः । व्रजवल्लवीनां गोपीनाम् । उदगादुदितः । भुजदण्डैर्गृहीता आश्लिष्टाः कण्ठा यासाम् । अत एव लब्धाशिषः प्राप्तमनोरथाः । (भाग० १०।४७।६०) ॥१६॥

आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथञ्च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥२०॥

आत्मनो गोपीतुल्यत्वं दुर्लभं मत्वा तत्पादरजःसम्पर्कमप्याशास्ते । आसामिति । गुल्मादीनां मध्ये किमपि स्यां भवेयमिति प्रार्थनायां लिङ् । गुल्मादयो हि गोपीनां चरणरेणून् जुषन्ते । अहमपि तथा भविष्यामीत्यर्थः । गुल्मः स्तम्बः । याः गोप्यः । आर्यपथं साधुमार्गम् । (भाग० १०।४७।६१) ॥२०॥

या वै श्रियार्चितमजादिभिराप्तकामै-
र्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ।
कृष्णस्य तद्भगवतश्चरणारविन्दं
न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥२१॥

---

1 स्वामी—श्रियोऽङ्ग उ । विजयध्वजः—श्रियो ननु
2 व्रजसुन्दरीणामिति वैष्णवतोषणीसम्मतः पाठः ।

अजो ब्रह्मा। आत्मनि बुद्धितत्त्वे। योगेश्वरैरर्चितं ध्यातमित्यर्थः। चरणारविन्दस्य कामार्थमोक्षदातृत्वमस्तीति क्रमात् श्रियादिभिस्त्रिभिस्तृतीयान्तैरुक्तम्। आप्तकामा अपि प्राप्तैश्वर्यस्य निर्वाहार्थं भजन्ते। तत्तथाविधम्। स्तनेषु न्यस्तं संलग्नं यथा स्यात्तथा परिरभ्य गाढमालिङ्ग्येत्यर्थः। (भाग० २०।४७।६२) ॥२१॥

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥२२॥

किं बहुना 'इदमत्र युक्तमित्याह' वन्द इति। अभीक्ष्णशः वारंवारम्। उद्गीतम् उद्गानम्। (भाग० १०।४७।६३) ॥२२॥

प्रह्लादः।

नेमं विरिञ्चो लभते प्रसादं
न श्रीर्न शर्वः किमुतापरे ते[1]।
यन्नोऽसुराणामसि दुर्गपालो
विश्वाभिवन्द्यैरभिवन्दिताङ्घ्रिः ॥२३॥

ते तव प्रसादम्। अपरे इन्द्रादयः। विरिञ्च्यादिभिस्त्रिभिः प्रथमान्तैः पुत्रमित्रकलत्रादिष्वपि ते नैवंविधः प्रसाद इत्युक्तम्। (भाग० ८।२३।६) ॥२३॥

यत्पादपद्ममकरन्दनिषेवणेन
ब्रह्मादयः शरणदाश्नुवते विभूतीः।
कस्माद्वयं कुसृतयः खलयोनयस्ते
दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥२४॥

विश्वाभिवन्द्यतामेवाह' यत्पादेति। हे शरणद। अश्नुवते प्राप्नुवन्ति। विभुतीरैश्वर्याणि। खलयोनयः कुजन्मानः। कुसृतयो दुराचाराः। एवंभूता

---

1 ये इति वीरराघवः. ०ऽन्ये इत्यपि क्वचिन्मुद्रापितः पाठः।

अपि वयम्। ते त्वया। दाक्षिण्यदृष्टिपदवीं कृपाकटाक्षविषयं कस्मात् प्रणीताः। (भाग० ८।२३।७) ॥२४॥

चित्रं तवेहितमहोऽमितयोगमाया-
लीलाविसृष्टभुवनस्य विशारदस्य।
सर्वात्मनः समदृशो विषमः स्वभावो
भक्तप्रियो यदसि कल्पतरुस्वभावः ॥२५॥

अहो देव! एतत्तवेहितं चेष्टितं चित्रं यत् समदृशोऽपि तव विषमः स्वभावः। कुतः समदृक्त्वम्? यतः सर्वात्मा। तदेव कुतः? यतोऽमिता त्वत्तो भेदाभेदादिभिरनिरुक्ता या योगमाया तया लीलार्थं क्रीडार्थं विसृष्टं भुवनं येन स तथा। न च माययाभिभूतत्वाद् वैषम्यमाचरसि यतो विशारदः अविप्लुतज्ञानः। किन्तद्वैषम्यम्? यत् सर्वमयत्वेऽपि भक्तेषु प्रीतिः। न चैतद्दोषाय? यतः कल्पतरुस्वभावस्त्वम्। स हि सेवकस्यैव फलं ददानोऽपि न विषमः। प्रह्लादो भगवन्तम्। (भाग० ८।२३।८) ॥२५॥

अक्रूरः।

अद्येश नो वसतयः खलु भूरिभागा
यः [1]सर्ववेदपितृभूतनृदेवमूर्तिः।
यत् पादशौचसलिलं त्रिजगत् पुनाति
स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥२६॥

हे ईश! अद्य नो वसतयो गृहाः। खलु निश्चितं न स्तुतिमात्रम्। नरो मनुष्याः। तव प्रवेशात् पञ्चमहायज्ञनिर्वापश्रेयोऽस्माभिर्लब्धमिति वेदादिभिः पञ्चभिरुक्तम्। त्रिजगत्त्रिभुवनम्। जगतो गुरुः पिता। या वसतीः। (भाग० १०।४८।२५) २६॥

---

1 सर्वदेवपितृभूतनृवेदमूर्तिरिति मुद्रापितेषु भागवतेषु पाठः।

कः पण्डितस्त्वदपरं शरणं समीयाद्-
भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्वान् ददाति सुहृदो भजतोऽभिकामा-
नात्मानमप्युपचयापचयौ न यस्य ॥२७॥

त्वत् भवतः सकाशात् अपरं पुरुषं शरणं रक्षकं पण्डितो भूत्वा कः समीयात् गच्छेत्' न कोऽपीत्यर्थः । त्वं हि भक्तप्रियः सेवकवत्सलः' न तथान्यः । न च स्नेहलोपि भूत्वा सेवातारतम्यं न वेत्सि' यतः कृतज्ञः । न च कृतज्ञोऽपि प्रतिश्रुतं न प्रयच्छसि' यत ऋतगीः सत्यवाक् । न च कलुषितेन मनसा ददासि' यतः सुहृत् । न चासमृद्धः ' यतो भवान् सुहृदः शुद्धहृदयस्य भजतः सर्वान् कामान् ददाति आत्मानञ्च । यस्यात्मन उपचयापचयौ वृद्धिनाशौ न स्तः ' तं कूटस्थमित्यर्थः । (भाग० १०।४८।२६) ॥२७॥

दिष्ट्या जनार्दन भवानिह नः प्रतीतो
योगेश्वरैरपि दुरापगतिः सुरेशैः ।
छिन्ध्याशु नः सुत कलत्रधनाप्तगेह-
देहादिमोहरशनां भवदीयमायाम् ॥२८॥

दिष्ट्या दैवेन । इह जन्मनि नः अस्मान् प्रति इतः आगतः प्रकटीभूत इत्यर्थः । कुतो दिष्ट्या' यतो योगेश्वरैरपि सुरेशैरपि दुरापगतिः समाधिसम्पन्नैर्देवैरपि दुर्विज्ञानः ' का वार्ताऽन्येषाम् । आशु शीघ्रं न जन्मान्तरे । सुतादिमोह एव रशना रज्जुः ताम् । सा हि भवदीया माया त्वदायत्ता । त्वञ्च जनार्दनः जनमुत्पत्तिम् अर्दयसि ' मोक्षद इत्यर्थः । जनेर्घञ् ' जनिवध्योश्चेत्यवृद्धिः[1] । अक्रूरो भगवन्तम् । (भाग० १०।४८।२७) ॥२८॥

---

1 पाणिनिः ७।३।३५

शुकः ।

नैवंविधः पुरुषकार उरुक्रमस्य
पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् ।
चित्रं विदूरविगतः सकृदाददीत
यन्नामधेयमधुना स जहाति बन्धम् ॥२९॥

एवमद्भुतरसेन भजतो वैराग्यादिगुणा भवन्तीत्याह' नैवमिति । उरुक्रमस्य सम्बन्धिनां पुंसां प्रियव्रतादीनामेवंविधो रजन्यामपि दिनत्वकरणादिः । पुरुषकारः सामर्थ्यं न चित्रम् । जिताः षण्णामिन्द्रियाणां गुणाः विषयाः शब्दादयो यैस्ते तथा । कुतो न चित्रम्' यतो यस्य उरुक्रमस्य नामधेयं यः सकृदाददीत स विदूरविगतो जात्यपकर्षप्राप्तोऽन्त्यजोऽपि । स्वस्यान्येषां वा बन्धम् । अधुना कलिकालेऽपि' किंपुनः कृतादौ ' जहाति । इत्यस्य चित्रतमत्वात् न पूर्वस्य चित्रत्वमिति भावः । शुकः । (भाग० ५।१।३५) ॥१६॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानामद्भुतरसः ।
इत्यष्टादशोऽध्यायः ॥१८॥

इति हेमाद्रिकृतायां कैवल्यदीपिकायां विष्णुभक्तानामद्भुतरसः ।
समाप्तोऽयमष्टादशोऽध्यायः ॥१८॥

ऊनविंशोऽध्यायः

वीररसे बलिः ।

मनस्विनः कारुणिकस्य शोभनं
यदर्थिकामोपनयेन दुर्गतिः ।
कुतः पुनर्ब्रह्मविदां भवादृशां
ततो वटोरस्य ददामि वाञ्छितम् ॥१॥

एवं हास्यादिभङ्गिभिन्नभक्तिरसानुभवावच्छेदादष्टौ भक्तानभिधाय सम्प्रति नवमं भक्तमभिधातुमुत्साहस्थायिनं प्रतिनायकवर्तिनयविनयासम्मोहाध्यवसायबल-शक्तिप्रतापप्रभावविक्रमाधिक्षेपादिविभावं स्थैर्यधैर्यगाम्भीर्यत्यागवैशारद्याद्यनुभावं धृतिस्मृत्यौग्र्यगर्वामर्षमत्यावेगहर्षादिसञ्चारिणं महेन्द्रदैवतं गौरदेहं सत्त्वप्रधानं वीररसमारभते[1] । वीरेति ।

नयादि लक्षणं त्वभिनवगुप्तादौ[2] । स च वीरस्त्रिविधो युद्धदानधर्मभेदात् । तत्र युद्धवीरो यथा

एतां पश्य पुरस्थलीमिह किल क्रीडाकिरातो हरः ।
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः ।
इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापते-
र्मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम् ॥[3]

दानवीरो द्वेधा । यत्र स्थिता एव सकलसम्पदः कीर्त्याद्यनुसन्धानेन स्वय-मर्थिसात् क्रियन्ते स एकः । यथा

---

1 काव्यानुशासने द्वितीयेऽध्याये १४श: सूत्रवृत्तिर्द्रष्टव्या ।

2 नाट्यशास्त्रटीका (वडोदा) ६ष्ठ अः । ३२५पृः ।

3 धनिककृत-दशरूपकावलोके (२।१०) काव्यानुशासनवृत्तौ (७।२) सरस्वतीकण्ठाभरणे (५।१६६) चोदाहृतमेतत् ।

दधिक्षीरघृताम्भोधिव्यञ्जनस्पृहणीयया ।
महादानोत्सवे यस्य हन्तकारायितं भुवा ॥[1]

यत्र तु परितुष्टैर्देवादिभिर्दीयमानाः साम्राज्यादिविभूतयः सत्त्वप्रकर्षात् परिह्रियन्ते स उपस्थितपरिहारनामा द्वितीयः । यथा

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डल-
क्रीडाकृत्तपुनःप्ररूढशिरसो वीरस्य लिप्सोर्वरान् ।
याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृणित्यभितो मुखानि स दशग्रीवः कथं वर्ण्यते ॥[2]

धर्मवीरोऽपि धर्मस्य सकामनिष्काममभेदाद् द्वेधा । यथा

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः ।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥[3]

इत्यत्र मखैरनिष्ट्वेति । यत्तु राज्ञा वीरस्य दयावीराख्यमपरं भेदं ब्रुवता

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः ॥[4]

इत्युदाहृतं तत्तु न सम्यक् । तत्र हि वस्त्वन्तरवद्देहस्यापि देयत्वेन प्रसञ्जनाद् दानवीर एवायम् । अत एवायंप्रकारो दानवीर एवान्यैरुपदर्शितः । यथा

कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि किमदेयं महात्मनाम् ॥[5]

इति । दयायाः कृपात्वेन करुणात्वात् करुणाप्रभेद एवायमित्येके । तस्मादस्योक्तं भेदत्रयमेव रम्यम् । अत एवेदं सावधारणमुक्तं भरतेन ।

---

1 सरस्वतीकण्ठाभरणे (५।१६६) उदाहृतं (१०५) पद्यम् ।

2 मुरारिकवेरनर्घराघवम् ३।४१ 3 काव्यादर्शः २ परिः । २८४ श्लोः

4 भोजराजकृत-सरस्वतीकण्ठाभरणे (५।१६६) उदाहृतं (१०६) रघुवंशीयं (२।४५) पद्यम् ।

5 सुभाषितरत्नभाण्डागारे उदारप्रशंसायां पद्यमिदमुपलभ्यते ।

दानवीरं धर्मवीरं युद्धवीरं तथैव च ।

रसं वीरमपि प्राह ब्रह्मा त्रिविधमेव हि ॥[1]

युद्धवीरे आपत्पङ्कनिमग्नतां खलपसन्तोषं मिथ्याज्ञानं चापास्य यस्तत्त्वनिश्चयरूपोऽसंमोहाध्यवसायः स एव प्रधानतयोत्साहहेतुः । रौद्रे तु ममताप्राधान्यादशास्त्राचितानुचितयुद्धाद्यपीति मोहविस्मयप्राधान्यमिति तयोर्विविक्तः पन्थाः ।[2]

तदेवम्भूतान् वीररसप्रभेदान् मनसि कृत्वा तत्र युद्धवीररूपेण भक्तिरसानुभवमशक्यं मन्यमानो दानवीरं दर्शयन् तस्य प्रथमभेदे बलिं भक्तमाह ' बलिरिति ।

अर्थिनां कुयाचकानां कामोऽभिलाषः ' तस्योपनयेन पूरणेन या दुर्गतिः दारिद्र्यं तदपि शोभनं श्लाघ्यम् । अर्थीति कुत्सायामिनिः । यदाहुः

भूमनिन्द्राप्रशंसासु नित्ययोगेऽतिशायने ।

संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥[3]

इति । कारुणिकस्य परदुःखेन व्यथितस्य । मनस्विनो धीरस्य । महान्तमर्थराशिं दत्त्वाप्यनुशयहीनस्येत्यर्थः । यदार्थिमात्रस्यापि कामपूरणेन दुर्गतिः श्लाघ्यते तदा किमु वेदविदामित्याह ' कुतः पुनरिति । भवादृशामित्यनेन त्वत्तुल्योऽयं वटुरित्युक्तम् । ततो दारिद्र्यस्य श्लाघ्यत्वात् । अस्य वटोर्वामनस्य । वाञ्छितं पादत्रयम् । (भाग० ८।२०।१०) ॥१॥

यजन्ति यज्ञं क्रतुभिर्यमादृता
भवन्त आम्नायविधानकोविदाः ।
स एव विष्णुर्वरदोऽस्तु वाऽपरो
दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥२॥

1 नाट्यशास्त्रम् (वडोदा) ६।९९ । चौखम्बा-(६।७९) प्रकाशितपुस्तके गृहीतौ रसवीरमपि प्राहुस्तज्ज्ञास्त्रिविधसम्मतमित्ययं पाठस्त्वनुपादेयः प्रतिभाति ।

2 काव्यानुशासने द्वितीयेऽध्याये १४श-सूत्रवृत्तिर्द्रष्टव्या । वडोदातः प्रकाशितायामभिनवगुप्तकृत-नाट्यशास्त्रटीकायां (६अ: । ८४ श्लोः । ३१६पृः) किञ्चिदन्यथा पठ्यमानमेतदाशयसंवादि वचनमस्य मूलमिव प्रतिभाति ।

3 वार्तिकम् ३१८३—पाणिनिः ५।२।९४ ।

नायमर्थो किन्तु वटुवेषच्छन्नो विष्णुरिति चेत्तत्राह । यजन्तीति। क्रतवः प्रसिद्धा ज्योतिष्टोमादयः ससोमाः । यज्ञाः पाकयज्ञादयः प्रसिद्धा निःसोमा इति हि क्रतुयज्ञेभ्यश्चेति सूत्रे वृत्तिकारादिभिर्विवृतम्[1]। भवन्तो भवादृशाः। आम्नायस्य विधाने इतिकर्तव्यतायां कोविदाः। वरं श्रेष्ठं ददातीति वरद उपकर्ता। अपरोऽपकर्ता। हे मुने शुक्र।

अत्र बलेर्ददामीत्यसंमोहाध्यवसायो ब्रह्मविदामित्युपलक्षिताः पात्रगुणाश्च विभावाः। दुर्गतावपि श्लाघ्यत्वबुद्धिरित्युपलक्षिता धैर्यादयोऽनुभावाः। एवमतिमनस्वितया सूचितस्योत्साहस्य हर्षादिकाः सञ्चारिणो ज्ञेयाः। बलिः शुक्रम्। (भाग० ८।२०।११) ॥२॥

पृथुः।

वरान् विभो त्वद्वरदेश्वराद्बुधः
कथं वृणीते गुणविक्रियात्मनाम्।
ये नारकाणामपि सन्ति देहिनां
तानीश कैवल्यपते वृणे न च ॥३॥

द्वितीयेऽस्मिन् दानवीरप्रभेदे पृथुर्भक्तः इत्यभिप्रेत्याह । पृथुरिति।

वरञ्च मत्कञ्चन मानवेन्द्र वृणीष्व तेऽहं गुणशीलयन्त्रितः।[2]

इति भगवदुक्तिं निशम्याह वरानिति। गुणविक्रियात्मनां गुणविकाररूपाणां ब्रह्मादीनां वरान् वरदेश्वरात् त्वत् कथं वृणीते । ब्रह्मपदादीनां विषयसुखात्मकत्वात्। विषयसुखानि च नारकाणां नरकनिवासिनामपि सन्ति। अतस्तान् ब्रह्मपदादिरूपान् वरान् नैव वृणेऽहम्। यतस्त्वमीशः समर्थः । कैवल्यपतिश्च । कैवल्यञ्च तवाधीनम्। (भाग० ४।२०।२३) ॥३॥

न कामये नाथ तदप्यहं क्वचि-
न्न यत्र युष्मच्चरणाम्बुजासवः।

---

1 पाणिनीया (४ ३।६८) काशिकावृत्तिर्द्रष्टव्या।

2 भागवतम् ४।२०।१६

महत्तमान्तर्हृदयान्मुखच्युतो
विधत्स्व कर्णायुतमेष मे वरः ॥४॥

तर्हि कैवल्यमेव वृणीष्वेति चेत्तत्राह ' न कामय इति । तदपि न कामये ' यत्र कैवल्ये युष्मच्चरणाम्बुजस्यासवो मकरन्दः क्वचिदेकदेशेऽपि नास्ति ' भक्तिसुखं नास्तीत्यर्थः । स हि महत्तमानाम् अन्तर्हृदयम् अतति सततं गच्छतीति महत्तमान्तर्हृदयात् । अतेः क्वौ रूपम् । तद्धृदयान्तर्वर्ती । तन्मुखच्युत आस्वाद्यतेऽन्यैः । अतो बहुभ्यो युगपत् तदाकर्णनार्थं कर्णायुतं मे मह्यं विधत्स्व । एष एव वरः । (भाग० ४।२०।२४) ॥४॥

स उत्तमश्लोकमहन्मुखच्युतो
भवत्पदाम्भोजसुधाकणानिलः ।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां
कुयोगिनां नो वितरत्यलं वरैः ॥५॥

मुक्तिसुखे भक्तिसुखाभाववत् भक्तिसुखे मुक्तिसुखाभावो नास्तीत्याह ' स उत्तमेति । सुधाकणानाम् अमृतबिन्दूनामनिलो दूरादपि श्रवणमित्यर्थः । विस्मृतं तत्त्ववर्त्म यैस्तेषां कुयोगिनामस्माकं तत्स्मृतिं वितरति स्वरूपानुभवसुखरूपां[1] मुक्तिं ददातीत्यर्थः । विषयसङ्गेऽपि मोक्षकामत्वात् कुयोगित्वम् । मुक्तिसुखेन सह भक्तिसुखं भक्तानामस्तीत्यर्थः । (भाग० ४।२०।२५) ॥५॥

यशः शिवं सुश्रव आर्यसङ्गमे
यदृच्छया चोपशृणोति तेऽसकृत्[2] ।
कथं गुणज्ञो विरमेद्विना पशुं
श्रीर्यत् प्रवव्रे गुणसंग्रहेच्छया ॥६॥

श्रवणादुःसंपादत्वात् सुसम्पादत्वेऽपि परिणतिविरसत्वात् भक्तिसुखं दुर्लभ-

1 क-पुस्तके स्वरूपाभिति पाठः । 2 भाग० ते सकृत् ।

मिति चेत्तत्राह ' यश इति । हे सुश्रवः सुकीर्ते । यदृच्छया गुरुशिष्यभावं विनापि । उपश्रृणोति उपश्रोतृतयाप्यवधारयति ' किं पुनः श्रोतृतया । असकृत् वारंवारम् । चशब्दश्चेदर्थे । पशुं विनाऽन्यः कथं विरमेत् । यतो गुणज्ञः । मुक्तिसुखेऽपि गुणाः सन्तीति चेत्तत्राह ' श्रीरिति । श्रीः मुक्तिसुखस्वामिनी यद् भक्तिसुखं प्रकर्षेण वव्रे । भक्तिगुणान् संगृह्य मुक्तिगुणेष्वाधातुमिच्छया । अत्र यशसः शिवत्वात् निर्विघ्नत्वम् । सुश्रव इति निर्देशस्य सम्बोधनपरत्वेऽपि विशेषणप्रधानत्वात् शोभनत्वेन सुखग्राह्यत्वम् । आर्यसङ्गममात्रहेतुत्वात् सुलभत्वमुक्तम् । (भाग० ४।२०।२६) ॥६॥

अथाभजं[1] त्वाखिलपूरुषोत्तमं
गुणालयं पद्मकरेव लालसः ।
अप्यावयोरेकपतिस्पृधोः कलि-
र्न स्यात् कृतत्वच्चरणैकतानयोः ॥७॥

शतक्रतुत्वे शक्रस्य स्पर्धावत् विष्णुभक्तत्वे लक्ष्मीस्पर्धादोषोऽस्तीत्याह ' अथेति । अथशब्दः प्रश्ने । अथ कलिर्न स्यात् । अभजमिति भजनारम्भस्य भूतत्वाल्लङ्प्रयोगः । लालस उत्कण्ठावान् । पद्मकरेति विशेषणप्रधानो निर्देशः ' भगवदुपायनार्थं लीलाकमलधारिणीत्यर्थः । सा यथा अभजत्[2] । त्वं हि प्रकृत्या सर्वपुरुषेषु उत्तमः गुणाढ्यश्च । गुणाः सौन्दर्यादयः । अपि अहो । अहञ्च सा चावामिति विरूपत्वेऽपि त्यदादेर्मिथो द्वन्द्वे यद्यत् परं तच्छेष्यमिति[3] वार्तिकादस्मच्छब्दः शिष्यते । यत आवामेकस्मिन् पत्यौ सस्पृहौ । एकपतिस्पृहत्वेऽपि स्पृहाया भिन्नप्रदेशविषयत्वेन न विरोध इति चेत् ' तदपि नास्तीत्याह ' कृतेति । एकतानोऽनन्यवृत्तित्वम् । (भाग० ४।२०।२७) ॥७॥

1 अथाभजे इति स्वामिपाठः 2 क—उपभजन्

3 त्यदादीनां मिथो यद्यत् परं तत्तच्छिष्यते । वार्तिकम्—पाणिनिः १।२।७२

जगज्जनन्यां जगदीश वैशसं
स्यादेव यत्कर्मणि नः समीहितम् ।
करोषि[1] फल्ग्वप्युरु दीनवत्सलः
स्व एव धिष्ण्येऽभिरतस्य किं तया ॥८॥

एवं कलिविषये संशय्य स्वयमेव निश्चिनोति ' जगदित्यादि । जगतो जनन्यां मातरि लक्ष्म्याम् । वैशसं चित्तव्यथा विशसनतुल्यत्वात् । यस्याः कर्मणि चरणसेवायाम् । नः समीहितं सम्यग्वाञ्छा । ननु स्वस्याल्पकत्वं मत्वा बलवद्विरोधात् बिभेषि चेत्तर्हि विरम्यतामस्मादिति चेत्तत्राह ' करोषीति । त्वं हि दीनेषु पक्षपातित्वात् प्रगल्भमपि सेवकं स्वसंसर्गात् पृथक् करोषि । श्रीरेवात्र निदर्शनमिति भावः । तथापि तस्याः प्रेमपात्रत्वेनात्यन्तं सुखसाधनत्वान्न च भृत्यमात्रत्वेन बहिरङ्गत्वादयुक्तस्तया सह विरोध इति चेत्तत्राह ' स्व एवेति । स्त्रीप्रमाणेष्वन्यपुरुषेष्वेषा वार्ता ' न तु नित्यनिरतिशयानन्दघनब्रह्मस्वरूपसुखसन्तुष्टे त्वयीति भावः । धिष्ण्यं पदम् । (भाग० ४।२०।२८) ॥८॥

भजन्त्यथ त्वामत एव साधवो
व्युदस्तमायागुणविभ्रमोदयम् ।
भवत्पदानुस्मरणादृते सतां
निमित्तमन्यद् भगवन्न विद्महे ॥९॥

अत एव देवतान्तरं हित्वा महान्तस्त्वामेव सेवन्त इत्याह ' भजन्तीति । अथ भज्याभज्यनिर्धारानन्तरम्[2] । अत एव दीनवत्सलत्वात् स्वरूपसुखसन्तुष्टत्वाच्च । तदेवाह ' व्युदस्तेति । व्युदस्तो दूरीकृतो मायागुणानां रजःप्रभृतीनां विभ्रमो विलासः कार्यं रागद्वेषादि तस्योदय आविर्भावो येन तम् । किमर्थं भजन्तीति चेत्तत्राह ' भवत्पदेति । भवत्पदानुस्मरणे भवत्पदानुस्मरणमेव सतां निमित्तं नान्यत् किञ्चित् ' नित्यनिरतिशयानन्दानुभवरूपत्वात्तस्येति भावः । (भाग० ४।२०।२९) ॥९॥

1 करोतीति क्वचिद्भागवते ।　　　　2 क=०निर्धारार्थम्

मन्ये गिरं ते जगतां विमोहिनीं
वरं वृणीष्वेति भजन्तमात्थ यत् ।
वाचा नु तन्त्या यदि ते जनोऽसितः
कथं पुनः कर्म करोति मोहितः ॥१०॥

एवं प्रसक्तानुप्रसक्त्या निरूप्य प्रकृतमनुसन्धत्ते । मन्ये गिरमिति । भजन्तं भजनादेव लब्धसर्वोत्कर्षम् । नु अहो । ते तव वाचा तन्त्या पशुबन्धनीतुल्यया । जनो यद्यसितः अबद्धः स्यात् तर्हि कथं पुनः पुनः कर्म करोति । इष्टविपर्ययोऽपि त्वद्भजनं विहाय । (भाग० ४।२०।३०) ॥१०॥

त्वन्माययाऽद्धा जन ईश खण्डितो
यदन्यदाशास्त ऋतात्मनोऽबुधः[1] ।
यथाचरेद् बालहितं पिता स्वयं
तथा त्वमेवार्हसि नः समीहितुम् ॥११॥

यत एवं इष्टवाग्विलासो भवानतो भवता भक्तान् प्रत्येवं न वाच्यम् । किन्तु पितृवद्धितमेव वाच्यमित्याह । त्वन्माययेति । अद्धा तत्त्वतः । खण्डितः पृथक्कृतः । ऋतात्मनः सत्यादात्मरूपात् । अबुधः देहाहंबुद्धिः सन् । अन्यद्विषयसुखम् आशास्ते वाञ्छति । अतः स्वहितं न वेत्ति । अतः स्वयमेव समीहितुं स्वहिते चेष्टयितुं भवानर्हति ।

सोऽयं प्रसन्नेन भगवता दीयमाने स्वर्गापवर्गादावपि [2]ऊर्जस्वलत्वादनभिरुचेः पृथोरुत्साहः स्थायिभावः प्रकरणेनावगम्यते । न हि क्लीवचेतसा तथाविधा वराः परिहर्तुं शक्याः । पृथुर्भगवन्तम् । (भाग० ४।२०।३१) ॥११॥

कविः ।

शृण्वन् सुभद्राणि रथाङ्गपाणे-
र्जन्मानि कर्माणि च यानि लोके ।

---

1 क्वचिद्भागवते-बुधः 2 क-पुस्तके ऊर्जस्वलत्वादिति पतितम् ।

गीतानि नामानि तदर्थकानि
गायन् विलज्जो विचरेदसङ्गः ॥१२॥

एवं दानवीरं दर्शयित्वा क्रमप्राप्तं धर्मवीरं दर्शयन्नभ्यर्हितत्वान्निष्काम-धर्मवीरमेव पञ्चदशभिः पद्यैरुदाहरति कविरित्यादिभिः। कविः ऋषभपुत्रो योगी हरिश्च।

रथाङ्गं चक्रम्। स रथाङ्गपाणिरर्थो वाच्यो येषां गीतानां नाम्नाञ्च तानि तथा। नाम्नां गानं कीर्तनम्। विचरेद्विचरति। सम्भावने लिङ्। असङ्गो विलज्ज इत्याभ्यां लोकावगणनया चित्तगतं किमप्यौदार्यमुक्तम्। तेन चाक्लैव्यात्मक उत्साहोऽवगम्यते। अयमेवास्य शान्ताद्भेदः। शान्ते हि नात्यन्तं लज्जा-देस्तिरस्कारः। धर्मस्तु भगवज्जन्माद्यनुसन्धानरूपः। (भाग० ११।२।३९) ॥१६॥

एवंव्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥१३॥

आविर्भूतधर्मवीररसस्यानुभावानाह एवमिति। स्वप्रियो विष्णुः। द्रुतं भक्तिरसेन क्लिन्नम्। निरीहस्य जगज्जननाद्यभिमानमिव[1] पश्यन् हसति। रोदित्यानन्दाश्रूणि मुञ्चन्ति। रौतीति भगवन्तं पुरःस्थितमिव मन्यमानो गोष्ठीं कुरुते। भक्त्यावेशाद् गायति। उत्तीर्णोऽस्मि भवाम्बुधिमिति नृत्यति। तत् किं नटवत् ख्यापनाय नेत्याह उन्मादवदिति। उन्माद इत्यर्शआद्यच्[2]-प्रत्ययान्तः। लोकबाह्य इत्यनेनासङ्गादित्वमुक्तम्। (भाग० ११।२।४०) ॥१३॥

---

1 क—०व्यघटसानमिव   2 पाणिनिः ५।२।१२७

खं वायुमग्निं सलिलं महीञ्च
ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ।
सरित्समुद्रांश्च हरेः शरीरं
यत्किञ्च भूतं प्रणमेदनन्यः ॥१४॥

ज्योतींषि नक्षत्राणि । सत्त्वानि गवाश्वप्रभृतीनि । हरेः शरीरमिति बुद्ध्या यत्किञ्च भूतं प्रणमति । अनन्यः सर्वत्र हरिदर्शी[1] । कविः निमिम् । (भाग० ११।२।४१) ॥१४॥

सनकः ।

नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
[2]किंत्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ।
येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः
[3]कीर्तेन्यतीर्थयशसः कुशला रसज्ञाः ॥१५॥

ये भवतः कथायां रसज्ञाः ते आत्यन्तिकमपि तव प्रसादं मोक्षाख्यं न गणयन्ति । किं तु किमुतान्यद् ब्रह्मादिस्थानम् । यतो भ्रुव उन्नयैर्भ्रूक्षेपैः कालाख्यैरर्पितभयं जनितभयम् । कीर्तेन्यम् कीर्तनीयं रम्यत्वात् । कृत्यार्थे तवै-केन्-केन्य-त्वनः[4] इति कृत्यप्रत्ययः । तीर्थं पावनत्वात् यशो यस्य । अत एव कथा श्रवणे परिणामे च सुखदा । त्वदङ्घ्रिशरणत्वान्न कालभयम् । कुशलत्वान्नासारग्रहणम् । (भाग० ३।१५।४८) ॥१५॥

कामं भवः स्ववृजिनैर्निरयेषु नः स्ता-
च्चेतोऽलिवद्यदि नु ते पदयो रमेत ।

---

1 क—हरिदृष्ट्या । 2 स्वामी—किम्वन्य० ।

3 कीर्तन्येत्यादिसु द्रापितः पाठो दृश्यतेऽन्यत्र । कीर्तेन्येतिवैदिकप्रयोगस्तु ऋग्वेदे (१ म: १०३ सू: ४ ऋः) अप्यस्ति ।

4 पाणिनिः ३।४।१४।

वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः
पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥१६॥

कामं यथेष्टं निरयेषु भवः स्तात् अवस्थानमस्तु। स्ववृजिनैरस्मत्-पापैः। यदि ते पद्मवत्पदयोरलिवच्चेतो रमेत। यदि तुलसीवद्वाचः त्वदङ्घ्रि-सङ्गजनितशोभाः। यदि च कर्णरन्ध्रः तव गुणगणैः पूर्येत। एवं सति नरकोऽपि सुखदः अन्यथा स्वर्गोऽपि दुःखद इत्यर्थः। काममित्यनेन कापि शूरता गम्यते। कुमारा भगवन्तम्। (भाग० ३।१५।४६) ॥१६॥

सूतः ।

नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् ।
स्यात् सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥१७॥

उत्तमश्लोको वार्ता वृत्तिर्येषां ते तथा। अत एव तत्कथामृतं जुषताम्। तत्-कथामृतसेवनेनैवाजरामरत्वम्। अत एवान्तकालेऽपि न सम्भ्रमः न व्याकुलत्वम्। देहस्यानात्मत्वात्[1] कुत्सितदेहान्तरलाभ इति चेत्तन्न। स्मरतां तत्पदाम्बुजम्। तत्स्मरणस्यान्तकालेऽप्यलोपात्। तदुक्तं गीतासु

यं यं वापीति[2]।

सूतः। (भाग० १।१८।४) ॥१७॥

ध्रुवः ।

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्त महतामलाशयानाम् ।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं
नेष्ये भवद्गुणकथामृतपानमत्तः ॥१८॥

प्रकृष्टः सङ्गः प्रसङ्गः। भक्तत्वाद्विष्णुकथाश्रावकत्वम्। महत्त्वादाश्रितवत्-सलत्वम्। अमलाशयत्वाद्बोधकत्वम्। नेष्ये अतिक्रमिष्यामि। ध्रुवो भगवन्तम्। (भाग० ४।६।११) ॥१५॥

---

1 क—देहस्य नात्मत्वं तत्व'   2 श्रीमद्भगवद्गीता ८।६

मैत्रेयः ।

तस्मिन् प्रसन्ने सकलाशिषां प्रभौ
किं दुर्लभं ताभिरलं लवात्मभिः ।
अनन्यदृष्ट्या भजतां गुहाशयः
स्वयं विधत्ते स्वगतिं परः पराम् ॥१९॥

तस्मिन् विष्णौ । ताभिराशीर्भिः । लवात्मभिः क्षणिकाभिः । यद्यपि भक्तस्याशिषः सुलभाः तथापि ता न कर्तव्या इत्यर्थः । यतो भजनादन्यत्र फलकामनायां दृष्टिं विहाय भजतां स्वयमप्रार्थित एव स्वगतिं स्वपदप्राप्तिं विधत्ते । सा च परा सर्वेभ्यः फलेभ्यः । स हि परः सर्वेभ्यः फलप्रदेभ्यः । न च शुद्धामशुद्धां वा भक्तिं न जानाति यतो गुहाशयः सर्वान्तःकरणस्थः । मैत्रेयो विदुरम् । (भाग० ३।१३।४६) ॥१६॥

न वै मुकुन्दस्य पदारविन्दयो-
रजोजुषस्तात भवादृशा जनाः ।
वाञ्छन्ति तद्दास्यमृतेऽर्थमात्मनो
यदृच्छया लब्धमनःसमृद्धयः ॥२०॥

रजो रेणुः । भवादृशा विदुरादयः । आत्मनोऽर्थम् आत्मनः सुखसाधनम् । तद्दास्यं विष्णुदास्यम् । मनःसमृद्धीनां मनसः सुखसाधनानां यदृच्छया लब्धत्वात् ता न वाञ्छन्ति । निर्मनस्कामभोग्यं हि निर्विषयसुखम् । तच्च विष्णुदास्यादेव । (भाग० ४।९।३६) ॥१७॥

भक्तिं हरौ भगवति प्रवहन्नजस्र-
मानन्दबाष्पकलया मुहुरर्द्यमानः ।
विक्लिद्यमानहृदयः पुलकाचिताङ्गो
नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥२१॥

असावहमित्यात्मानं नास्मरत् । यतो मुक्तलिङ्गः त्यक्तलिङ्गशरीराभिमानः । [मैत्रेयः] (भाग० ४।१२।१८) ॥१८॥

शुकः ।

योदुस्त्यजान् क्षितिसुतस्वजनार्थदारान्
प्रार्थ्यां श्रियं सुरवरैः सदयावलोकम्[1] ।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्-
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥२२॥

या श्रीः सुरवरैः सदयावलोकं प्रार्थ्यते तां यो भरतो नैच्छत् । तदुचितम् ' यतो विष्णुभक्तानां मोक्षोऽपि फल्गुः । (भाग० ५।१४।४४) ॥२२॥

यज्ञाय धर्मपतये विधिनैपुणाय
योगाय सांख्यशिरसे प्रकृतीश्वराय ।
नारायणाय हरये नम इत्युदारं
हास्यन् मृगत्वमपि यः समुदाजहार ॥२३॥

यश्च भरतो मृगत्वं हास्यन् त्यक्ष्यन् इति समुदाजहार उच्चारितवान् । कर्मज्ञानभक्तिभेदान्नमस्कारः । तत्र कर्मयोगे—यज्ञाय उपासनारुपाय ' धर्मपतये उपास्यरुपाय ' विधौ नैपुणं यस्य तस्मै उपासकरुपाय । ज्ञानयोगे—योगाय उपासनारूपाय ' सांख्यं शिरसि यस्य ' आदरेण गृहीतत्वात् ' तस्मै उपासकरूपाय ' प्रकृतीश्वराय उपास्यरूपाय । भक्तियोगे—नारं नरसमूहः अयनं यस्य तस्मै नारायणाय उपास्यरूपाय ' नररूपेणोपासकरूपाय ' नामोच्चारणेनोपासनारूपाय । हरये इति विशेष्यं सर्वत्र । अपरः प्रकारः—यज्ञाय श्रुत्यर्थरूपाय ' धर्मपतये स्मृत्यर्थरूपाय ' विधिनैपुणाय सदाचाररूपाय । एभिस्त्रिभिस्त्रयीमार्ग उक्तः । योगाय योगेन समाधिना प्राप्याय क्लेशादिचतुष्टयापरामृष्टाय पुरुषाय । योगाय इति साध्यसाधनयोरभेदोपचारादुक्तम् । सांख्येषु प्रकृत्यादितत्त्वेषु शिरसे

1 श्रीधरस्वामी—०लोकाम् । विजयध्वजः—०लोकैः ।

शिरोवत्प्रधानभूताय । पुरुषाख्यतत्त्वरूपायेत्यर्थः । प्रकृत्या स्वभावेन न तूपाधिना ईश्वराय नियन्त्रे नित्यैश्वर्याय । पशुपति-सदाशिवादिशब्दवाच्यायेत्यर्थः । नारायणाय पाञ्चरात्रादितन्त्रेषु निरूप्याय । तदेवं मार्गपञ्चकेन प्राप्याय नम इत्यर्थः । शुकः । (भाग० ५।१४।४५) ॥२३॥

गजेन्द्रः ।

एकान्तिनो यस्य न कञ्चनार्थं
वाञ्छन्ति ये वै भगवत्प्रपन्नाः ।
अत्यद्भुतं तच्चरितं सुमङ्गलं
गायन्त आनन्दसमुद्रमग्नाः ॥२४॥

यस्यैकान्तिनः अव्यभिचारिणः सेवकाः यस्मात् कञ्चनार्थं न वाञ्छन्ति । ये भगवत्प्रपन्नाः सर्वात्मना भगवद्भक्ताः । अत्यद्भुतं तस्य विष्णोश्चरितं विश्वसृष्ट्यादिकरणम् । एकत्र स्थिता गायन्तः । गानफलमाह । आनन्दसमुद्रमग्ना इति । गजेन्द्रो भगवन्तम् । (भाग० ८।३।२०) ॥२४॥

मुचुकुन्दः ।

न कामयेऽन्यं तव पादसेवना-
दकिञ्चनप्रार्थ्यतमाद्वरं विभो ।
आराध्य कस्त्वां ह्यपवर्गदं हरे
वृणीत आर्यो वरमात्मबन्धनम् ॥२५॥

क आर्यः ज्ञाता आत्मनो बन्धनं वरं वृणीते न कोऽपीत्यर्थः । सर्वत्र चैतेषु श्लोकेष्वन्यानपेक्षया भजनं धर्मासक्त्या कोऽप्युत्साहः पुष्यतीति मन्तव्यम् । (भाग० १०।५१।५५) ॥२५॥

तस्माद्विसृज्याशिष ईश सर्वशो[1]
रजस्तमःसत्त्वगुणानुबन्धनाः ।

---

1 सर्वतो इत्येवंपाठोऽपि वैष्णवतोषण्यां धृतः ।

निरञ्जनं निर्गुणमद्वयं परं

त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥२६॥

तदेवं सप्रभेदं वीररसं निरूप्य तद्भङ्गया भक्तिरसानुभवितुः फलसम्बन्धं दर्शयन्नुपसंहरति । तस्मादिति । तस्माद् वराणामनर्थरूपत्वात् । आशिषः आशास्यमानानि फलानि । सर्वशः लोकत्रयवर्तिनीरपि । निर्गुणं त्वां व्रजामि । निर्गुणः कुतः । यतो निरञ्जनः । अञ्जनं प्रकाशावरणं मायाख्यम् । सगुणो हि मायासम्बन्धात् । अतोऽद्वयः । मायासम्बन्धे हि सति द्वितीयत्वं स्यात् । कुतोऽद्वयः।यतो ज्ञप्तिमात्रः । मायायाः सत्तासत्ताभ्यामनिर्वाच्यत्वादित्यर्थः । भक्तमहिमा तु भक्तिमहिम्नैवोक्त इति अत्र नोक्तः । मुचुकुन्दः श्रीकृष्णम् । (भाग० १०।५१।५६) ॥२६॥

नारदः ।

नामान्यनन्तस्य गतत्रपः[1] पठन्

गुह्यानि भद्राणि कृतानि च स्मरन् ।

गां पर्यटन् तुष्टमना गतस्पृहः

कालं प्रतीक्षन्नपदो[2] विमत्सरः ॥२७॥

ईदृशस्य च कृतकृत्यतया प्रियातिथिवन्मृत्युप्रतीक्षकत्वान्न किञ्चिद्वैकल्प्यमस्तीत्याह । नामानीति । त्रपा लज्जा । कृतानि कर्माणि । कालं मृत्युम् । अपदः अस्वीकृतस्थानविशेषः ।

इत आरभ्य नारदः कुन्तीत्यादिशब्दा वक्तृनिर्देशमात्रविवक्षया न तु भक्तविवक्षयेति ज्ञेयं विष्णुग्रहणस्य ज्ञापकत्वात् । (भाग० १।६।२७) ॥२७॥

कुन्ती ।

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः

स्मरन्ति नन्दन्ति तवेहितं जनाः ।

---

1 श्रीधरस्वामी—हतत्रपः ।

2 प्रतीक्षन् विमदो इति क्रमसन्दर्भटीकानुसारी प्रतीक्षन्नपटो इति च विजयध्वजटीकासम्मतः पाठौ ।

त एव पश्यन्त्यचिरेण तावकं
भवप्रवाहोपरमं पदाम्बुजम् ॥२८॥

एवं भक्तस्य मुख्यत्वाद् ब्रह्मसायुज्यमुक्त्वा तस्यैव भगवत्सामीप्यादिमुक्तिलिप्सोस्ताः प्रदर्शयितुकामस्त्वाह कुन्तीति। अभीक्ष्णशः पुनः पुनः। नन्दन्ति प्रशंसन्ति। ईहितं कर्म। त एव ये श्रवणादिरता नान्ये। भवः संसारः स एव प्रवाहः जलप्रवाहवत् पतितं न मुञ्चति उच्चावचेषु स्थानेषु पातयतीति प्रवाहः तस्योपरमो विनाशो यत्र पदाम्बुजे तत्तथा। एतेन सामीप्यरूपा मुक्तिरुक्ता। कुन्ती श्रीभगवन्तम्। (भाग० १।८।३६) ॥२८॥

ब्रह्मा।

यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या
दूरेऽहमा[1] ह्युपरि नः स्पृहणीयशीलाः।
भर्तुर्मिथः सुयशसः कथनानुराग-
वैक्लव्यबाष्पकलया पुलकीकृताङ्गाः ॥२९॥

सालोक्यरूपामाह यच्चेति। यद्वैकुण्ठं व्रजन्ति दूरेऽहमाः दूरीकृताहङ्काराः। अनिमिषां देवानाम् ऋषभो विष्णुः तस्यानुवृत्त्या नोऽस्माकम् उपरि। ता एताश्च तिस्रो[2] यथापूर्वमन्तरङ्गाः। एवं सार्ष्टिसारूप्ये अपि मुक्ती ज्ञेये। (भाग० ३।१५।२५) ॥२९॥

कर्दमः।

लोकांश्च लोकानुगतान् पशूंश्च
हित्वा श्रितास्ते चरणातपत्रम्।
परस्परं त्वद्गुणवादसीधु-
पीयूषनिर्यापितदेहधर्माः ॥३०॥

किञ्च सिद्धपुरुषं भगवत्सालोक्यादिमुक्तिमासादयन्तं विभ्रंशयिषवः स्वर्वासिन एवमुपमन्त्रयन्ते। तथा हि

1 श्रीधरस्वामी—दूरेयमा। 2 तस्रो इति मातृकालब्धः पाठः।

अहो इहोष्यतां स्वर्गे एते ते कल्पपादपाः ।
इमा अप्सरसः श्लाघ्याः सेवस्वेति पुनः पुनः ॥

इत्यादि । तत्र चैवमस्तीतिचेतसा सङ्गो न कार्यः । नाप्यहं योग्य इति गर्वः । पुनर्दुःखप्रसङ्गात् । तथा च सूत्रम् स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्[1] इति । तदेतदभिप्रेत्याह । लोकानिति । लोका इन्द्रभवनादयः । लोकानुगतास्तद्वासिनः । तेषां पशुवदाहारमैथुनमात्रवेदित्वात् पशुतुल्यत्वम् । तान् हित्वा । अर्थात् प्रार्थयमानानिति । ये श्रिताः तव गुणवाद एव वासनान्तरोत्पादकत्वात् । सीधुर्मद्यम् । रुचिप्रदत्वात् पीयूषम् । तेन निर्यापितो निष्कासितो देहधर्मो विषयवासनारूपोऽसन्तोषरूपश्च यैस्ते तथा । य एवं प्राप्नुवन् ते श्रिता इत्यादि । तदुक्तं गीतासु

मच्चित्ता इत्यादि[2] ।

कर्दमः कपिलम् । (भाग० ३।२१।१७) ॥३०॥

हरिः ।

गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥३१॥

एवं वै भजमानस्य विदेहकैवल्यमुक्त्वा सम्प्रत्यारब्धकर्मवशात् देहे सत्यपि विष्णुपदप्राप्तिलक्षणां जीवन्मुक्तिं दर्शयितुमुत्तरग्रन्थमारभते । हरिरित्यादि । (भाग० ११।२।४८) ॥३१॥

देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥३२॥

देहस्य जन्माप्ययौ । इन्द्रियाणां तर्षो विषयलिप्सारूपः । प्राणस्य क्षुत् । मनसो भयम् । धियः कृच्छ्रं खिन्नत्वम् । विवेचनाशक्तिरित्यर्थः । (भाग० ११।२।४९) ॥३३॥

---

1 पातञ्जलयोगसूत्रम् ३।५१ ।   2 श्रीमद्भगवद्गीता १०।९ ।

न कामकर्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥३३॥

काम एव कर्मबीजानि। अथवा बीजमविद्या नित्यनिरतिशयसुखात्मकस्वरुपस्यान्यथा ग्रहणमिति यावत्। ततो बाह्यसुखाभिलाषः कामः। तत्सिद्धये व्यापारः कर्म। (भाग० ११।२।५०) ॥३३॥

न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ।
सज्जतेऽस्मिन्नहम्भावो देहे वै स हरेः प्रियः ॥३४॥

जन्मना कुलं लक्ष्यते। अहंभावो गर्वः। (भाग० ११।२।५१) ॥३४॥

न यस्य स्वः पर इति [1]चित्तेष्वात्मनि वा भिदा ।
सर्वभूतहितः[2] शान्तः स वै भागवतोत्तमः ॥३५॥

आत्मनि शरीरे। स्वोऽहं परो नाहमिति भिदा। जातावेकवचनम्। स्वो मम परो न ममेति। (भाग० ११।२।५२) ॥३५॥

त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्धमपि स्म[3] वैष्णवाग्र्यः ॥३६॥

त्रिभुवनविभवो ब्रह्मा तद्धेतवे। ब्रह्मपदार्थमपि न चलति। यतो भगवत्पदं ब्रह्मपदादप्यधिकम्। तदाह। अजितेति। अजिते विष्णौ आत्मा मनो येषां तैः। (भाग० ११।२।५३) ॥३६॥

---

1 श्रीधरस्वामी—वित्तेष्वात्मनि। 2 सर्वभूतसमः इति मुद्रापितो भागवतीयः पाठः।
3 श्रीधरस्वामी—०मपि यः स वैष्ण०। विजयध्वजः—०मपि स्म स वैष्ण०। वीरराघवः—०मपि स वैष्ण०।

भगवत उरुविक्रमाङ्घ्रिशाखा-
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः ॥३७॥

सन्तप्तस्य चलनं स्यादिति चेत्तत्राह । भगवत इति । उरुर्विक्रमो यस्याङ्घ्रेस्तस्य शाखाः अङ्गुलयः तासां नखा एव उज्ज्वलत्वाद्वा मणयः तेषां चन्द्रिका प्रभा। उपसीदतां भजताम्। स सन्तापः। (भाग० ११।२।५४) ॥३७॥

विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरशनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥३८॥

यस्य हृदयं साक्षादनाच्छन्नरूपो हरिर्न विसृजति । यतः प्रणयरशनया प्रेमगुणेन धृताङ्घ्रिपद्मः। हरिर्निमिम्। (भाग० ११।२।५५) ॥३८॥

श्रीविष्णुः।

निष्किञ्चना मय्यनुरक्तचेतसः
शान्ता महान्तोऽखिलजीववत्सलाः।
कामैरनालब्धधियो जुषन्ति ते[1]
यन्नैरपेक्ष्यं[2] न विदुः सुखं मम ॥३९॥

अनालब्धाः अस्पृष्टाः। नैरपेक्ष्यं निरपेक्षैर्लभ्यम्। श्रीकृष्ण उद्धवम् (भाग० ११।१४।१७) ॥३९॥

1 श्रीधरस्वामी—यत्   2 श्रीधरस्वामी—तन्नैरपेक्ष्यं

वागूगद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥४०॥

गद्गदा स्खलिताक्षरा । श्रीकृष्ण उद्धवम् । (भाग० ११।१४।२४) ॥४०॥

राजा ।

पुनश्च भूयाद् भगवत्यनन्ते
रतिः प्रसङ्गश्च तदाश्रयेषु ।
महत्सु यां यामुपयामि सृष्टिं
मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥४१॥

एवं जीवन्मुक्तं लक्षयित्वा तन्माहात्म्यं ब्रुवाणः तत्सङ्गिनः पुरुषान् स्तौति पुनश्चेति । पुनर्जन्मान्तरे । तदाश्रयेषु भगवदाश्रयेषु प्रकृष्टः सङ्गः । यां यां सृष्टिमुपयामि तत्र तत्र महत्सङ्गो भूयात् । तज्जन्मविशेषं प्रार्थयन् नमो द्विजेभ्य इति पुरःस्थितानृषीन् राजानमपि । (भाग० १।१९।१६ ॥४१॥

ध्रुवः ।

या निर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
[2]किन्त्वन्तकासिलुलितात् पततां विमानात् ॥४२॥

भवज्जना जीवन्मुक्ताः । स्वमहिमन्यपि स्वाधीनमाहात्म्येऽपि । किन्तु किं पुनः । अन्तकस्यासिना लुलिताद्विमानात् पतताम् पराधीनमाहात्म्याना-मित्यर्थः । ४।९।१० ॥४२॥

---

2 किम्बन्तकासीति विजयध्वजीयः पाठः ।

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं
ये चान्वदः सुतसुहृद्गृहवित्तदाराः।
ये त्वब्जनाभ भवदीयपदारविन्द-
सौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥४३॥

मर्त्यं शरीरं प्रियमपि न स्मरन्ति। ये च अदो मर्त्यम् अनु असुना देहेन सह स्थिताः तत्सम्बन्धात् सम्बन्धिनः सुतादयः। तानपि न स्मरन्ति। के। ये भगवद्भक्तेषु कृतप्रसङ्गाः। ध्रुवो भगवन्तम्। (भाग० ४।९।१२) ॥४३॥

सूतः।

तदोपसंहृत्य गिरः सहस्रणी-
र्विमुक्तसङ्गं मन आदिपूरुषे।
कृष्णे लसत्पीतपटे चतुर्भुजे
पुरःस्थितेऽमीलितदृग्व्यधारयत् ॥४४॥

एवं जीवन्मुक्तं लक्षयित्वा स्तुत्वा चेदानीं अवसिताधिकारस्य तस्य शरीर-पातमाह। तदेति। तदा तस्यां दशायाम्। सहस्रणीः सहस्रेण व्यापाराणां लब्धबला गिर उपसंहृत्य। इत्यनेन सर्वेन्द्रियोपरतिरुपलक्षिता। अत एव विमुक्तसङ्गम्। मीलिता दृग् बुद्धीन्द्रियवृत्तिर्यस्मिन् मनसि। दृशं मनसि निधाय मनः कृष्णे व्यधारयदित्यर्थः। अनेन प्रत्याहारपूर्वा धारणोक्ता। (भाग० १।९।३०) ॥४४॥

विशुद्धया धारणया हताशुभ-
स्तदीक्षयैवाशु गतायुधव्यथः।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रम-
स्तुष्टाव जन्यं विसृजन् जनार्दनम् ॥४५॥

विशुद्धा निष्कामा। अशुभं पूर्वमघम्। तस्य श्रीकृष्णस्य ईक्षया

साक्षात्कारेण । गतानि आयुधव्यथानि यस्य स तथा । आयुधवत् व्यथयन्ति इत्यायुधव्यथानि उत्तरपापानि । तथाचोक्तम्—तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ।[1] श्रुतिश्च—तद् यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति ।[2] विभ्रमो विविधं भ्रमणम् । तत्र तत्रासन्तोषात् । तस्य निवृत्तिरपूर्वकृष्णाख्यविषयलाभात् । जन्यं शरीरं विसृजन् त्यजन् । जनार्दनं कैवल्यदातारं पुरुषमित्युचितपदप्रयोगः । सूतः शौनकम् । (भाग० १।६।३१) ॥४५॥

रुद्रः ।

प्रत्युद्गमप्रश्रयणाभिवादनं
विधीयते साधु मिथः सुमध्यमे ।
प्राज्ञैः परस्मै पुरुषाय चेतसा
गुहाशयायैव न देहमानिने ॥४६॥

स्तुतिरिह मनसा भगवद्गतसाधुत्वानुसन्धानम् । वाचिकस्य तु व्यवहारदशाविषयत्वात् । तदेवाह । प्रत्युद्गमेति । प्रश्रयणं विनयः । प्रत्युद्गमादिकं सत्कारोपलक्षणम् । हे सुमध्यमे दाक्षायणि । तत् सर्वं प्राज्ञैः । प्रज्ञाऽत्र ऋतम्भराख्या । सास्ति येषां तैः । परस्मै तुरीयाय । चेतसैव विधीयते अर्थादन्यैस्त्वन्यथेत्यर्थः । ऋतम्भरालक्षणन्तु

बुद्ध्यभिव्यक्तं पुरुषं बुद्धिसङ्गविवर्जितम् ।
या दर्शयति बोधार्कं सा मोक्षे स्यादृतम्भरा ॥

इति । (भाग० ४।३।२२) ॥४६॥

सत्त्वं विशुद्धं वसुदेवशब्दितं
यदीयते तत्र पुमानपावृतः ।

1 ब्रह्मसूत्रम् ४।१।१३ 2 छान्दोग्योपनिषत् ५।२४।३

सत्त्वे च तस्मिन् भगवान् वासुदेवो
ह्यधोक्षजो मे नमसा[1] विधीयते[2] ॥४७॥

एवमियता प्रबन्धेन विष्णवादिप्रकरणचतुष्टयीं साङ्गां सकलां च निरूप्याथ ग्रन्थकृत् प्रकरणप्रतिपाद्यामिष्टदेवतां प्रणमति सत्त्वामत्यादि। मे मया भगवानधोक्षजो [3]वासुदेवश्च नमसा[3] विधीयते। नमस्क्रियते। अधःकृतमक्षजमिन्द्रियजं ज्ञानं येन स तथा। निराकार इत्यर्थः। कथन्तर्हि वासुदेवः। तत्राह सत्त्वे चेति। तस्मिन् वसुदेवाख्ये उपाधौ अस्य सत्त्वे सद्भावे अधिष्ठाने सति। अथ वसुदेवशब्दस्य कोऽर्थः। तत्राह सत्त्वमिति। यद् यस्मात्तत्र विशुद्धे सत्त्वे पुमान् विष्णुरपावृत ईयते प्रत्यक्षः प्रतीयते। अनेन वसत्यस्मिन् रमणीयत्वादिति वसु। दीव्यति द्योततेऽस्मिन् प्रकाशकत्वादिति देव इति। शुद्धसत्त्वे वसुदेवशब्दस्य प्रवृत्तौ हेतुरुक्तः। तदेवं साकारनिराकारे भगवतो द्वे रूपे नमस्कृते भवतः। रुद्र उमाम्। (भाग० ४।३।२३) ॥४७॥

शुकः।

उद्गायतीनामरविन्दलोचनं
व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः।
दध्नश्च निर्मन्थनशब्दमिश्रितो
निरस्यते येन दिशाममङ्गलम् ॥४८॥

अथास्य ग्रन्थस्य प्रचयपरिपन्थिविघ्नविघाताय भगवद्गुणमाहात्म्यपरं पद्यमुदाहरति। उद्गायतीनामिति। दध्नश्च ध्वनिः। निर्मथ्यतेऽनेनेति निर्मन्थनं कुठरादि। कुठरो मन्थविष्कम्भे[4]। तस्य शब्देन मिश्रितः। येन ध्वनिना।

---

1 मनसा इति मातृकाद्दष्टः पाठः 2 ख—भिधीयते
3...3 क—वासुदेवश्च मनसा। ख—वासुदेवश्चतसा
4 कुटरो दण्डविष्कम्भ इत्यमरकोषः (२।९।७४)

निरस्यते तिरस्क्रियते अमङ्गलमित्येतन्निर्विघ्नत्वे द्योतकम्। शुकः। (भाग० १०।४६।४६) ॥४८॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजतादधोक्षजे
ऽप्यावेश्यतां[1] नो मतिरप्यहैतुकी ॥४९॥

श्रीवोपदेवकृते मुक्ताफले विष्णुभक्तानां वीररसः।
इत्येकोनविंशोऽध्यायः।

एवं जगदपवर्गहेतुं ग्रन्थं प्रणीय तज्जनितसुकृतवासनासनाथस्तत्र तत्र भगवानाचार्यो विश्वस्य स्वस्य च समीहितमाशास्ते स्वस्त्यस्तु इति। स्वस्तीति क्षेमवाचकमव्ययम्। ननु खलेषु सत्सु कुतः स्वस्ति तत्राह ' खल इति। खलो दुर्जनः। प्रसादः स्वच्छत्वम्। विश्वस्य स्वस्तिप्रतिज्ञाभङ्गभयात् खलस्य प्रसादमात्रमुक्तं न तु विनाशः। एवं योग्यतामुक्त्वा परस्परोपकारे प्रवृत्तिमाह ध्यायन्त्विति। शिवं मङ्गलम्। स्वगतमाशास्ते मनश्चेति। नः अस्माकं च मनो भद्रं सात्त्विकं वस्तु भजतात्। अपिशब्दः समुच्चये। अधोक्षजे च नो मतिरावेश्यताम् आवेशं प्राप्नोतु। आवेशं प्राप्नोति आवेशयतीति प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चेति[2] णिच्। अहैतुकी निष्कामा। प्रह्लादो नृसिंहम्। (भाग० ५।१८।९) ॥४९॥

इति हेमाद्रिविरचितायां कैवल्यदीपिकायां विष्णुभक्तानां वीररसः।
समाप्तोऽयमेकोनविंशोऽध्यायः।

---

1 श्रीधरस्वामी—आविश्यताम्। वीरराघवः—ह्यावेश्यताम्

2 गणसूत्रम् २०३

[ग्रन्थोपसंहारः]

चतुरेण चतुर्वर्गचिन्तामणिवणिज्यया ।
हेमाद्रिणार्जितं मुक्ताफलं पश्यत कौतुकात् ॥५०॥

इह च स्वकर्तृकत्वेऽपि यदुराजमहामन्त्रिणा हेमाद्रिणाऽभ्यर्थित आचार्य-स्तत्कर्तृकत्वं ख्यापितवानिति प्रागुक्तम् ।[1] तदेतत् पर्यन्तेऽपि तत्कीर्तिं ख्यापयन्नाह चतुरेणेति । चतुर्वर्गचिन्तामण्याख्यग्रन्थमहोदधेर्वणिज्या तया । चतुरेण विदितग्रन्थरचनारीतिविशेषेण । यथा हि वणिज्यायां तत्तद्देशेऽभ्यस्तानि तानि प्रियवस्तून्याहृत्य पुमान् तत्तद्विषये चतुरो भवति । तथैतेन तत्तत्स्मृती-तिहासपुराणादिभ्यस्तानि निःशेषव्रत-दान-तीर्थ-मोक्षादिप्रतिपादनपराणि वाक्यान्याहृत्य ग्रन्थरचनायाः कौशलमासादितम् । ततस्तयैव रेखया भागवतस्य तत्तत्स्कन्धेभ्यस्तानि तानि विष्ण्वादिवस्तुचतुष्टयप्रतिपादनपराणि पद्यान्याहृत्य मुक्ताफलाख्यं प्रकरणं कृतम् । तदेतत् कौतुकात् पश्यत । हे कुतूहलिनः इति शेषः । अस्मिन् विलोकिते सकलकौतुकमवाप्स्यथेति भावः ।

अन्यत्र ।—चतुर्णां वर्णादीनां वर्गाः देशच्छायासमूहास्तेषां चिन्ता परीक्षा तयोपलक्षिता मणयो रत्नानि तेषां वणिज्या क्रयविक्रयस्थितिः तया । चतुरेण निपुणेन । हेमाद्रिणा बहुसुवर्णेन वणिजा अर्जितम् मुक्ताफलं मौक्तिकानि । जाता वेकवचनम् । पश्यतेत्यर्थः । मुक्ताफलशब्दः पक्षद्वयेऽपि प्राग्[2] व्याख्यातः ॥५०॥

निर्मथ्य पयसां राशिं मन्दरः कौस्तुभं न्यधात् ।
हेमाद्रिर्वचसां मुक्ताफलं रत्नं हृदि प्रभोः ॥५१॥

एवं तस्य वणिग्रूपेण कुशलतां व्यञ्ज्य सुमेरुसाम्येन स्थैर्यादिगुणान् व्यनक्ति निर्मथ्येति । पयसां राशिं क्षीरोदम् । मन्दरो मन्थाचलः । न्यधा-न्निक्षिप्तवान् । हेमाद्रिर्मेरुः कामदेवात्मजश्च । वचसां राशिं भागवताख्यं निर्मथ्य । मुक्ताफलाख्यं रत्नं ग्रन्थञ्च प्रभोः श्रीकृष्णस्य हृदि न्यधादित्यर्थः । विष्णोरय-मलङ्कार इति भावः ॥५१॥

---

1 प्रथमाध्याये १म-श्लोकटीका द्रष्टव्या । 2 प्रथमाध्याये ४र्थ-श्लोकटीका द्रष्टव्या ।

हेमाद्रिमाद्रियत एव गुणेन येन
तेनैव पूरितसुखेन सुबद्धमेतत् ।
मुक्ताफलं प्रतिफलज्जगदीशरूपं
यत्कर्णकण्ठहृदये सुषमास्य काचित् ॥५२॥

हेमाद्रिमित्यादि । येन सकलकलाकौशलरूपेण गुणेन हेमाद्रिं जन आद्रियते सत्कुरुते । तेनैव गुणेन । पूरितं तत्साधनसम्पादनादर्थिनां सुखं येन गुणेन । अर्थिजनेषु कल्पतरवो हि तस्य गुणाः । एतत्प्रकरणं सुबद्धं सुघटितम् । प्रतिफलत् बुद्धिदर्पणे प्रतिविम्बीभवत् जगदीशस्य विष्णोः रूपं येन ग्रन्थेन तत् तथा । तदेतत् यस्य कर्णे श्रवणेन कण्ठे घोषेण हृदये तदर्थचिन्तनेनास्ति तस्य पुंसः काचित् स्वसंवेद्या सुषमा परमात्मप्रकाशरूपा परमशोभा भवतीत्यर्थः ।

अन्यत्र तु ।—येन गुणेन सूत्रेण । हेमाद्रेः सुमेरोर्मा लक्ष्मीः शोभा । आद्रियते मेरुविकारस्य सुवर्णस्य निकटस्थतया स्वीक्रियते । तेन पूरितं भृतं स्वप्रवेशेन सुष्ठु खं मौक्तिकस्य मध्यस्थानं येन गुणेन । तेनैव एतद्रत्नं सुबद्धं सुयन्त्रितम् । प्रतिफलत् निर्मलतया प्रतिविम्बीभवत् जगदेव ईशस्य रूपं यस्मिन् मौक्तिके । यद्वा प्रतिफलत् जगदीशस्य राज्ञो रूपं यस्मिन् तत्तथा । तुल्याधिकरणाद्बहुव्रीहेः । प्रशंसायां रूपप्प्रत्ययो वा । सर्वथा राजालङ्करणमित्यर्थः । तदेतद् यस्य कर्णे कण्ठे हृदये वा अलङ्कारतयास्ति तस्य काचिदनन्यसामान्या सुषमा कान्तिर्भवतीत्यर्थः ॥५२॥

द्वे एव चित्रे रामस्य सिन्धुर्बद्धः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सूर्यावृत्तप्रदक्षिणः ॥५३॥

द्वे एवेति । रामो दाशरथिर्देवगिरीश्वरश्च तस्य । पुरा त्रेतायाम् । चरित्रेषु मध्ये द्वे एव चित्रे । यत् सिन्धुः समुद्रो बद्धः । यच्च हेमाद्रिर्मेरुः स्वमुपानीतः स्वस्य निकटीकृतः । किम्भूतः । सूर्यस्य रवेः आवृत्ता व्यावृत्तिं गता प्रदक्षिणा परिभ्रमणी यस्मिन् मेरौ स तथा । व्यधिकरणबहुव्रीहौ तु प्रागुक्तकार्य-

कारणयोरभेदोपचारेण ताच्छब्द्यविवक्षया हेमाद्रिशब्देन तज्जं सुवर्णं लक्ष्यते। अर्थिभ्यः प्रदातुं भूयान् सुवर्णराशिरानीत इत्यर्थः।

अन्यत्र तु।—तस्यैव रामस्य अधुना यदुकुलेऽवतीर्णस्य द्वे एव चित्रे। यत् सिन्धुर्गजमदो बद्धः। सिन्धुशब्देन तद्वन्तो गजा लक्ष्यन्ते। सिन्धुरिति जातावेकवचनम्। प्रत्यर्थिनो राज्ञः पराभूय ततसिन्धुराः स्वगृहे बद्धा इत्यर्थः। यच्च हेमाद्रिर्द्विजविशेषः स्वमुपानीतः। स्वसाम्राज्यस्य महामात्यस्य पदेऽधिकर्तुमित्यर्थः। कीदृशः सूरिषु पदवाक्यप्रमाणादिप्रवीणेषु आवृत्ता शतशः क्रियमाणत्वादावृत्तिं गता प्रकृष्टा दक्षिणा दानं यस्य स तथा। को हि नाम बृहस्पतिमपि प्रज्ञया प्रहसतस्तादृशस्य मन्त्रिशिरोमणेर्निजनिकटीकरणान्न चित्रीयते।

विद्वद्धनेश-शिष्येण भिषक्केशव-सूनुना।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥५४॥

विद्वद्धनेशशिष्येणेत्यतिरोहितार्थम्। (भाग०) ॥५४॥

स्वर्गे गीर्वाणनार्यः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजं फणिपतिसुदृशो[1] यस्य गायन्ति कीर्तिम्।
यस्तीर्णः शास्त्रपाथोनिधिमखिलमदो ग्रन्थरत्नं सुवृत्तं
चक्रे शिष्यो धनेशः कविकुलतिलकः केशवि र्वोपदेवः ॥५५॥

इति श्रीवोपदेवविरचितं मुक्ताफलं समाप्तम् ॥

यो नित्यशुद्धसुखबोधवपुर्नितान्तं
जागर्ति चोमिति पदं यमिहापवर्ग्यम्।
यो योगिनां हृदि चकास्ति विधूतपङ्कः
सोऽस्माकमस्तु शरणं पुरुषः पुराणः ॥१॥
यत्किञ्चिदत्रभवतः खलु वोपदेव-
सूरेः कृतिर्निजधिया परिचर्यते मे।

1 क-पुस्तके श्लोकोऽयं नोपलभ्यते।

उद्दिश्य कोविदजनोपकृतिं तदारा-
दाराधनं भगवतः परमेश्वरस्य ॥२॥
छायावतीममृतदामपि नैकचित्रां
पुण्यप्रभामिव भुवि प्रथितां तदीयाम् ।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
ग्रन्थः कृतोऽत्र कृतिनां हृदुपैतु तोषम् ॥३॥
अतत्त्वे तत्त्वधीर्येषां तत्त्वे चातत्त्वधीर्नृणाम् ।
न तानानन्दयन्त्येता वोपदेवस्य सूक्तयः ॥४॥
यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽथ तिथिनिर्धारार्थमेकोऽद्भुतः ।
साहित्ये त्रय एव [1]भागवततत्त्वोक्तौ त्रयस्तस्य च ।
भूगीर्वाणशिरोमणेरिह[1] गुणाः के के न लोकोत्तराः ॥५॥
टीकां मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकाम् ।
हेमाद्रिः कटके चक्रे रामराजस्य[2] वेश्मनि ॥६॥

इति [3]श्रीमत्प्रौढप्रतापचक्रवर्तिमहाराजाधिराजसोमवंशोद्भव-
रामराज-मन्त्रिवर्य-हेमाद्रिदेव-विरचिता
मुक्ताफलटीका[3] समाप्ता ॥

1...1 क—भागवततत्त्वोक्तिरेकस्तथा भव्या वाणिशिरोमणेरिह । 'इण्डिया-अफिस्'-ग्रन्थागारस्थिते पुस्तकद्वये (I.O. Catalogue, No. 3542, A,B) कविकल्पद्रुम-पुष्पिकायाञ्च भागवततत्त्वोक्तौ त्रयस्तस्य भुव्यन्तर्वाणिशिरोमणेरिहेति पाठः । परम् इण्डिया-अफिस्-स्थिते पुस्तकान्तरे (C) चौखम्बाग्रन्थमालाप्रकाशितहरिलीलाम्‌तस्य पुष्पिकायाञ्च अस्मद्‌गृहीतः ख-पुस्तकधृतः पाठ एवोपलभ्यते ।

2 कामराजस्येति मातृकाद्दृष्टः पाठः । परं हरप्रसादशास्त्रिकृतायां पुराणग्रन्थसूच्यां-सुल्लिखितस्य हरिलीलाग्रन्थस्य विवृतौ रामराजस्येति पाठो धृतः ।
(*Descriptive Catalogue of Sanskrit Manuscripts in the Collections of the Asiatic Society of Bengal*, vol. V, Purāṇa Manuscripts, No 3657).

3...3 ख—श्रीवोपदेवकृता

37, 163, 185